
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

M-2675

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विकम सवंत)	Additional Particulars / Remark
गृह्यसूत्र गदाधर भाष्य	[illegible] पारस्कर	वेदांग	पूर्ण	-	3/12	300	संस्कृत	कागद	09	36		

॥ अथ गृह्यसूत्रगदाधरभाष्यप्रारंभः ॥

॥ श्रीगणेशाय नमः ॥ आविर्भूतश्चतुर्धा यः कपिभिः परिवारितः ॥ हतवान् राक्षसानीकं रामं दाशरथिं भजे ॥१॥ स्वामिप्रायेण हि मया न किंचिदिह लिख्यते ॥ किंतु वाचनिकं सर्वं मतो ग्राह्यं च भणि-

नि यैः ॥ २ ॥ अथातो धिकार इत्यादिना श्रौतानि कर्माण्युक्तानि तदनंतरं स्मार्तानि

विधीयंते ॥ तत्रैतत्सूत्रमंत्रं ॥ अथातो गृह्यस्थालीपाकानां कर्म ॥ उच्यत इति सूत्रशेषः ॥

श्रौतानंतर्यप्रदर्शनार्थो ऽयमथशब्दः ॥ आनंतर्यप्रसक्तिप्रयोजनं तु ॥ अथातोधिकार इत्यादि यत्सा-

धारणं तस्य प्रवृत्त्यर्थं ॥ श्रौतानामुपनिबंधनं पूर्वमिति प्राप्ते स गृह्यानुपतिष्ठते पूर्वं वादित्वेत

त्सूत्रप्रवृत्त्या ज्ञापते ॥ अत इति हेतुः ॥ यतः श्रौतान्युक्तानि स्मार्तान्येवावशिष्यंते ऽतस्तान्युच्यंते ॥

प्र ननु गर्भाधानादीनामनुष्ठानात्पूर्वमनुष्ठानक्रमेण स्मार्तान्येव वक्तव्यानीति चेत् ॥ नैवं श्रौ-

तेषु हि प्रत्यक्षाः श्रुतयः स्मार्तेषु पुनः कर्तृसामान्यादनुमेयाः श्रुतयः ॥ स्मार्तानामपि हि वे

राम

॥ घर ॥

॥१॥

दम्लक्षमुक्तं न दृष्टः॥ तस्मात्सर्वत्र दाशकृतिर्लोपश्चैतन्नामैव पूर्वमभिधानं॥ स्मरणादेव स्मृतीनां
प्रामाण्यमिति कर्कोपाध्यायैरुपन्यस्तं॥ गृह्यः शालाग्निः॥ तत्र ये स्थालीपाकास्ते गृह्यस्थालीपा
काः तेषां गृह्यस्थालीपाकानां कर्मेक्रियेति॥ स्थालीपाकत्वाद्दर्शादिपुरोडाशाद्युपलक्षणार्थः॥ क
थं ज्ञायते येन स्थालीपाकमुपक्रम्याज्यमुपसंहरतीति निरूप्याज्यमित्यादि॥ एवमाज्यग्रहणमपि चर्वा
द्युपलक्षणार्थम्॥ यतः सर्वसाधारणमेवेदं कर्म॥ न ह्यस्य कर्मणः कुतश्चित्प्रकृतेः कस्याश्चि
द्विकृतावतिदेशोस्ति॥ यत्प्रधानविधिरंगविध्याश्चितः प्रस्मृते सा प्रकृतिः॥ यथा दर्शपूर्णमासौ।
यत्प्रधानविधिरंगविधिरहितः प्रस्मृते सा विकृतिः॥ यथा सौर्यः॥ न च दर्शपूर्णमासविधौ प्रयाज
विधेरिवैतत्कर्मविधेः कस्मिंश्चित्प्रधानविधौ शेषत्वं वास्ति॥ यतः सर्वाण्येव कर्माणि प्रकृत्य ध
र्म्मविधानं॥ सर्वसाधारणं कर्मेह॥ परिसमुह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्याग्निमुपसमाधाय।

दर्भैः॥ परिसमुह्य गोमयेनोपलिप्य वज्रेणोल्लिख्यानामिकांगुष्ठेनोद्धृत्योदकेनाभ्युक्ष्य तस्मिन्न
ग्निं स्थापयेत्। त्रिरुल्लेखनं त्रिरुद्धरणमिति हरिहरः॥ परिसमूहना [illegible] दि पंचापि त्रिस्त्रिरित्यन्ये॥
कर्कोपाध्यायैरपि विपर्यस्यापि त्रीणि भूसंस्कारेद्धरणं चेत्येतत्सूत्रव्याख्यानावसरे यद्व्याख्यातं तद्रूपं देवेस्म
यते तल्लिखेत्सकृत्सकृत्कर्त्तव्यं। यथा परिसमुह्योपलिप्योल्लिखनमिति लेखनेनैतावद्दर्शितं। देवे परि
समूहनादि त्रिस्त्रिः पित्र्ये सकृत्सकृदिति॥ एते पंचभूसंस्कारा इति नित्यं पद्धत्याचार्यैः। अत्रान्यथा
इति कर्कोपाध्यायाः॥ तेन यत्र यत्राग्नेः स्थापनं तत्र तत्रैते कर्त्तव्याः॥ अतः श्रौताग्निस्थापनेपि
कार्याः। न चैषां स्थालीपाकविधावंतर्भावः येन एवमेव विधिर्यत्र क्वचिद्धोम इत्यभिहितेपि तन्न
रग्निर्धीयते। उक्तं तावदाहितेग्निमुपसमाधायेति। न च मनेनाप्रवृत्तिस्तत्रैवाग्निग्निसाध्यानि
स्मार्त्तानि सर्वाण्यावसथ्याग्नौ कार्याणि। तथा च स्मृतिः॥ कर्मस्मार्त्तं विवाहाग्नौ कुर्वीत प्रत

॥रामः॥

॥पंचर॥
२॥

तं गृह्णी॥ प्रायकालाहृते वापि श्रौतं वैतानिकाग्निष्विति। तस्मिन्गृह्याणीमापस्तंबस्मरणाच्च। गृह्य
यहितं गृह्यं। गृह्यशब्दश्चेदं पत्योर्वर्त्तते। तस्मिन्नित्यावसथ्ये। अत्र तस्मिन्यत्किंचिदंपत्योर्विहितं कर्म शांतिक
पौष्टिक व्रतं गृहोमादिकं तस्मात्सर्वमावसथ्याग्नौ भवतीति॥ अत एवाह कात्यायनः। न स्वेग्नाव
न्यहोमः स्यान्मुक्त्वैकां समिदाहुतिं। स्वगर्भसंस्क्रियार्थीश्च यावन्नासौ प्रजायते॥ अग्निस्तु नामधेयादौ
होमे सर्वत्र लौकिकः। न हि पित्रा समानीतः पुत्रस्य भवति क्वचित्। अतस्त्व सीमंतोन्नयनमपि स्मार्त्ताग्ना
वेव कार्यमिति देवजाख्ये परिभाषायां॥ स्पष्टे नोल्लेखनामिति गर्गो हरिहरो॥ काष्ठेन कुशमूलेन वेति
केचित्॥ अत्रैतद्विचार्यते॥ किमावसथ्याधानादिषु वक्ष्यमाणेषु सर्वकर्मसु अध्वर्योः कर्तृत्वं उत यज
मानस्येति। अध्वर्युः कर्मसु वेदयोगादिति परिभाषणात्। पूर्णपात्रं दक्षिणा वरो वेति दक्षिणाम्नानादध्व
र्योः कर्तृत्वमिति चेत्॥ उच्यते॥ न स्मार्त्तेषु कर्मसु अध्वर्योः कर्तृत्वं। वेदयोगाम्नानात्। समाख्यया हि अ

धर्यैः कर्मसुयोगः॥ समाख्या हि वेदयोगात्॥ न च तस्मात्त्रैविद्ययोगोऽस्ति॥ न हि ज्ञायते अमुकवेदोक्तं स्मार्त्तं
मिति॥ तथा च स्मृतिः॥ स होवाच पञ्चकोऽञ्जरिति च तुर्गृहीतमाज्यं गृहीत्वा गार्हपत्ये जुहवपपादि यजुष्टे
जुव इति चतुर्गृहीतमाज्यं गृहीत्वाग्नीध्रीये जुहवपान्वाहार्यपचने वाहविर्यज्ञेपादि सामतः स्वारिति
चतुर्गृहीतमाज्यं गृहीत्वाहवनीये जुहवपयद्यु अविज्ञातमसत्त्ववीणनुहुत्वाहवनीये जुहव
पोति॥ अविज्ञातं स्मात्त्रैय अज्ञायते किमार्ग्वेदिकं किं याजुर्वेदिकं किं वा सामवेदिकमिति॥ नापि द
क्षिणान्यथानुपपत्त्यान्यस्य कर्तृत्वं॥ अस्ति ह्यत्रान्यापि ब्रह्माख्याकर्ताकर्ता वेदकत्वेन कर्त्तात दर्पैः
परिक्रयायमिति द्वीण्यपि पत्तिः॥ तस्मात्त्वस्यैव कर्तृत्वं॥ ॥ दक्षिणतो ब्रह्मासनमास्तीर्य॥
स्थापितस्याग्ने र्दक्षिणस्यां दिशि ब्रह्मण उपवेशनार्थं दर्भान्निधाय ब्रह्मोपवेशनं कुर्यात्॥ ननु द
क्षिणतो ब्रह्मयजमानयोरासने इति परिभाषातो दक्षिणत आसनं प्राप्तं किमर्थं पुनर्दक्षिणग्रहणं॥

राम

॥ घर ॥

॥ ३ ॥

सतेः॥ पुनर्दक्षिणग्रहणं यजमानस्य तत्रासनप्राप्त्यादित्यतद्दर्पमित्यदोषः॥ एवं च यजमानासनं कृ
ताञ्जावेसर्वत्राग्नेरुत्तरतः स्यात्॥ उत्तरत उपचार इति परिभाषणात्॥ तत्र पुनर्वचनं यथा पश्चादग्ने
स्तेजनीयं कटं वा दक्षिणपादेन प्रवृत्योपविशतीति तत्रैवोपवेशनं॥ पद्म॥ दर्शपूर्णमासविषया
परिभाषेयं वेदिस्पृगिति तस्माद्दक्षिणं वेद्यंतमधिस्पृशेवासीतेति स्मृतौ चोक्तत्वात्॥ तेनात्राप्राप्तिर्वै
घप्ताबाद्दक्षिणग्रहणमप्रवृविविधानार्थं॥ अतोपि यजमानोपवेशनमुत्तरत एव॥ अत्र चास्तरण
मात्रापदेशाच्चतुर्थ्यादिकर्मणि दक्षिणतो ब्रह्माणमुपवेश्योपविशेदुपवेशनविधानाच्च न ब्रह्मोपवेशनं मे
वं॥ अदृष्टार्थप्रसंगात्॥ न च दृष्टार्थकल्पना सनप्रकल्पनं कुर्यात्॥ ब्रह्मासनव्यपदेशानुपपत्तेश्च॥
तस्माद्ब्रह्मोपवेशनार्थमेवासनं॥ यच्च चतुर्थीकर्मण्युपवेशनमुक्तं तदुदपात्रस्थापनावसरविधा
नार्थं॥ तस्माद्ब्रह्मोपवेशनं भवत्येव॥ यदा ब्रह्मा न भवति तदा कौशः कार्य इति हरिहरः॥ तन्मूलं छं
दोगगृह्ये स्ति॥ ॥प्रणीय॥ ॥प्रणयनं चापां सर्वार्थप्रदेशांतरे दृष्टं तद्वदत्रापि कार्यं॥ ❀ ॥

।परिस्तीर्य॥ अग्नेर्दर्भैः प्रदक्षिणं परिस्तरणं कृत्वा॥ ॥अर्घ्यवदासाद्य॥ ॥अर्घ्यः प्रयोजनं अग्नेरु
त्तरतः पश्चाद्वा द्वंद्वं प्रयोजनवंति पात्राण्यासादनं कार्यं क्रमेणमुख्यक्रमानुग्रहात्॥ पश्चाद्वेत्या
कंसंस्थानामुदगग्राणां प्रागग्राण्यासादनं॥ उत्तरत उदक्संस्थानां प्रागग्राण्युदगग्राणि वासा
दनं। कारिकायां॥ पश्चादुत्तरतो वास्यात्पात्रासादनमग्नितः। उत्तरे स्वेदुदक्संस्थं प्राक्संस्थं पश्चिमे न्यवे
त्। एतद्विविपुलस्थानसंभवे। असंभवे तु कात्यायनेनोक्तं। प्राक्च प्राक्च मुदगग्नेरुदगग्रं समीपत इति
देवयाज्ञिकाः॥ ॥पवित्रे कृत्वा॥ ॥कौशौ समे अप्रच्छिन्नाग्रौ प्रादेशमात्रे अनंतर्गर्भे कुशौष्धिं घादि
र्ध्यः॥ ॥प्रोक्षणीः संस्कृत्य॥ ॥प्रादेशमात्रवारणपात्रे प्रणीतोदकमासिच्य पवित्राभ्यामुत्पूय
सव्यहस्ते तमात्रं कृत्वा दक्षिणेनोद्धूनपने प्रणीतोदकेन तत्प्रोक्षणं कुर्यात्॥ ततस्तस्मिन्पवित्रं नि
धानं॥ ॥अर्घ्यवत्प्रोक्ष्य॥ ॥तंडुलेनयथासादितानां पात्राणां प्रसेकं प्रोक्षणं॥ ॥निरूप्यानं
॥ ॥ओपयिकासादितो अस्य स्थाल्यां प्रक्षेपः॥ चरुश्चेद्यत्तंडुलानां स्वस्थाल्यामावापः॥ ॥०॥

राम

॥गृधर॥

॥४॥

ग्रयिष्मित॥ ॥तदाज्यमग्नौस्थापयेत्॥चरुश्चेदन्नावसरे आज्यादुत्तरतोग्नावधिश्रयणं॥ ॥पर्य
ग्निकुर्यात्॥ ॥अग्नेरुल्मुकं गृहीत्वा आज्यस्य परितो भ्रामयेत्॥चरुश्चेत्तमपि पर्यग्निकुर्यात्॥उ
पल्लवनार्थत्वादाज्यस्य॥ ॥एवं प्रतप्य समस्ताभ्युक्ष्य पुनः प्रतप्य निदध्यात्॥ ॥अग्नेरेवं ता
पयित्वा दर्भैः समस्य प्रणीतोदकेनाभ्युक्ष्य पुनस्तापयित्वा निदध्यात्॥एवं स्रुवस्यापि संस्कारो होमार्थः॥एवं
च दर्व्यापि तत्संस्कारस्य॥अतः संस्कारविस्मरणे प्रायश्चित्तपूर्वकं प्रागन्त्यहोमात्कार्यः॥ऊर्ध्वं तु प्रा
यश्चित्तमात्रं प्रोक्षणमुदकेनाभ्युक्षणमिति गर्गः॥ ॥आज्यमुद्वास्योत्पूयावेक्ष्य॥ ॥अग्नेः सका
शादाज्यमुत्तरत उद्वास्य पवित्राभ्यामुत्पूय तदाज्यमवलोक्य॥चरुश्चेदाज्योद्वासनोत्तरं तस्योद्वासनं
तत्रैवं॥अग्नेः सकाशादाज्यं गृहीत्वा चरोः पूर्वेण नीत्वाग्नेरुत्तरतो निधानं॥ततश्चरुमाज्याज्यस्य
पश्चिमतो नीत्वा आज्यादुत्तरतो निधानं॥हविषां च यथापूर्वमित्युक्तेः॥ ॥प्रोक्षणीश्च पूर्ववत्॥ ॥
एवं वदिति पवित्राभ्यां प्रोक्षणीरुत्पूय तास्वेव पवित्रनिधानं॥चरुश्चाज्यादाज्यमपि पूर्ववदेव॥अतः

एवमेव सर्वहविषां २

पवित्रान्योस्यात् ॥ प्रोक्षणीसंस्कारोयं पर्युक्षणेपि च ॥ ॥उपयमनान्कुशानादायसमिधोभ्याधाय
पर्युक्ष्य जुहुयात् ॥ ॥उपयमनान्कुशानाहीला उपगृह्य तिष्ठन्नु तिस्रः समिधोग्नावभ्याधायशक्ति
प्यप्रोक्षणेपुदके नाग्निप्रदक्षिणं परिषिंच्य स्रुवेण वक्ष्यमाणं होमं कुर्यात् । तिष्ठन्समिधः सर्वत्रेत्व
क्रेरत्र तिष्ठता समिदाधानं ॥ समिल्लक्षणं वक्ष्यमर्थसारे । पलाशखदिराश्वत्थौदुंबरजाः समि
त् ॥ अपामार्गार्कदूर्वाश्च कुशाश्चेत्यपरे विदुः ॥ सत्वचः समिधः कार्या ऋज्व्यः श्लक्ष्णाः समास्तथा । शास्ता
दशांगुलास्तास्तु द्वादशांगुलिकास्तथा ॥ आर्द्राः पक्वाः समच्छेदास्तर्जन्यंगुलिवर्तुलाः ॥ अपाटिताः
श्चाद्विशाखाः क्रिमिदोषविवर्जिताः ॥ ईदृशा होमयेत्प्राज्ञः प्राप्नोति विपुलां श्रियमिति ॥ यद्वा ॥ स
मित्पवित्रं वेदस्त्रयः प्रादेशसंमिताः ॥ इध्मस्त्रिगुणः कार्यस्त्रिगुणः परिधिः स्मृतः ॥ ॥एष
एव विधिर्यत्र क्वचिद्धोमः ॥ ॥यत्र क्वचिद्धोमः शांतिकपौष्टिकादिष्वपि एष एव विधिः स्यात् ॥
एवकारो मंत्रप्रतिषेधार्थः ॥ गृह्याग्निव्यतिरेकेणापि यस्यायं विधिः स्यादित्येवमर्थः क्वचिच्छब्दः ॥

राम

॥घर॥

२२५॥

एकसाध्येष्ववर्हिमुनस्यास्तरिसमूहनं नोद्गासादनं चैव क्षिप्रहोमादितेमत्ता इति यथादावा

ग्निमुपसमाधाय घृतान्नानि कुर्वीत्वानि जुहुयादित्यादौ इति श्रीत्रिरग्निचित्सम्राट्स्थपतिश्री

महायाज्ञिकवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये प्रथमकांडे प्रथमकंडिका १ आवस

थ्याधानं दारकाले आवसथ्यं गृहं तत्रस्थोऽग्निरावसथ्य इत्युच्यते तस्याधानं स्थापनं आत्मसा

त्करणं आत्मनिष्ठफलसाधनकर्मानुष्ठानसंपादकसंस्कारविशिष्टत्वेन संपादनमिति यावत्

तद्दारकाले भवति दारकालशब्देन पाणिग्रहणं क्रियाउच्यते चतुर्थ्युत्तरकालो दारकाल

इति संप्रदायः पित्रा प्रत्तामादाय गृहीत्वा निष्क्रामतीत्येष दारकाल इति भर्तृयज्ञभाष्ये एके

षामाचार्याणां मते दायाद्यकाले अग्न्याधानं भवति पैतृकद्रव्यस्य भ्रातृभिः सह रिक्थवि

भागकालो दायाद्यकालः तस्मिन्काले स्वेन द्रव्येण कर्मानुष्ठानसमर्थो भवति साधारणद्रव्यस्य परि

[..]सामर्थ्यो दशाधिकार एव अतो व्यवस्था भ्रातृमतो दायाद्यकाले अभ्रातृकस्य दारकाले अवि
[..]कस्यापि विवाहकालेपि आधानेधिकार इति मदनपारिजाते आश्वलायनादीनां वैवाहिकोऽग्निरेवो
[..]पासनाग्निर्दिष्टः अत्र शांखायनगृह्येतु अभिसमावर्त्स्यमानोयत्रांत्यांसमिधमभ्यादध्यात्तमग्निमिं
धीत वैवाह्यं वा दायाद्यकाले एके प्रेते वा गृहपतौ स्वयं ज्यायान्वैशाख्याममावास्यायामन्यस्यां वाका
मतोनक्षत्रे एके इति अत्र छंदोगगृह्ये विशेषः भूर्भुवः स्वरित्यभिमुखमग्निं प्रणयंति प्रेते वा गृ
हपतौ परमेष्ठिकरणं तथा तिथिनक्षत्रसमवाये दर्शे वा पौर्णमासे वाऽग्निसमाधानं कुर्वीतेति
अत्र कारिकायां विशेषः अपि वैवाहिको येन न गृहीतः प्रमादतः पितुर्युपरते तेन गृहीतव्यः
प्रयत्नतः स्नातदारो न तिष्ठेत्क्षणमप्यग्निना विना तिष्ठन्भवेद्द्विजो व्रात्यस्तथा च पतितो भवेत् ।
पितृपाकोपजीवी स्यात् भ्रातृपाकोपजीवकः स्नानाध्ययननिष्ठो वा न दुष्येताग्नि
[..]ना विना यथा संध्या यथा स्नानं वेदस्याध्ययनं यथा तथैवो श्रीरामजयरामजयजयराम

धर
७

पासनं श्रौतं कर्म स्थितिस्तच्छिद्रयोगतः ॥ योग्निं स्मार्त्तमनादृत्य कर्मस्नानजपादिकं ॥ होमन्त्रमाचरे
द्विप्रो न स शुध्येत न युज्यते ॥ यो दद्यात्कांचनं मेरुं पृथिवीं वससागरां ॥ तत्सायं प्रातर्होमस्य न तुल्यं भ
वति वा न वा ॥ यो गृही वा विवाहाग्निं गृह्यं स्वं इति मन्यते ॥ अन्नं तस्य न भोक्तव्यं वृथापाको हि स स्मृ
तः ॥ वृथापाकस्य भुंजानः प्रायश्चित्तं समाचरेत् ॥ प्राणायामत्रयं कृत्वा घृतं प्राश्य विशुध्यति ॥
तथा ॥ कालद्वयेपि वै होमं नाधानं तु कृतं पुरा ॥ सकृत्वा व्यतमं कृछ्रमग्निमध्याहरेत्ततः ॥ एत
दाधानं गृहपतौ मृते एकादशाहे वा द्वादशाहे वा कार्यं ॥ तदुक्तं रेणुकदीक्षितैः ॥ एतद्गृहपतौ प्रेते कुर्या

८

देकादशेहनि ॥ प्रागेवैकादशा[illegible]च्छिद्रश्राद्धविवर्जितं ॥ एवं ज्येष्ठः समा[illegible]दध्यात्कनीयांश्च वि
वर्जयेत् ॥ एकादशे किं कुर्वीत द्वादशे वा विचक्षणः ॥ अग्न्याधिकारे न कुर्वीत मन्येवास्तंगते गुरौ ॥ तथा
हलत्वं[illegible]आधानं तु पुनराधाने न कुर्यात्सिंहगे रवौ ॥ कालातिक्रमे तु प्रायश्चित्तमुक्तं ॥ यावंत्यब्दा
न्यतीतानि निरग्नेर्विप्रजन्मनः ॥ तावंति कृच्छ्राणि चरेद्धोमं दद्याद्यथाविधि ॥ कृतदारो गृहे ज्येष्ठो यो ना

दध्यादुपासनं॥ चांद्रायणं चरेद्वर्षं प्रतिमासमहोपि वेति॥ कालप्रसंगान्मुहूर्त्तविचारोऽत्र क्रियते
॥तत्र कारिकायां॥ माघादिपंचमासेषु श्रावणे चाश्विने यथा॥ कुर्यान्मृगोत्तमांगे वाग्न्याधानं शुक्लपक्ष
तः॥ मृगोत्तमांगो मार्गशीर्षः॥ हस्तद्वये विशाखास्वातौ रोहिणिकादित्रये तथा॥ पुनर्वसुद्वये तद्वद्रेवतीषूत्त
रासु च॥ सौमार्कवर्जिते वारे नाधिमासे क्षये तथा॥ वेदेऽनुकूले पूर्वाह्णे रिक्ताविष्टिविवर्जिते॥ चतुर्थ्य
नवमी चतुर्दश्यो रिक्ताः॥ सवैधृतिश्च व्यतीपातनामा सर्वोऽपि निंद्यः परिघस्य चार्द्धं॥ विष्कंभे घटि
कास्तिस्रो नव व्याघातवज्रयोः॥ गंडातिगंडयोः षड्च्छूले तु पंच नश्यंति नाः॥ महेश्वरः॥ चूडाकर्म
नृपाभिषेकनिलयाग्न्याधानपाणिग्रहान्देवस्थापनमौंजिबंधनविधीन्कुर्यान्नयाम्यायने॥
देवेज्यास्तजितोस्तपास्तमितयोर्बाल्ये च वार्द्धे तयोः केतावभ्युदिते तथा ग्रहणतो यावत्तिथिस्त्री
ष्टमी॥ देवेज्यो गुरुः॥ अस्तजिच्छुक्रः॥ केतुनिर्घातभूकंपविद्युत्पातानि तद्दर्शने॥ अग्न्याधानं नाहिक
त्वं सुधियास्तुत्रमिष्ट ताप त्रिमासांदि द्विसितो बालः स्याद्दशवासरान्॥ वृद्धः पंचदि

ग्रहारंभ

राम

॥धरा॥
॥७॥

७

॥न्येष्वां त्रिदिनं पक्षमेव च॥ द्विस्त्रुवक्षोजीवसितावुन्नयत्रापुदारितौ॥ अन्यैः पंचदशाहानि दशान्यैः सप्तचाप
रैः॥ उपरागनिवृत्तौ च यावत्सप्तदिनसप्तकं॥ अगम्याधेयं विवाहादि मंगलं न समाचरेत्॥ रत्नमालायां॥ रा
शौ विलग्ने बुधे रे घटे वा तदंशके वाप्यथवा दृक्काणे॥ गर्भाधानकाले द्विजपुंगवानां जातोऽपि निर्वाणमुपैति
वह्निः॥ विलग्नं लग्नपर्यायः॥ अंबुचरे कर्के मीने मकरोत्तरार्द्धे च॥ मेषकर्कटतुलामकराश्चरलग्ना
नि घटे कुंभलग्ने॥ तदंशके चरांशौ कुंभांशे च॥ दृक्काणे चं द्रेश्चरण शीर्षे कुंभराशौ स्थिते तदंशस्थिते चेत्य
र्थः॥ त्रिकोणकेंद्रोपचयेषु सूर्ये बृहस्पतौ शीतकरे कुजे च॥ शेषग्रहेषूपचयस्थितेषु धर्मध्वजोत्पादनमामनंति॥
॥ त्रिकोणं नवपंचकं॥ लग्नसप्तमदशमचतुर्थं च केंद्रं॥ तृतीयषष्ठदशमैकादशमुपचयः॥ कुजो मंगलः॥
॥द्रेपलीमृतुगे मृतुमेति द्विप्रं वधोधायकः श्मासु तेच॥ ज्ञानाः सनैदेवक्षस्यैरवैवारोगेर्जुष्टो दुःखितः स्या
तंद्रः॥ नोकुर्यात्कुतनुकपरिग्रहमिनं द्वाप्रजावेदुर्मिनी च स्थैर्विजितैरिपोर्भवनगैरस्तंगतैर्वा द्विजाः॥

त्या

पापग्रहेषु

दिनकरे वास्यात्तदा दीक्षितः॥ पापग्रहेषु
...स्थितनुगे गुरौ क्रियगते सत्यांबरस्थे कुजे जातां चौत्रिषडायगे दिनकरे वास्यात्तदा दीक्षितः॥ पापग्रहेषु
...गेषु धनेन हीनः सौम्यग्रहेषु धनवान् ॥ उडुपेन्द्रदः स्यात् ॥ लग्नस्थिते च स बुधार्क जन्मा गीर्वेदवित्स्या
देतोग्निरचिरात्खलु नाशमेति॥ चापे धनुराशिस्थिते॥ तनुगे लग्नस्थे क्रियगते मेषराशिस्थिते॥ त्र
बरस्थे दशमस्थे। आयगे एकादशस्थे। कन्यायां मिथुने च मंगलः शतमास्थे॥ कन्यामिथुनतुलावृषेषु बृह
स्पतिः शत्रुगृहस्थाः। रविमंगौ शनैश्चराः पापग्रहाः क्षीणचंद्रश्चाधनगेषु द्वितीयस्थेषु॥ ॥अथाधिका
रीनिरूप्यते॥ ॥ब्राह्मणाः क्षत्रिया वैश्याः शूद्रं हित्वानुलोमजाः॥ अधिकुर्वति गार्हस्थ्यसहस्रार्चास्त्रि
यस्तथा॥ मासोर्ध्वं स्त्री प्रसूर्या स्यात्तु असद्दिनविंशतेः॥ रजस्तु परतस्त्नानदिनादूर्ध्वं रजस्वला॥ नाधिकारोस्ति
सर्वेषां सूतके मृतके तु च॥ तथैव पतितानां च तथा दोषयुजामपि॥ अभ्याधाने धिकारोस्ति रथकारस्य चो
त्तरे। माहिष्ये एकरणं पतु रथकारः प्रजायते॥ वैश्यायां क्षत्रियाज्जातो माहिष्यो मुनिभिः स्मृतः॥ जातो वैश्यप
च शूद्रायां करण्यां स्मिन्निधीयते॥ वेदाध्ययनसंपन्नः प्रयोगेन स्मृते न च॥ अधिकं ॥ ॥ ॥ ॥

ताॅ५

८

राम
मोज

॥धर॥
॥८॥

अकृतेया

वंतिसर्वत्रयज्ञार्थे अवर्णो विना॥ यज्ञाध्ययनवेदार्थविज्ञानरहितोपि सन्॥ नाधिकारी क्रियास्वन्यो
न्त्ययज्ञादि शासनात्॥ द्रविडस्त्वन्यथा प्राह सर्वस्यान्येष्वधिक्रियां। अथवा अंधइवेत्थं ज्ञानेदृक् सर्वसंम
तः। नार्याः संतीह यावन्त्यस्तासिः सर्वाभिरन्वितः॥ यथा सवर्णया ज्येष्ठभार्ययैव समन्वितः॥ व्यभिचारव
तीया पारोगिण्या द्वेषिण्या वया॥ आधाने सा परित्याज्या न वा त्याज्या मतांतरात्॥ तुल्याधिकार उभयोर्य
त्र पार्श्वे निरूपणात्॥ अतरस्त्वन्यतराभावे नाधिकारोस्ति कुत्रचित्॥ ॥ अथानधिकारिणः॥ ॥ आ
वसथ्यं विवाहं च प्रयोगप्रथमे स्थितः॥ न कुर्यादनुजः नके ज्येष्ठे सोदरे वा प्रकुर्वति। क्षेत्रजादावनीज्ञाने विद्य
मानेपि सोदरे॥ नाधिकारविघातोस्ति त्रिषु दोषोपि चौरसे॥ एवं धम्मूकबधिरपतितोन्माददूषणः स
न्यस्तेपि छिन्नकर्णे दोषो यज्ञार्थं दादि दूषणे॥ जनके सोदरे ज्येष्ठे कुर्याद्देवेतरः क्रियां। ज्येष्ठे अशाविहीने च
सत्याधेयं तदाज्ञया॥ पितृस्नवप्यनुज्ञातो नादधीत कदाचन॥ जीवत्सितरि वादध्यादाहिताग्निः स वै
यदि। तथैव भ्रातरि ज्येष्ठेपजे नैव विवाहयेत्॥ अनाहिताग्नेपि पितरि योग्याधानं करोति हि॥ अदरणे पार

।मारोप्यतमाधाप्यादधीतसः॥ उद्वाहं चाग्निसंयोगं कुरुते योग्रजे स्थिते। परिवेत्ता स विज्ञेयः परिवित्ति
स्तु पूर्वजः॥ परिवित्तिः परिवेत्ता नरकं गछतो ध्रुवं॥ अपिचीर्णप्रायश्चित्तौ पादोनफलभागिनौ॥ पितृ
व्यपुत्रियो सपत्नः परनारीसुतोपि वा॥ दत्तकाद्याः परनारीसुताः। विवाहे वाग्निसंयोगेन दोषः परिवे
दने॥ देशांतरस्थ क्लीबैकवृषणानसहोदरान्। वेश्यानिष्ठांश्च पतितान् शूद्रतुल्यातिरोगिणः॥
जडमूकांधबधिरकुब्जवामनखंजकान्॥ अतिवृद्धानभार्यांश्च कृषिसक्तान्नृपस्य च॥ धनवृद्धि
प्रसक्तांश्च कामतोकारिणस्तथा॥ कुटिलोन्मादरोगांश्च परिविंदन्न दुष्यति॥ गीतवादित्रनिरतान्
तिकान्पारदारिकान्॥ वशिकानृगारुडांश्चैव परिविंदन्न दुष्यति॥ योगशास्त्राभियुक्ते च द्विजे प्रव्रजि
ते तथा॥ नास्ति केचाग्निसंयोगेन दोषः परिवेदने॥ पितापितामहो यस्य अग्रजो वाप्यनग्निमान्॥ इष्टा
त पोग्निसंयोगेन दोषः परिवेदने। परिवादनवाक्ये येश्रूयते दोषसंयुताः॥ तेषामप्यधिकारोस्ति प्रा
यश्चित्तादनंतरं। पितापितामहो वापि नास्ति कोवाप्यनाश्रमी॥ यस्य दोषोस्ति नैवेहतस्याधानेक दा

राम

॥धर॥
१४॥

वन॥ अग्रजे सति निर्दुष्टे यवीयानग्निमान्भवेत्। प्रतिपर्वं भवेत्तस्य ब्रह्महत्या न संशयः॥ नाग्न
यः परिविंदंति न वेदा न तपांसि च। न च श्राद्धं कनिष्ठस्य विरूपाया च कन्यका॥ ज्येष्ठो भ्राता यदा तिष्ठेद
धानं नैव चाश्रयेत्॥ अनुज्ञातस्तु कुर्वीत शं खस्य वचनं यथा॥ ज्येष्ठभ्रात्रा त्वनुज्ञातः कुर्यादग्नि
परिग्रहं॥ अनुज्ञातोपि सन्निज्ञानादध्यान्मनुरब्रवीत्। धनवार्धुषिकं राजसेवकं कर्षकं तथा॥ प्रो
षितं च प्रतीक्षेत वर्षत्रयमपि त्वरन्॥ प्रोषितश्चेत्त्रिवर्षस्यादवादद्धुं समाचरेत्॥ आगते तु पुनस्तस्मि
न्पादकृच्छ्रद्वयं चरेत्॥ देशांतरस्थो न ज्येष्ठो ज्ञायते हितवानिति॥ कनीयानधिकारी वेदादधी
ता विचारयन्॥ द्वादशैव तु वर्षाणि ज्यायान् धर्मार्थयोगतः॥ न्याय्यः प्रतीक्षितो भ्राता श्रूयमाणः पु
नः पुनः॥ प्रोषितस्तु यदा ज्येष्ठो ज्ञायते नाहितानलः। षड्वत्सरान्प्रतीक्षेत आदधीतानुजस्तथापि तरि
पितन्नायैवादेशांतरगतेपि सन्॥ अधिकारविघातो हि न पुत्रस्यापजायते। सो दाराणां च सर्वेषां परि
वाकं पन्नवेत्॥ दारैस्तु परिविंद्यंते नाग्निहोत्रेण नेज्ययेति॥ आगम्याहरणीयं योनिमाह॥ ❀

श्यस्य बहुपशोर्गृहादग्निमाहृत्य चातुष्प्राश्यपचनवत्सर्वमरणिप्रदानमेके पंचमहायज्ञा इतिश्रु
तेः॥ पशुभिः समृद्धस्य वैश्यस्य गृहादग्निं हुतोच्छिष्टं असंस्कृतो वा अग्न्याधानं कुर्यात्॥ एके अ
रणिप्रदानं। अरण्युपादानकमिच्छंति॥ अथ मर्थः। प्रशब्दो त्व उपशब्दार्थे अरणिप्रदानं/उपादानका
रणं उत्पत्तिस्थानं यस्याग्नेः सोरणिप्रदानस्तमग्निमादधीतेति मन्यते॥ अतो विकल्पः॥ अं शांखा
यनगृह्ये॥ बहुपशुविट्कुलाद्वरीषबहुयाजिनामन्यतमंतस्मादग्निमिंधीतेति॥ छंदोगगृह्ये
वैश्यकुलाद्वांबरीषाद्वाग्निमाहृत्याभ्यादध्यादपि वा बहुयाजिन एवागाराद्ब्राह्मणस्य वा राज
न्यस्य वा वैश्यस्य वापि वा अन्यं मथित्वाभ्यादध्यात्पुण्यस्तेनर्धुकोन्न वंतीति यः कामयेत तपा
कुर्यात्स एवास्य गृह्योग्निर्भवतीति॥ त्यागगृह्यांतरछंदोगभाष्ये॥ ब्राह्मणएकुलान्नुब्रह्मवर्चसका
मोग्निमाहृत्यादधीत राजन्याद्दोजोवीर्यकामो वैश्यात्पुष्टिकामो बरीषात् धनधान्यकाम अग्रा
हरणोपमुरु पुण्यको शकामइति॥ पुनराधाने अग्न्यनुगमने च अग्न्याधाने यायोनिरंगीकृता

४ बा

अ४

राम

गधरा

॥१०॥

सैव भवति। तथा च छंदोगानां षष्ठ्ये शाखायां नरगृह्ये। पूर्वं वानुगते गृह्ये यो निःपुनराधेये चेति वैश्वप 28
हाग्न्याभावे शाखायां तरोक्तायायोनेरग्न्याहरणमिति हरिहरः॥ अस्मिन्नर्थे परितु वैश्वगृहाद्गन्याह
रणं वा एषोरिति पुक्तं॥ ननु वैश्वपानाभावे गृह्यांतरोक्तायायोनेराहरणं। गृह्यांतरयोन्यपेक्षायावरं ब्रवि
ल्पे ने गृह्योक्तायोनिग्रह्येति नमो हरिहरमिश्राः॥ यस्मिन्पक्षे वैश्वपगृहाद्गन्याहरणं तस्मिन्पक्षे
यावज्जीवं वैश्वपसंनिधौ निवासः। अतोग्नौ वैश्वपकुलाहाहल्प सर्वे प्रायश्चित्तं कृत्वा नेन विधिना याव
ज्जीवं वर्तयेदिति गर्गपद्धतौ॥ ॥ चातुर्मास्यपञ्चनवत्सर्वमिति॥ चातुर्मास्यप्रवर्तनं यस्मिन्कर्मणि
विद्यते तद्दिनापि सर्वं भवति। कुतः पंचमहायज्ञा इति श्रुतेः॥ पंचमहायज्ञानां श्रुतौ पाठस्तत्साध
नत्वेतोयमग्निरतस्तद्विनापि सर्वं भवतीति पूर्वः पक्षः॥ सिद्धांतस्तु। तत्सूत्रं। चातुर्मास्यपच
नवतीति कर्तव्यता न भवतीति यत्कारणं॥ उपदेशातिदेशयोरन्यतरेण धर्माणां प्रवृत्तिः॥
नात्रोपदेशो नचातिदेशः तस्मान्नैनचातुर्मास्यपचनवतीति कर्तव्यता प्रवर्तते॥ ननु तर्हि किम

र्थमिदमुक्तं ॥ आधानसामान्याद्गृह्यश्रौतानां पंचमहायज्ञानां साधनत्वेन तत्वाद्गृह्यश्रौताधानधर्मा-
स्तुरिति बुद्धिः स्यात्तां निराकर्त्तुमिदमुक्तमित्मरोषः ॥ गृह्यांतरेष्वानये वच्चांताश्रौताधानेति वक्त-
व्यता उक्तास्ति तां निवारयितुमिह सूत्रकृता पूर्वः पक्षः कृतः ॥ अरणिलक्षणं चोक्तं ॥ पत्रपार्श्वसंग्र-
हकारिकायां ॥ अश्वत्थो यः शमीगर्भः प्रशस्तोर्वीसमुद्भवः ॥ तस्य या प्राङ्मुखी शाखा उदीची
चोर्ध्वगापि वा ॥ १ ॥ अरणिस्तन्मयी ज्ञेया तन्मय्येवोत्तरारणिः ॥ सारवद्दारवं चात्र मोविलीव
प्रशस्यते ॥ २ ॥ संसक्तमूलो यः शम्याः स शमीगर्भ उच्यते ॥ अलाभे त्वशमीगर्भाद्धरेदवि-
लंबितः ॥ ३ ॥ चतुर्विंशत्यंगुला दीर्घा विस्तरेण षडंगुला ॥ चतुरंगुलमुत्सेधा अरणिर्याज्ञिकैः
स्मृता ॥ ४ ॥ मूलादष्टांगुलं त्यक्त्वाग्रग्राच्च द्वादशांगुलं ॥ अंतरं देवयोनिः स्यात्तत्र मंथ्यो हुता-
शनः ॥ ५ ॥ मूर्धाक्षिकर्णवक्त्राणि कंधरा चापि पंचमी ॥ अंगुष्ठमात्राण्येतानि द्व्यंगुलं वक्ष उच्यते
॥ ६ ॥ अंगुलमात्रं हृदयं त्र्यंगुष्ठमुदरं तथा ॥ एकांगुष्ठा कटिर्ज्ञेया द्वौ वस्ती द्वौ च गुह्यकं ॥ ७ ॥ ऊरू

स्थ

राम

॥ घर ॥
२९१॥

मं

जंघे च पादोच्चतुस्त्रिकैर्यथाक्रमं ॥ ग्रवणमवपवाद्येते याज्ञिकैः परिकीर्त्तिताः ॥८॥ यत्तु त्वमि
ति प्रोक्तं देवयोनिः स उच्यते। तस्यां योजायते वाक्तैः सकल्याणक उच्यते ॥९॥ प्रथमे मंडपे न्द्वे षनि
यमो नेतरेषु वाग्रपां गुलः प्र मण्डः स्याच्चा चंस्या द्वादशांगुलं ॥१०॥ विल्लीवादच्चोवस्यादेतन्मंप
नपंचकं ॥ गोवाल्लैः त्राणं सामिश्रैः स्त्रि वद्धत्तमनंमुकं ॥११॥ व्याम प्रमाणेनैचंस्यात्तेन मण्व्याहुता
त्रानेः ॥ चा त्रबुद्धे प्रमंपाग्रेगा दंकत्वा विच्चद्दणः ॥१२॥ बहुदिने मंडपे नेन प्रमंडपना द्वोतत्रैवोक्तं ॥
उत्तरायाग्नेत्रा वाद्विग्ना सोमंपो धरारणेः ॥ व्याख्यातं कैस्त्रिदेवं तन्निर्म्मल्लवाद्युपेद्यते ॥१३॥ मान
प्रकारो परत्र पार्श्वे ॥ त्रिरश्रद्धः कर्णमास्य प्रथमें त्रोप्रकीर्त्तितं ॥ द्वितीयेके धरावच्चोत्तीये स्तुदरेस्म
तं ॥१॥ चतुर्थे चैव योनिः स्याहृतुर्दंद्वंच पंचमे ॥ षष्ठे जंघेत पापादो प्रणिचारणिरंगतः ॥२॥ यदि मं
पे छिद्रस्याग्निं त्रिरो रोगैः प्रमीयते ॥ यजमानस्तस्याकंठ त्वसे चैरविज्ञोषतः ॥३॥ मंडपे घोपजमान
स्तो पद्महीनोन्नवे ध्रुवं ॥ यो मंडपत्पादरेकत्तो द्रुधयाम्रियतेतु सः ॥४॥ देवयोन्यां तु यो मंडपे देवसिद्धिः

३०२

प्रजायते। मंथेहृस्वद्वयेयस्तु राक्षसं कर्मतस्य तत्॥५॥ जंघापायात्पृथानेच्चः पादयोः स्यात्पिशाचके॥
प्रथमे मंथने ज्ञेयं द्वितीयादौन शोधयेत्॥६॥ अष्टांगुलः प्रमंथः स्याद्दीर्घो द्व्यंगुलविस्तृतः॥ उ
त्सेधो द्व्यंगुलस्तस्य त्वेवा नम्रवंक्रध्वगः॥ एवमष्टादशाप्रोक्ताः प्रमंथास्युत्तरारणेः॥८॥ पादोत
स्याः स्मृतं मूलं अग्रस्तु शिरउच्यते॥ अधपुंमाश्रुरवो मंथे तत्स्मादिधोरणाहि सा॥ अत्रोबली
यजमाने नधत्वा गार्हंच मंथयेत्॥ मथ्यापत्नीयजमानपत्नी यदा कश्चिद्देवो द्विजः॥१०॥ मूलाद
ष्टांगुलं त्यक्त्वा अग्राच्चद्वादशांगुलं॥ अंतरादेवयोनिः स्यात्तत्र मथ्याहुताशनः॥११॥ मूला
दंगुलमुत्सृज्य अग्रात्सार्द्धांगुलं तथा॥ योनिमध्ये पुनर्मानं कृत्वा मथ्यो हुताशनः॥१२॥ ना
न्यवृक्षेण मथ्यीयात्र कुर्याद्योनिसंकरं। क्लेदितास्फाटिता चैव सुषिराग्रेऽपि मस्तका॥१३॥ चतुर्वि
धारणिस्त्याज्या श्रेयस्कामैर्द्विजातिभिः॥ क्लेदिता हरते पुत्रान्स्फाटिता शोकमाहरेत्॥१४॥ अ
पि मूर्द्धा हरे[illegible]नीं सुषिरामतिमारिणी॥ ॥ इति श्रौतस्मार्ताग्न्याधाने अरणिलक्षणं॥ ॥

राम

॥ अग्न्यर ॥

॥१२॥

इतरेषु च संस्कारेषु अरणिर्वा दर्शांगुला ॥ मूलात्त्रिभागजननिस्वदर्घेनोत्तरारणिः । यदा जातारणि
पक्षे कुमाराग्नेः प्रसिद्धये ॥ निर्मायपंत्र विहितेपितासंस्थाप्य यत्नतः ॥ जाते कुमारे मथ्यापादग्निं य
थाविधि स्वयं ॥ आयुष्यहोमानजुहुयात्तस्मिन्नग्नौ समाहिते ततः । अन्नप्राशनं चौलं मौंजीबंधन
मेव च । व्रतादेशश्च कर्त्तव्यस्तस्मिन्नौपासनिकाः क्रियाः ॥ कुर्यादैवाहिको होमावन्हौ तस्मिन्समाहि
तः । शालाग्निकर्मत त्रैव कुर्यात्पंक्तिं च नैत्यिकीं ॥ नित्यहोमं पचयज्ञान्कुर्यात्तस्मिन्नाहितः ॥
स्मार्त्तसंस्कारादिकं पश्चात्तत्सर्वं तत्र गघत इति । जातारणिपक्षस्तु युगांतरे भवति । न कलौ ॥ प्रजापि
तृद्विजाग्न्याणां प्रजारणिपरिग्रह इति कलिवर्ज्यत्वात ॥ दानवाचनान्वारंभणवरवरणव्रतप्रम
ाणेषु यजमानं प्रतीयादिति परिभाषितत्वात् ॥ याजमानमंगुलादिमानं ग्राह्यं ॥ अंगुलप्रमाणं गुलि
मानं तु यत्र यत्रोपदिश्यते ॥ तत्र तत्र बृहत्पर्वग्रंथिभिर्मिनुयात्सदेति छंदोगपरिशिष्टं ॥ बृहत्पर्वा
णि मध्यपर्वाणि तन्मूलं ग्रंथयो यत्रांगुष्ठे नोदनात ओ गुष्ठस्य ॥ अंगुलिनोद[illegible]नाया मंगुली

नाध्वंदोगानांस्वपरिशिष्टोक्तत्वात॥ अंगुष्ठैररत्निमानं॥ वाजिनांतुयज्ञपार्श्वादंगुलैरिति॥ स्रु
त्रौ तु पदोस्ता यजमानेनोर्ध्वबाहुः प्रपदोच्छ्रितेन समस्थितेन वेति॥ पंचारत्निर्दशावितस्तिर्वि ४
शति शतांगुलः पुरुष इति सूत्रात् पुरुषस्य पंचमांशोरत्निस्तच्चतुर्विंशांगुलमिति॥ मवाजपेयि
त्रिराधानप्रकरणे उक्तं॥ ॥ अथ पात्रलक्षणमुच्यते॥ ॥ तत्र यज्ञपार्श्वे संग्रहकारिका
यां॥ खादिरोस्याकृतिर्वज्रोरत्निमात्रः प्रशस्यते॥ आसनं वृक्षणेः कार्यं वारणं वा विकंकतं॥ ह
स्तमात्रं चतुःस्रक्ति मूलेदंडसमन्वितं॥ द्विषडंगुलसंख्याको मूलदंडो विकंकतः॥ प्रस्तमात्रा
दकग्राही प्रणीता चमसोन्वितेन॥ वैकंकतं पाणिमात्रं प्रोक्षणीपात्रमुच्यते॥ हंसमुखप्रसेकं च ब
ग्विलं चतुरंगुलं॥ आज्यस्थाली तु कर्तव्या तैजसद्रव्यसंभवा॥ माहेयी वापि कर्तव्या नित्यं स
र्वाग्निकर्मसु॥ आज्यस्थाल्याः प्रमाणं तु यथाकामं तु कारयेत्॥ मन्मयोदुंबरी वापि चरुस्थाली
प्रशस्यते॥ तिर्यगूर्ध्वं समिन्मात्रं दृढा नातिबृहन्मुखी॥ कुलालचक्रघटितमासुरं मन्मयं स्मृ

राम

॥१३॥

नेतद्देवहस्तघटितं स्थाल्यादि खलु दैविकं ॥ पल्लवास्तकानि मुष्टेश्च संवेदर्भेवस्थेत पा ॥ दर्भसंख्यानवि
हिताविष्टरास्तरणेषु च ॥ अंगुष्ठपर्ववृत्तस्मारत्निमात्रः स्रुवो भवेत् ॥ पुष्करार्धं भवेत्स्रुवाते पिंडकार्धं
स्रुवस्तथा ॥ पिंडकार्धमुष्ट्यार्धमिति स्मृतः ॥ यावतान्नेन भोक्तुस्तु तृप्तिः पूर्णैव जायते ॥ तेवरार्धमतः कुर्या
त्पूर्णपात्रमिति स्थितिः ॥ यवैर्वा व्रीहिभिः पूर्णं शूर्पं तत्पूर्णपात्रकं ॥ वरोत्तिलक्षितं द्रव्यसार भूतं
तदुच्यते ॥ अष्टमुष्टिर्भवेत्किंचित्किंचिदष्टौ च पुष्कलं ॥ पुष्कलानि च चत्वारि पूर्णपात्रं विधीयते ॥
इत्याधानपात्राणि ॥ अन्यान्यपात्रे वलिख्यते ॥ शूर्पं त्वरत्निमात्रं स्याद्दैषिकं वैणवं तु वा लंबं त्वरत्नि
मात्रं स्यादुपलावदृषत्तथा ॥ विस्तारो दृषदः प्रोक्तो द्वादशांगुलसंख्यया ॥ पालाशं जानुमात्रं स्या
त्स्फ्युर्बुध्नमुलूखलं ॥ अधरवातं बहद्व त्र्यंम मध्ये रास्नासमन्वितं ॥ खादिरं मुसलं प्रोक्तमरत्नि त्र्य
संमितं ॥ प्रादेशमात्रं विज्ञेयं मेक्षणं तु विकंकतं ॥ वृत्तमंगुष्ठपर्वाग्रमवदानक्रियाक्षमं ॥ इडापात्रं भवे
द्वक्षं विशेषस्तमहं ब्रुवे ॥ वारणं पररत्निमात्रा स्यात्तुर्यांशाधिकपुष्करा ॥ हस्ताकाराश्च पष्पग्राग्रे ग्रे स

कं

पफणाकृतिः॥ आकर्षफलकं हस्तमात्रं स्याद्धनुराकृतिः॥ अग्रे सर्पफणाकारं खादिरं वा विकंकतं॥ कं
कृतानि त्रिदंतीनि वारणानि भवंति हि॥ वारणरत्निमात्रा स्याद्दंष्ट्रिः शासंदंशांगुलं॥ द्वात्रिंशदंगुला
त्राम्या वारणी तस्मिन्धीयते॥ अत्र पर्णानूपरि धीन्कुर्याद्बाहुमात्रान्पुष्करान्॥ अग्रपर्णी हस्तमात्रेव
अग्रपर्णी मूलमेव च। तच्छ्लेष्मस्य कस्यापि यज्ञियस्य तरोर्भवेत्॥ लोही वा मन्मयी वा स्यात्स्रुवश्च
यथार्थतः। लोही ताम्रमयी वापि कुर्याच्चैव यथार्थतः। पात्राणि वारणान्यत्र यानि प्रोक्तान्यसंभवे॥
वैकंकतानि कार्याणि सूत्रांतरमतादपि॥ अत्राचैव मुख्यं वक्तस्य यज्ञियस्य तरोरिह। यत्किंचित्स्यात्त्र
जातं तदिति चास्त्करसंमतिः॥ अश्वत्थस्यारणी ग्राह्या नान्यस्मादेव वृक्षतः॥ एवं सर्वेषु शास्त्रेषु
दृष्टास्तंत्रांतरेष्वपि॥ ॥ अन्वाधेयदेवताश्चः स्थालीपाके इंद्रपयित्वाद्य च्चाग्निविष्णुत्याहुतीर्भेहे
ति त्वन्नो अग्ने स त्वन्नो अग्न इमं मे वरुण तत्वा यामि ये ते शतमयाश्चाग्न उदुत्तमं न वेन्न इत्यष्टौ॥
॥ अथो तस्याग्न्याधेयस्य देवताः अग्निः पवमानोऽग्निः पावकोऽग्निश्शुचिरदितिश्चेति॥ आग्न्यः स्थ

राम
नर
मधुर
॥१४॥

लीपाकं श्रोदनं उक्तप्रकारेण श्रपयित्वा आज्यभागौ हुत्वा तन्त्रो अग्नय इमां घष्ट निराज्येनाहुतयोर्होतव्याः
। अत्र च रु व्रीहीणां भवति। कामादीनां नोन्यत्रापि व्रीहियवयोरेवान्यतरं स्थालीपाकं श्रपयेत्। न पूर्व
चोदितत्वात्संदेहोसंभवाद्विनिवृत्तिरिति सीतायज्ञेव द्रुमाणान्यापतत्॥ अथ मर्थः सूत्रस्य। कामादिष्व
या॥ अन्यत्र पक्वादिषु यागं कुर्वन् व्रीहियवयोरन्यतरं चरुं श्रपयेत्॥ नैवात्र संदेहः॥ व्रीहीन्यवान्वा हवि
षि पूर्वचोदितत्वात् उक्तत्वात्॥ यावस्य चरोरसंभवात विनिवृत्तिः पूर्वचोदितस्य व्रीहीन्यवान्वेत्यस्य॥
अनवस्त्राविताऽन्तरं तरुष्मपक्वे इष्टद सिद्धेत तंडुलपाके चरुशब्दः कामादीनां नोन्यनोपि व्रीहियवयोरे
वान्यतरं स्थालीपाकं श्रपयप्रसिद्धेः॥ आग्रयणेष्टौ व्रीहीणां यवानां चेति सूत्रेण च॥ व्रीहीन्य
वान्वा हविषीति परिभाषाणाद् अग्रपाकस्येत्येतावत्युक्ते पि व्रीहीणां यवानामग्रपाकस्येति सिद्धपति
किमर्थं व्रीहीणां यवानामिति ग्रहणं उच्यते॥ वैश्वदेवश्चरुर्विहितः सोपि यावीयथा स्यादिति यवा
नामित्युक्तं॥ व्रीहिग्रहणं तु यवानामेव नियमो माभूदिति॥ अतः सर्वत्र व्रीहीणामेव चरुः कार्य

इति गम्यते॥ अपयिलेति ग्रहणं स्विष्टकृतो रूपान्तरानिवृत्त्यर्थं॥ आघारावाज्यभागावित्यनेन प्राप्तत्वा
दनराज्यभागग्रहणं अष्टाज्याहुतीनां नवसरविधानार्थं॥ अष्टावितिग्रहणं मंत्रप्रतीकसंज्ञापनि
राकरणार्थं॥ यथासंख्याग्रहणं न क्रियते तर्हि त्वन्नो अग्ने नयेति द्वि अग्ने [illegible] त्वं क्षिपेत॥ तथा स
त्वन्नो अग्ने स ह स्वाहेति॥ त्वन्नो अग्न इति प्रथमा स त्वन्नो अग्न इति द्वितीया॥ इमं मे वरुणेति
तृतीया॥ तत्त्वायामीति च० चतेत्वात मिति पंच अयाश्चाग्न इति ष० उदुत्तममिति स० भवत न्न
इत्य०॥ ॥पुरस्तादेवमुपरिष्टात्स्थालीपाकस्याग्न्याधेयदेवताभ्यो हुत्वाज्यहोमेति॥ अग्न्याधेयदे
वताभ्य उक्तत्वाच्च॥ अग्न्याधेयदेवताभ्यो हुत्वेति वक्ष्यमाणत्वात॥ वाच्यं वा अग्न्याधेये हि विकल्पे
नद्वयोरपि देवतात्वमस्ति तयोर्देवतात्वमा क्षेत॥ किंतु बहुत्वविशिष्टानां मंत्रदेवतात्वं यथा स्या
दित्यदोषः॥ स्थालीपाकस्येत्यवयवषष्ठी॥ पुरस्तात्स्थालीपाकस्य स्थालीपाकात्पूर्वमष्ट च होमः॥
अग्न्याधेयदेवताभ्यो हुत्वा एवमुपरिष्टादष्ट चैव होमः॥ ॥स्विष्टकृते वा स्यापास्थाने वेषट्क

राम

॥धृ०॥
॥१४५॥

तं यज्ञकर्मणा मरीरिचं देवा गातुविद इति ॥ ॥ उपरितनीं ते अष्टौ होमांत स्थालीपाकस्याग्नये स्वि
ष्टकृते स्वाहेति आहुतिं जुहोति ॥ चत्वारो दारहोमेन अग्न्यायास्यग्न इति मंत्रेणाहुतिं जुहुयात् ॥ स्विष्टकृद्धो
मस्य प्राप्तत्वात् पुनर्ग्रहणं अयास्यग्न इति होमस्यावसरविधानार्थं ॥ ॥ मंत्रस्यायमर्थः ॥ हे [illegible] अग्ने
तु विदो पन्नवेत्तारो देवाः ॥ अग्नेः संवाधिय दक्षकृतं हुतं पतये न कर्मणा पञ्जनविधिना कृत्वा अग्ने हम
त्सरीरिचं आधिकं कृतवानस्मीति न कर्मणा प्रसन्नानां त्वं तां प्रसादान्त्वं दयासि अग्ने न स्वर मव्याल
तमस्त ॥ ॥ बर्हिर्हुत्वा प्राश्नाति ॥ ॥ परिस्तरणाबर्हिर्हस्तेनैव हुत्वा पात्रांतरस्थापित होमशेष
द्रव्यं च श्नयति । प्राश्नानस्य प्राप्तत्वात् ॥ बर्हिस्तोमोत्तरपिधानार्थं ग्रहणं ॥ शेषरक्षणं च भक्षणं
श्चौतसूत्रे उक्तमस्ति ॥ पाकयज्ञेष्वेव तस्यास्सर्वहोमो हुत्वा शेषप्राशनमिति ॥ अस्यार्थः ॥ पाकयज्ञावेन
वस्मात्र होमा उच्यंते ॥ तत्र होमार्थपदवत्तं गृहीनं तस्य अग्ना सर्वहोमः कर्त्तव्यः ॥ स्त्रुवादिनिर्यद्गृही
हुत्वा किंचित्परिशिष्य पात्रांतरे स्थापनमित्यर्थः ॥ सर्वहोमान्हुत्वा पात्रांतरे स्थापिते सर्वशेष

प्राशनं ।

प ॥ बर्हिर्होमस्यात्रैव वचनान्नान्यकर्मसु ॥ बर्हिर्होमे प्रजापतिर्देवता ॥ अनिरुक्तत्वात् ॥ तथा च श्रु-
ती ॥ अनिरुक्तो वै प्रजापतिरिति ॥ आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते ॥ मंत्रस्य देवता यास्य प्रजाप-
तिरिति स्मृतिरिति च्छंदोगपरिशिष्टकात्यायनोक्तेश्च ॥ ॥ ततो ब्राह्मणभोजनं ॥ ॥ तत इति सू-
त्रादेवं ज्ञायते मध्ये माज्येनं पवित्रप्रतिपत्तिः प्रणीताविमोको दक्षिणादानं च कृत्वा ब्राह्मणभोजनं ॥
एकद्विबहुषु समासस्य तु तुल्यत्वादेकस्मिन्नपि चरितार्थत्वादेकस्यैव भोजनमिति ॥ यत्र बहू-
नां भोजनं तत्र स्वयमेवोपदिशति ॥ एषा संस्थिते कर्मणि ब्राह्मणान्भोजयेदिति ॥ अत्र स्मृत्यंतरे रा-
नो त्रयोविंशति ब्राह्मणभोजनमिति हरिहरपद्धतौ ॥ चतुर्विंशद्भोजनमिति रेणुकदीक्षिताः ॥ य-
ज्ञपार्श्वे विशेषः ॥ गर्भाधानादिसंस्कारे ब्राह्मणान्भोजयेद्दश ॥ शतं विवाहसंस्कारे पंचाशन्मेखला-
विधौ ॥ आवसथ्ये त्रयस्त्रिंशदग्न्याधाने शतात्परं ॥ अष्टकं भोजयेत्कर्मांते तत्तत्संस्कारसिद्धये ॥ स-
हस्रं भोजयेत्सोमे ब्राह्मणानां शतं पशौ ॥ चातुर्मास्ये तु चत्वारि शतानि पंचसप्तागमेहे ॥ अयुते व

२

राम

॥ घर१ ॥

॥१६॥

जयेयेव त्सस्वमेधेन तद्गुणं॥ आग्न्यपणे प्रायश्चित्ते ब्राह्मणाननुद्दश पंच चेति॥ अत्रैवं व्यवस्था॥ यत्र त
तो ब्राह्मणभोजनसंभूतिस्तत्र मासिके तत्रैकं पूर्वं भोजयित्वा पश्चादर्धोक्तं ब्राह्मणभोजनं॥ यत्र विवाहा
दौ सूत्रं नास्ति तत्र कर्मांते परिशिष्टोक्तमेव भोजनं॥ ॥इति श्रीत्रि० संज्ञक बृहस्पति श्रीमन्नारायणश क
वामनात्मज श्रीहरिहर गदाधरकृते गृह्यसूत्रभाष्ये प्रथमकांडे द्वितीया कंडिका॥ २ ॥ आवस
थ्याधाने पदार्थक्रमः॥ ॥तच्च चतुर्थ्युत्तरकालेऽग्न्यात्मतः अग्न्यात्मतस्तद्धनविभागकाले॥ यदि प
तो प्रेते एकादशेऽहनि प्रागेवैकादशश्राद्धात् द्वादशेऽहनि वा मातृपूजाभ्युदयिकरहितं प्रोष्ठः कुर्या
त्॥ कालातिक्रमे तु प्रायश्चित्तं कृत्वा माघादिपंचमासेषु श्रावणे आश्विने वा कार्यो तत्र पूर्वं वपनं कृत्वा अ
तिक्रांतसंवत्सरसंख्यया प्राजापत्यरूपं प्रायश्चित्तं मुख्यविधिनाचरेत्॥ तदशक्तौ प्रतिप्राजापत्यं गोद
द्यात्॥ तदभावे तन्मूल्यं निष्कमेकमर्धं तदर्धं वा दद्यात्॥ तदभावे प्रतिप्राजापत्ये ब्राह्मणं ब्राह्मणभो
जनं॥ अयुतगायत्रीजपं गायत्र्या तिलाज्यसहस्रहोमं वा शक्त्यपेक्षया कुर्यात्॥ तत्रैवं संकल्पः॥ आधा

करणजनितदोषनाशार्थं वर्षसंख्याकाच्छ्रानहमाचरिष्ये ॥ अथवा प्राजापत्यप्रत्याम्नायत्वेन प्र
तिप्राजापत्यमेकैकां गां ब्राह्मणेभ्योहं संप्रददे। अथवा एतावतीनां गवां मूल्यमिदं संप्रददे। वा ब्राह्म
णान्भोजयिष्ये। एवमन्येपि संकल्पाः ॥ ततः सायंप्रातर्होमद्रव्यं प्रत्यहमाहुतिचतुष्टयपरिमितंत्र
तिकं तद्दिवसानां गणयित्वा ब्राह्मणेभ्यो दद्यात् ॥ तन्मानं कारिकायां। षष्टिप्रस्थमितं धान्यं त्रिप्र
स्थप्रमितं घृतमिति संवत्सरस्योक्तं। प्रसृतिद्वितयं मानं प्रस्थो मानं चतुष्टयमिति च ॥ तत्र संकल्पः
होमाकरणजनितप्रत्यवायपरिहारार्थं एतावद्वार्षिकं दधिपयस्तंडुलानामन्वातमं ब्राह्मणेभ्यो
हं संप्रददे ॥ तन्मूल्यं वा दद्यात् ॥ इतरस्य श्राद्धादिकर्मद्रव्यदान निवृत्तिः ॥ होमं दद्यादिति वचना
दिति रामवाजपेयिनः ॥ हरिहरस्य ॥ गंगाधरस्तु सायंप्रातर्होमपक्षादिकर्म पिंडपितृयज्ञानुसंधा
नार्थं साधनच्युतं होमद्रव्यमिति लिखितवान् ॥ ततो यथोक्तकाले पूर्ववद्वैश्वदेवं कृत्वा गणपति
पूजयित्वा पुण्याहवाचनं कुर्यात् ॥ तत्र कर्तव्यं तदुच्यते ॥ व्यासः ॥ संपूज्य गंधमाल्याद्यैर्ब्राह्म

राम

॥ धर ॥
॥१७॥

णं नु स्वस्तिवाचयेत्। धर्मकर्मणि मांगल्ये संग्रामे द्भुतदर्शने॥ गृह्यपरिशिष्टे। अथ स्वस्तिवाच
नमभिपूर्त्तेषु अभ्युदयिकविवाहान्ताग्न्यपत्यसंस्काराः। प्रतिष्ठाद्यापने पूर्त्ते तत्कर्मणः प्राद्यं तयोः कुर्यादि
ति। आग्न्यश्वलायनस्मृतिः॥ वैदिके तांत्रिके वा दैवे ततः पुण्याहमिष्यते॥ शौनकः॥ पुण्याहवाचनवि
धिं वक्ष्यामो यथाविधि॥ प्रयोक्ता कर्मणामादावेतेषां दयास्सिद्धये इति॥ तच्च प्रयोगांतर्गतमिति
केचित्॥ बहवस्तु प्रयोगबहिर्भूतमिति॥ आद्यपक्षे कर्मप्रयोगसंकल्पं कृत्वा कार्यं द्वितीये तु तत्कृ
त्वा कर्मसंकल्पः॥ अथ प्रयोगः॥ हेमाद्रौ दानखंडे बह्वृचपरिशिष्टवचनोक्तः सकलसाधारणशि
ष्टाचारप्राप्तश्च पुण्याहवाचनप्रयोगः॥ कृतमंगलस्नानः स्वलंकृतः कृताचमनः प्राङ्मुखो यजमानो
वस्त्राच्छादिते पीठे उपविश्य पत्नीं च स्वदक्षिणतः प्राङ्मुखीमुपवेश्य संस्कार्यं चेत्तं चोपवेश्य॥
ॐ सुमुखश्चैकदंतश्चेत्यादि शुक्लांबरधरं देवं। अग्नौ शीतार्थे सर्वमंगलमांगल्ये। सर्वदा स
र्वकार्येषु॥ सर्वेषु कालेषु समस्तदेशेषु॥ तदेव लग्नं॰ यत्र योगेश्वरः कृष्णः॥ सर्वेष्वारंभकार्येषु॥

ना

इति श्लोकान्पठित्वा ॥ ॐ लक्ष्मीनारायणाभ्यां नमः ॥ उमामहेश्वराभ्यां नमः ॥ शचीपुरंदराभ्यां नमः ॥
मातृपितृभ्यो नमः ॥ इष्टदेवताभ्यो नमः ॥ कुलदेवताभ्यो नमः ॥ सर्वेभ्यो ब्राह्मणेभ्यो नमः ॥
आचम्य प्राणायामान्कृत्वा देशकालौ संकीर्त्य अमुकफलसिध्यर्थं स्वाध्यायावाक्षकर्माहं करिष्ये । त
दंगतया पुण्याहवाचनादि करिष्ये । इति संकल्पयेत् ॥ यदा तु प्रयोगाद्बहिर्भूतं पुण्याहवाचनां
घगेत अमुकफलसिध्यर्थं ममुकं कर्मकांगत्वेन मगत्रमादेः पुण्याहवाचनादि करिष्ये इति प्रत्येकं
संकल्पः ॥ प्रधानसंकल्पस्तु सर्वं कृत्वा तद्दिने वा कार्यः ॥ ततः कर्त्ता स्वपुरतः मही द्यौः पृथिवी च
न इति भूमिं स्पृष्ट्वा ॥ ओषधयः समिति तेन तंडुलपुंजं कृत्वा आजिघ्र कलशमिति पुंजोपरि सलक्ष्ण
णं धातुमयं मृन्मयं वा कलशं निधाय ॥ इमं मे वरुणेति तीर्थजलेन पूरयित्वा गंधद्वारामिति
गंधं कलशे क्षिप्त्वा चंदनादिना तेनानुलिप्य या ओषधीरिति सर्वौषधीः ॥ ओषधयः समि
ति यवान् ॥ कांडात्कांडादिति दूर्वाः ॥ अश्वत्थे व इति पंच पल्लवान् ॥ स्योना पृथिवीति पंचसप्त

त

राम

गपर ॥
॥ १८ ॥

वामदः ॥ याः फलिनीरिति फलं । परिवाजपतिरिति पंचरत्नानि ॥ हिरण्यगर्भ इति हिरण्यं ॥ युवासुवा
सा इति वस्त्रेण रक्तसूत्रेण च वेष्टयेत् ॥ पूर्णा दर्वीति धान्यपूर्णं फलसहितं पात्रमुपरि निदध्यात् ॥
तत्वायामीति कलशे वरुणमावाहयेत ॥ चंदनादिना पूजयेत् ॥ ततः कलशे देवता आवाहये देवं । कल
शस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः ॥ मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु सा
गराः सप्त सप्तद्वीपा वसुंधरा ॥ ऋग्वेदोथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥ अंगैश्च सहिताः सर्वे क
लशं तु समाश्रिताः ॥ अत्र गायत्री सावित्री शांतिः पुष्टिकरी तथा ॥ आयांतु मम शांत्यर्थं दुरित
क्षयकारकाः ॥ सर्वे समुद्राः सरितस्तीर्थानि जलदा [illegible]
[illegible] नदाः ॥ आयांतु मम शांत्यर्थं दुरितक्षयकारका इति ॥ ततः कलशप्रा० ॥ देवदानव
संवादे मथ्यमाने महोदधौ ॥ उत्पन्नोसि तदा कुंभ विधृतो विष्णुना स्वयं ॥ त्वत्तोये सर्वतीर्थानि देवाः
प सर्वे त्वयि स्थिताः ॥ त्वयि तिष्ठंति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च
प॰

वा

प्रजापतिः ॥ आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥ वपितिष्ठंति सर्वे विपतः कामफलप्रदः ॥
त्वत्वस्मा हृदि मे पत्नं वा च मीहिङ्गलोके ॥ सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा ॥ अवनिकृतजानुमंड
लः ॥ कमलमुकुलसदृशाम् अंजलिं शिरस्याधाय दक्षिणेन पाणिना सुवर्णपूर्णकलशं धारयित्वा
आशिषः प्रार्थयेत् ॥ माधिना माह ॥ एताः सत्या आशिषः संतु ॥ दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णु
पदानि च वा ते नायुः प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु ॥ शिवा आपः संतु ॥ सौमनस्यमस्तु ॥ अक्ष
तं चारिष्टं चास्तु ॥ गंधाः पांतु सुमंगल्यं चास्तु ॥ अक्षताः पांतु आयुष्यमस्तु ॥ पुष्पाणि पांतु सौश्रिय
मस्तु ॥ तांबूलानि पांतु ऐश्वर्यमस्तु ॥ दक्षिणाः पांतु बहुदेयं चास्तु ॥ दीर्घमायुः शांतिः पुष्टिस्तु
ष्टिः श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं चायुष्यं चास्तु ॥ यत्र सर्वत्र ब्राह्मणो राशिरिति प्रत्युत्तरं देयं
पं कृत्वा सर्ववेदपुण्याहक्रियाकरणकर्मसंस्थाः सुप्रजाः शोभनाः प्रवर्तंते ॥ तमहमोंकारमादिं कृत्वा
ऋग्यजुः सामाथर्वच नेवदृषिसंमतं संविज्ञातेन वह्निरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये ॥ वि

राम

॥ ४२ ॥

॥ १९ ॥

प्रः वाच्यतामिति वदेयुः ॥ एवमुत्तरत्रापि यथायोगं प्रयुक्तं ॥ ततो यजमानः स्वदक्षकर्णे जिः ऋ० १ द्रवि
णोदा द्रविणसः ऋ० १ सविता पश्चातात्सविता पश्चातात् ऋ० १ नवोनवो भवति ऋ० ३ द्यौर्दिवि । ऋ० १ आयुर्द
दं नु जीवसे दीर्घायुत्वाय वर्चसे ॥ यस्त्वा हृदा कीरिणा मन्यमानो मर्त्यं मर्त्यो जोहवीमि जातवेदो यशो
अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्यां ॥ यस्मै त्वं सुकृते जातवेद उ लोकमग्ने कृणवः स्योनं ।
अश्विनं स पुत्रिणं वीरवंतं गोमंतं रयिं नशते स्वस्ति । व्रतनियमतपःस्वाध्यायक्रतुशमदमदानवि जप ५
शिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयतां ॥ विप्राः समाहितमनसः स्मः ॥ यज० प्रसीदंतु भ
वंतः ॥ विप्राः प्रसन्नाः स्मः ॥ यज० शांतिरस्तु । पुष्टिरस्तु । तुष्टिरस्तु । वृद्धिरस्तु । अविघ्नमस्तु ॥ आ
युष्यमस्तु ॥ आरोग्यमस्तु । शिवं कर्मास्तु । कर्मसमृद्धिरस्तु । वेदसमृद्धिरस्तु । शास्त्रसमृद्धिरस्तु ॥
पुत्रसमृद्धिरस्तु ॥ धनधान्यसमृद्धिरस्तु । इष्टसंपदस्तु । अरिष्टनिरसनमस्तु ॥ यत्पापं तत्प्रतिह
तमस्तु ॥ यच्छ्रेयस्तदस्तु । उत्तरे कर्मण्यविघ्नमस्तु । उत्तरोत्तरमहरहरभिवृद्धिरस्तु । उत्तरोत्त

कैयाः श्रुत्याः संपद्यंतां ॥ तिथिकरणमुहूर्त्तनक्षत्रसंपदस्तां । तिथिकरणमुहूर्त्तनक्षत्रग्रहलग्नाः
धिदेवताः प्रियंतां ॥ तिथिकरणेमुहूर्त्तेसनक्षत्रेसग्रहेसदैवते प्रीयेतां ॥ दुर्गापांचाल्यौ प्रियेतां । अग्निपु
रोगा विश्वेदेवाः प्रियांतां ॥ इंद्रपुरोगा मरुद्गणाः प्रियंतां । ब्रह्मपुरोगाः सर्वेवेदाः प्रियंतां ॥ माहेश्वरीपु
रोगा उमा मातरः प्रीयंतां ॥ वसिष्ठपुरोगा ऋषिगणाः प्रीयंतां ॥ अरुंधतिपुरोगा एकपत्न्यः प्रीयंतां । ऋष
यश्छंदांस्याचार्या वेदा यज्ञाश्च प्रीयंतां । ब्रह्म च ब्राह्मणाश्च प्रीयंतां । श्रीसरस्वत्यौ प्रीयेतां । श्रद्धामेधे प्री
येतां । [illegible] भगवती कात्यायनी प्रीयतां ॥ भगवती वृद्धिकरी प्रीय० ॥ भगवंतौ वि
घ्नविनायकौ प्रीयेतां ॥ भगव[illegible]न्स्वामी महासेनः सपत्नीकः ससुतः सपार्षदः सर्वस्थानगतः प्री०
हरिहरहिरण्यगर्भाः प्री० सर्वा ग्रामदेवताः प्रीयंतां । सर्वाः कुलदेवताः प्रीयंतां ॥ हता ब्रह्मविद्विषः ॥
हताः परिपंथिनः ॥ हताः अस्य कर्मणो विघ्नकर्त्तारः ॥ शत्रवः पराभवं यांतु ॥ शाम्यंतु घोराणि । शाम्यं
तु पापानि ॥ शाम्यंत्वीतयः शुभानि वर्द्धंतां ॥ शिवा आपः संतु ॥ शिवा ऋतवः संतु । शिवा अग्नयः संतु ॥

राम

॥घर॥
॥२०॥

शिवा ऋतवः संतु। शिवा ओषधयः संतु॥ शिवा वनस्पतयः संतु। शिवा अतिथयः संतु॥ अहोरात्रे
शिवे स्यातां॥ निकामे० कल्पंतां॥ शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिता आदित्यपु
रोगाः सर्वे ग्रहाः प्रीयंतां॥ भगवान्नारायणः प्रीयतां। भगवान्व्यः प्रीयतां। भगवान्स्वामी महासेनः प्री
यतां। पुण्याहकालान्वाचयिष्ये। वाच्यतां। ॐ ह्नाते० पुण्यमावद०। अनेया पुण्याहं एव कुरुते॥ ब्राह्मणाः
मम गृहे अस्य कर्मणः पुण्याहं भवंतो ब्रुवंतु। इति स्वयं मंद्रस्वरेणोक्त्वा ब्राह्मणैः ॐ पुण्याहमिति तथै
वोक्ते पुनरेव मध्यमस्वरेणोक्त्वा तथैव तैरुक्ते पुनरेवमुच्चस्वरेणोक्ते तथैव तैरुक्तो स्वस्त्ययनं तु नः॥ आ
दित्यः मम तस्य स्वस्ति ब्राह्मण इत्यादि कर्मण इत्यंते पूर्ववत्स्वस्ति भवंतो ब्रुवंतु इति त्रिः। आयुष्मते स्व
स्तीति प्रतिवचनं त्रिः॥ ऋद्ध्यमनः कामसमृद्धः सर्वा मद्धिं प्रतितिष्ठति ब्राह्मणा मिन्यादि॥ अस्य कर्म
णः ऋद्धिं भवंतो ब्रुवंत्विति त्रिः। ॐ ऋध्यतामिति त्रिः। श्रियै जातः श्रिय० मित द्रौ श्रियमेवैनं एव वेदत्व
दैवतम्मि त्यादि॥ अस्य कर्मणः श्रीरस्त्विति भवंतो ब्रुवंत्विति त्रिर्ब्रूयात्॥ अस्तु श्रीरिति विप्रा द्वि
र्मन०

...अनयोरप्येकेनवीनयोर्वानयोरन्यत्राप्य...

...तत्पूजनमिद...

...तः कर्तुर्वा मतः पत्नीमुपवेश्य पात्रपातितजलेन पल्लवदूर्वादिभिरादर्शमुखावेक्षणाभिषिंचेयु
रित्युक्तं तत्र मंत्राः ॥ देवस्य त्वेत्यादि सुरास्त्वामभिषिंचंतु विष्ण्वादि पौराणान्मंत्रान्वापि पठन्नभिषेके
ततो नीराजनं कुर्यात् ॥ ॥अथ पाद्युदयिकश्राद्धविधिः ॥ ॥तत्र गर्भाधानादिषु गर्भसंस्कारेषु
जातकर्मादिषु पत्नीसंस्कारेषु अग्न्याधानादिषु श्रौतकर्मसु अन्नप्राशनकर्मसु वापीकूपतडागारामादि
घापनादिषु देवप्रतिष्ठायां वा नवस्थानप्रवेशे [?] सत्यां सत्स्वीकारे तुलापुरुषादिमहादानादौ नवगृह
प्रवेशे गोमहानाम्न्यादि वेदव्रतेषु राज्ञाभिषेके अंतिकस्यानेकसंस्कारेषु कर्तव्येषु युगपत्प्राप्ति
तेषु सर्वादौ सकृदेव तंत्रेणैव कार्यं न तु प्रतिसंस्कारमावृत्त्या ॥ पश्चादेवाद्युक्ततज्जातकर्मादिकस्यो
पनयनकाले जातकर्माद्यनुष्ठाने देशांतरगतस्य मृतपुत्र्याः [?] कृतोर्ध्वदेहिकस्यागतस्य पुनर्जात
कर्मादिसंस्काराणां विहितानां युगपदनुष्ठाने कर्मनाशान्तस्य [?] आदीनां प्रायश्चित्तं तत्पादु न सं
स्काराणां युगपदनुष्ठाने वा ॥ तदुक्तं ब्रह्मपुराणे गणेशः क्षिप्रमाणेनो मातच्यंः पूजनं सकृ

राम

गध रा॥
॥२१॥

ता। सकृदेव त्रवेष्ट्याद्धमादीनपप्यगादिष्विति। कात्यायनः॥ कुड्यलग्ना वसोर्धाराः पंच धारा घृते
न तु। कारयेत्सप्त वा धारा नातिनीचा नचोच्छ्रिताः। गौरी पद्मा शची मेधा सावित्री विजया जया॥ दे
वसेना स्वधा स्वाहा मातरो लोकमातरः॥ धृतिः पुष्टिस्तथा तुष्टिरात्मदेवतया सहेति। आत्मदेव
ता आत्मकुलदेवता॥ आपुण्याणि च वीर्यसंधे जपेदत्र समाहितः॥ आपुण्याणि। आनो नद्रा इत्यादी
नि तत्रैव द्विश्राद्धं॥ नव दैवत्यं पार्वणत्रयात्मकं। तत्र क्रमो मन्मालास्थलायनाचार्यः॥ माता पितामही
चैव संप्रजा प्रपितामही॥ पित्रादयस्त्रयश्चैव मातृ पित्रादयस्त्रयः॥ एते नवात्वेनीयाः स्युः पितरो
नुदेपेद्विजैरिति। पत्न्यवद्धवसिष्ठः॥ नांदीमुखे विवाहे च प्रपितामहपूर्वकं॥ नाम संकीर्तयेद्विद्वा
नन्यत्र पितृपूर्वकमिति॥ स्मृत्यर्थसारस्था॥ वृद्धौ नान्दीमुखास्ते पितरो वृद्धिश्राद्धे भुंजत इति तच्छास्त्रं वा म
रविषयं॥ कात्यायनानां तु आनुलोम्येन मात्रादिक्रमेणैव नांदीमुखाः पितरः पितामहाः प्रपितामह
श्चा इति प्रयोगदर्शनात्॥ पत्नीवत्सपुराणे। पिता पितामहश्चैव तथैव प्रपितामहः॥ त्रयो ह्यश्रुमुखा

इति पितरः संप्रकीर्त्तिताः। तेभ्यः पूर्वे त्रयो ये तु ते तु नांदीमुखाः स्मृताः इति तत्र मलमासप्रकरणे पठि-
तश्लोक ११ पौर्णमासीनिमित्तकश्राद्धविषयं तत्प्रकरणपाठादिसेवं हेमाद्यादय ऊचिरे॥ इदं च नांदी-
मुखसंज्ञकानामाचार्यादीनुद्दिश्यैव। विष्णुपुराणे। कन्याविवाहादीननुक्रम्य नांदीमुखान्पितॄन्नांदीतर्प-
येत्। प्रयतो गृहीत्यक्तेः॥ ब्रह्मपुराणे व्रजन्माद्यनुक्रम्यापि तन्नांदीमुखान्नाम तर्पयेद्विधिपूर्वकमिम-
तौः। वसुपरात्परेण तु देवानामपि नांदीमुखविशेषणमुक्तं। नांदीमुखेभ्यो देवेभ्यः प्रदक्षिणं कुशा-
सनमिति॥ वृद्धिश्राद्धे च कालः। कर्माहात्पूर्वेद्युर्मातृपार्वणं। कर्माहि पितृपार्वणं॥ कर्मोत्तराहे मा-
तामहपार्वणमिति। अस्यासंभवे पूर्वेद्युरेव पूर्वाह्णे मातृकं॥ मध्याह्ने पैतृकं॥ अपराह्णे मातामह-
ह्नानां॥ अस्याप्यसंभवे त्वाह वृद्धमनुः॥ अलाभे श्राद्धकालानां नांदीश्राद्धत्रयं बुधः॥ पूर्वेद्यु-
रेव कुर्वीत पूर्वाह्णे मातृपूर्वकमिति॥ इदं च महत्सु कर्मसु॥ अल्पेषु तु कर्माहन्येव श्राद्धं। पुत्र-
जन्मनि तु दिने वा रात्रौ वा चूडाव्रतोपवासिना वा पुत्रजन्मानंतरमेव कार्यं। अत्र संकल्पादौ वि-

राम

॥५२॥

।४२॥

शेषः संग्रहे। अनुन्नायप्रथमांते न वृद्धौ संकल्पमाचरेत्। न षष्ठ्या यदि वा कुर्यात्कर्तान्दोषोऽभिजा
जायते॥ अत्र स्वसूत्रवृद्धानां नामरूपाणां मनोत्रिणां। अनाम्नामतिलाघेष्वनां दृश्याद्वंच समवत अ
श्वलायनकारिकाच॥ संबंधनामरूपाणि वर्जयेदत्र कर्मणि॥ इदं तु आश्वलांतरविषयं॥ अत्र सत्य
वसू विश्वेदेवौ॥ तत्स्थाने वैश्वदेविकौ। मात्रादीनां च प्रत्येकं द्वौ द्वौ एवं विंशतिब्राह्मणाः॥ पद्मामात्रादी
नां त्रयाणां द्वौ द्वौ। एवमष्टौ। अत्र नांदीमुखांति लस्थाने यवा एव स्वधास्थाने स्वाहाशब्दः स्वाजानु
निपातनाव॥ सर्वं प्रदक्षिणवदेव कुर्यात्॥ प्रदक्षिणमुपचारो रोकजुद्दैर्गैः किं यत्ता दैवविशेषाण्यपां
तरतोज्ञेयाः॥ पिंडदाने कुलदेशाचारतो व्यवस्था। न विष्णुपुराणे॥ पिंडनिर्वपणं कुर्यान्न वा कुर्यान्न
राधिप॥ वृद्धिश्राद्धे महाबाहो कुलधर्मानवेक्ष्य तु॥ पिंडदानपक्षे विशेषो वसिष्ठेनोक्तः। दधि
कर्कंधुमिश्रान्पिंडान्दद्याद्यथाक्रमं॥ कर्कंधुर्बदरीफलं। एकैकस्मै पिंडद्वयं देयं। एकं ना
मं च परं तूष्णीं दद्यात्पिंडद्वयं मंत्रवद् इति चतुर्विंशतिमतात्॥ अन्येऽपि बहवो विशेषा ग्रंथांतर

इति हेमाद्रिणा व्याख्यातं॥ [illegible]

[illegible]या:॥दाक्षिणात्यानां गुर्जराणां चापि स्त्रीत्वदृष्टिश्राद्धमाचारान्नैरोच्यते॥अथाभ्युदयिके कर्तृनिर्णयः सायणीये॥नांदीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे पुनः॥अत ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नांदिकं॥
द्वितीयपाणिग्रहादौ वरएव कुर्यादित्यर्थः।कात्यायनः॥स्वपितृभ्यः पिता दद्यात्सुतसंस्कारकर्मसु॥
पिंडानोद्वाहनात्तेषां तस्याभावे तु तत्क्रमात्॥तेषां सुतानां नोद्वहनात्स्वयमविवाहप्रयंतं पिता
स्वपितृभ्यः पिंडान्नतदुपलक्षितं वृद्धिश्राद्धं कुर्यात्।तस्य पितुरभावे तु तस्य संस्कार्यस्यापि तद्गणां
न क्रमस्ते न क्रमेण पितृव्याचार्यो तुल्यादिः श्राद्धं कुर्यात्॥वृद्धौ तीर्थे च संन्यस्ते ताते च पतिते सति॥
येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः॥तत्त्वाग्निकविषयमित्येके।विष्णुः।पितरि जीवति यः श्रा
द्धं कुर्या [illegible] त्से येषां पिता कुर्यात्तेभ्य एव तत्कुर्यात्पितरि पितामहे च येषां प्रपितामहः॥
[illegible]।पितरि पितामहे प्रपितामहे च नैव दद्यादिति॥अथ पाश्वलायनगृह्यपरिशिष्टे तु॥जीवति
तासुतसंस्कारेषु मातृमातामहयोः कुर्यात्।तस्यां जीवत्यां मातामहस्यैव कुर्यादिति। अथास्य

मा

राम

[illegible]

शिष्टप्रचाराचारपरिगृहीतः संकल्पविधिनाप्रयोगः॥ उपनयनादिमहत्सु कर्मसु पूर्वेद्युर्नीत कर्मा
धेर्ल्यस्तु तदहरेव नांदीश्राद्धं कुर्यात्॥ तत्रादौ कर्त्ता कृतमांगलिकस्नानो धौ
तवासाः कृतस्वस्त्ययनो नांदीश्राद्धपूर्वांगं मातृकापूजनं कुर्यात्। पूजाप्रकारस्तु। पूजोपकरणान्यु
पकल्प्य प्राङ्मुख उपविश्य कुशपवजलान्यादाय ग्रंथे त्यादि। अमुककर्मांगतया गणपतिगौर्यादिचतु
र्दशमातृकापूजनमहं करिष्ये। इति संकल्प्य अक्षतैः ॐ भूर्भुवः स्वः गणपते इहागच्छ इह तिष्ठ। ॐ
भूर्भुवः स्वः गौरि इहागच्छ इह तिष्ठ। एवं पद्मे शचि॥ मेधे। सावित्रि॥ विजये। जये। देवसेने॥ स्वधे ॥स्वाहे॥
धृते। तुष्टे। पुष्टे। आत्मकुलदेवते। इति प्रत्येकमावाह्य। ततो मनो ज्योतिरिति प्रतिष्ठाप्य ओं
गणपतये नमः इति प्रणवादिनमोन्तचतुर्थ्यन्तस्वस्वनाममंत्रेण पंचदशान्वा षोडशोपचारैः पूज
गौ येत्। मातृगणगणदेवताश्चैते तु गणपति गौरी पद्मा शची मेधा सावित्री विजया जया॥ देवसेना
देवा स्वधा स्वाहा धृतिः तुष्टिः पुष्टिरात्मकुलदेवता इहागच्छत इह तिष्ठतेति आवाह्य प्रतिष्ठाप्य
मक...

गणपत्यादिभ्यो नमः इति पूर्ववत् उपचारैः पूजयेत्॥ ततः पंच सप्त वा तिलनीचा न चोच्छ्रिताः कुड्य-
दि वसोः पवित्रमसीति घृतधारा उत्तरसंस्काः कुर्यात्॥ ततो वसोर्धारा देवताभ्यो नम इति पंचो-
पचारैः पूजां कुर्यात् वसोर्धाराकरणं च कात्यायनानामेव नान्येषां॥ ततः आयुष्यमंत्रजपः॥ आयुष्यं
वर्चस्यं० इमां॥१॥ नत द्रहीसि० मा पु॥२॥ यदा वध्नं० पश्यासं॥३॥ इत्यामंत्रजपः॥ अथ नान्दीश्रा-
द्धं तच्च त्रिविधं विवाहादि नित्यनैमित्तिकं। पुत्रजन्मादि नैमित्तिकं। अग्न्याधानादि नि-
मित्तं चेति तत्र विवाहादि निमित्तं प्रातः कार्यं। तदाह शातातपः॥ प्रातर्वृद्धिनिमित्तकमिति। अ-
त्र प्रातः शब्दः सार्द्धप्रहरात्मककालवचनः॥ तदाह गार्ग्यः॥ ललाटसंमिते सूर्ये प्रथमः प्रहरः स्मृ-
तः॥ स एव साधसंयुक्तः प्रातरित्यभिधीयते। अग्न्याधाननिमित्तं त्वपराह्णे कार्यं। तदाह गा-
लवः॥ पार्वणं चापराह्णे तु वृद्धिश्राद्धं तथाग्निकमिति। अग्न्याधाननिमित्तं वृद्धिश्राद्धमप-
राह्णे कुर्यादित्यर्थः। पुत्रजन्मादौ निमित्तानंतरमेव तत्कार्यं निर्णयामृते प्येवं॥ कर्त्ता उक्तकाले

पु॰ ४

राम

॥५२॥
॥२४॥

सुस्नातः सुप्रक्षालितकरचरणः स्वाचांतः सुस्नातान्स्वाचांताननुगृहीतब्राह्मणान् आहूय बहिःकप क्षेत्रे
गोमय योपलिप्ते मंडले स्वागतं वः सुस्वागतमिति प्रत्येकं प्रश्नोत्तरपूर्वकं प्रागग्रकुशोत्तरेष्वासनेषु
प्राङ्मुखान्दक्षिणोपक्रमानुदक्पर्यवसानान् उपवेश्य स्वयमुदङ्मुख उपविश्याग्राघयोर्विप्रयोर्जानु
नीस्पृशन् प्राग्देशकालौ संकीर्त्य अमुककर्मनिमित्ताभ्युदयिकश्राद्धाख्ये कर्मणि नांदीमुखास्म
न्मात्रादित्रय नांदीमुखास्मत्पित्रादित्रय नांदीमुखास्मन्मातामहादित्रयसंबंधिसत्यवसुसं
ज्ञकविश्वेदेवकृत्ये त्वं वै तौ मया निमंत्रितौ इति तांबूलदानपूर्वकं निमंत्रयेत्॥ निमंत्रितौ स्व इति
प्रतिवचनं॥ पुनः तांबूलादिकमादाय तदुत्तरयोर्जानुनी स्पृशन् अद्येहामुकगोत्राणां नांदीमु
खास्मन्मातृपितामहीप्रपितामहीनां अद्येह कर्तव्यामुककर्मनिमित्ताभ्युदयि
कश्राद्धे त्वं वै तौ मया निमंत्रितौ इति तांबूलादिदानपूर्वकं निमंत्रयेत्। निमंत्रितौ स्व इति प्रतिवच
नं पुनस्तांबूलादिकमादाय तदुत्तरयोर्विप्रयोर्जानुनी स्पृशन् अद्येहामुकगोत्राणां नांदीमुखास्म

मुकामुकदेवीनां शर्मणां
अमुकदेवीनां

पितृपितामहप्रपितामहानां अमुक[illegible]शर्मणां अद्य कर्त्तव्यामुककर्मनिमित्तास्माकं दैपिकश्राद्धे त्वं तौ म
या निमंत्रितौ इति तौ ब्रूल्‌ हान पूर्वकं निमंत्रयेत्‌॥ निमंत्रितौ स्व इति प्रतिवचनं। पुनस्तां ब्रूलादिकमा
दाय अद्येहामुकगोत्राणां नांदीमुखास्मन्मातामहप्रमातामहवृद्धप्रमातामहानां अमुकामुकशर्
मणां अद्य कर्त्तव्यामुककर्मनिमित्तास्माकं दैपिकश्राद्धे त्वं तौ मया निमंत्रितौ इति तां ब्रूलादिदान
पूर्वकं निमंत्रयेत॥ निमंत्रितौ स्व इति प्रतिवचनं॥ अक्रोधनैः शौचकारिणोति सर्वत्र नियमा
न्श्रावयेत्‌। ततो देवद्विजपूर्वकं चरणप्रक्षालनं विधाय अद्येह नांदीमुखास्मन्मात्रादित्रयनां
दीमुखास्मत्‌पित्रादित्रय नांदीमुखास्मत्‌मातामहादित्रयसंबंधि सत्यवसुसंज्ञिका विश्वेदे
वा एतत्‌ पाद्यार्घ्यं वो नमः इति गंधाक्षतादियुक्तं पाद्यार्घ्यं दत्वा। अद्येहामुकगोत्राः नांदीमुखास्म
त्‌मातृपितामहीप्रपितामह्यो अमुकामुकदेव्यः एतत्‌ पाद्यार्घ्यं वो नमः इति पित्रादिवर्गब्राह्मणचर
णयो दत्वा॥ अद्येहामुकगोत्राः नांदीमुखास्मत्‌मातामहप्रमातामहवृद्धप्रमातामहाः अ
इति मातृवर्गत्रयब्राह्मणचरणयो दत्वा॥ अद्येहामुकगोत्राः नांदीमुखास्मत्‌पितृपिता
[illegible] पाद्यार्घ्यं वो नमः॥ २

राम
॥नर॥
॥२५॥

मुकामुकशर्मणः॥ एतत्सापुण्यं वो नमः॥ इति मातामहवर्गब्राह्मणावरणयोर्दद्यात्। ततो
ब्राह्मणानाचमय्य स्वयमप्याचम्य श्राद्धदेशे प्रथमकल्पिते षडासनेषु दद्यात् मासनस्यं तामिति
प्रयोगेणोपवर्ग प्राङ्मुखान् देवपूर्वं द्विजानुपवेश्य स्वयमुदङ्मुख उपविश्य कर्मसौकर्यार्थं क
र्मपात्रे जलेनापूर्य दूर्वादधियवकुशांस्तत्र निक्षिप्य प्राणायामत्रयपूर्वकं विष्णुःस्मरणं कृत्वा कर्मपात्र
जलेनोपकरणानि प्रोक्ष्य दक्षिणेन कुशयवजलानि दक्षिणकरेण दायपूर्वं देशकालकीर्तनांते अ
मुककर्मनिमित्तान्भ्युदयिक श्राद्धाख्ये कर्मणि अमुकगोत्राः नांदीमुखास्मत् मातृपितामहीप्रपि
तामह्योऽमुकदेव्यः अमुकगोत्राः नांदीमुखास्मत् पितृपितामहप्रपितामहाः अमुकशर्माणः
अमुकगोत्राः नांदीमुखास्मत् मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकशर्माणः प्रधान
देवताः सत्यवसुसंज्ञिका विश्वेदेवाः अंगदेवताः यथोक्तलक्षणं हविः ब्राह्मण आहवनीयार्थे
अमुकगोत्राणां नांदीमुखास्मत् मातृपितामहीप्रपितामहीनां अमुकामुकदेवीनां अमुक

या ४

मुक्ता ४

मु ८२

त्राणां नांदीमुखास्मत्पितृपितामहप्रपितामहानां अमुकामुकशर्मणां नांदीमुखास्मन्माता
मह प्रमातामह वृद्धप्रमातामहानां अमुकामुकशर्मणां अमुककर्मनिमित्तं सत्यवसुसंज्ञका विश्वेदेवाः
पूर्ववत्संकल्पित कमात्रादयिकं श्राद्धं च वद नुज्ञया अहं करिष्ये ॥ इति संकल्प्य कुरुष्वेति प्रतिवचनं
ततः सव्यपणेव गाय आस्तिर्णे पः ॥ विष्णुस्मरणं । मात्रादित्रयपित्रादि त्रयमातामहादित्रय श्राद्धसं
बंधिनः सत्यवसुसंज्ञिका विश्वेदेवाः । इदमासनं वो नमः इति प्रागग्रान्कुशान्त्रय स्प वज्र लेद
क्षिणत पासनोपरि दत्वा अमुकगोत्रा नांदीमुखास्मन्मातृपितामही प्रमातामह्यो अमुकदे
व्यः इदमासनं वो नम इति मातृवर्गे द्वयासनोपरि विन्यस्य दत्वा अमुकगोत्र नांदीमुखास्मत्पितृपि
तामहप्रपितामहाः अमुकामुकशर्माणः इ दमासनं वो नम इति पित्रादिवर्गे ब्राह्मणे द्वयासनो
परि दत्वा पित्रादिपदस्थाने मातामहादिपदप्रक्षेपेण तृतीय ब्राह्मणे द्वयासनोपर्यासनं दद्यात्
ततः प्रत्यासनं दीपस्थापनं ततो द्वितीय ब्राह्मणहस्ते प्रथम ब्राह्मणहस्ते दत्वा ततः जलदान

राम

श्राद्ध

॥२६॥

अमुका

पूर्वकं गंधादि दत्वा कृत्वाप्यवनेजनान्यागय मात्रादि पित्रादि मातामहादि त्रय संबंधि सत्यवसु संज्ञिकानि श्वे
देवा इमानि गंधपुष्पधूपदीपवासोलंकरणतांबूलानि वो नमः ।। अमुकगोत्राः नांदीमुखाः स्मत् मातृ
पितामही प्रपितामह्योऽमुकदेव्यः इमानि गंध तांबूलानि वो नमः ।। अमुक गोत्राः नांदीमुखाः अस्मत्पि
तृ पितामह प्रपितामहाः अमुकामुक शर्माणः इमानि गंधपुष्पं तांबूलानि वो नमः ।। अमुकगोत्रा नां
दीमुखास्मत् मातामह प्रमातामह वृद्धप्रमातामहाः अमुकामुक शर्माणः । गंधपुष्पं तांबूलानि वो न
मः ।। अन्नपरिवेषणं ।। पात्रमालभ्य पृथिवी ते० जुहोमि स्वाहेति जपित्वांगुष्ठमन्नेवमवगाह्य इदमन्नमि
मा आपः इदमाज्यं हविः इत्युक्त्वा मात्रादि त्रय पित्रादि त्रय मातामहादि त्रयसंबंधिनः सत्यवसु संज्ञिका वि
श्वेदेवाः इदमन्नं घृताद्युपस्कार साहितं परिविष्टं परिवेष्यमाणं चाद्विजे र्पर्यंतं अमृतरूपं वो
द्दस्वा त्यजेत ।। एवमेव मात्रादि पात्रद्वयमालभ्य अमुकगोत्राः नांदीमुखेभ्यः स्मत् मातृपितामहीप्र
तामह्योऽमुकदेव्यः इदमन्नं घृताद्युपस्कार साहितं अमृतरूपं वो नमः ।। एवमेव पित्रादि पात्रयो माता

स्र्स

पात्रयोरपि संकल्पं कुर्यात्॥ ततोऽक्षतानपि त्रिरत्रैव दर्भजपं तत्॥ मानन्तान्वाग्रत्नं विकीर्य सकृत्पोदत्वा

वक्तापत्रीज पिब॥ मधुमतीर्मधु मधिति चा संपन्नमिति स्वदितमस्तु संपन्नमिति॥ तेरुक्तो शेषमन्नं किंचि

तो इति पश्चाद्दृष्टेः सह ... तामिति॥ तेरुक्तेऽवशिष्टान्नं नाचामयेत्॥ सुप्रोक्षितमस्तु॥ शिवा आपः संतु॥ सौमन

स्यमस्तु॥ अक्षतं चारिष्टं चास्तु॥ नांदीमुख्यो मातरः प्रीयंतां नांदीमुख्यः पितामह्यः प्रीयंतां नांदीमुख्यः प्रपि

तामह्यः प्रीयंतां॥ नांदीमुखाः पितरः प्रीयंतां। नांदीमुखाः पितामहाः प्रीयंतां। नांदीमुखाः प्रपितामहाः

प्रीयंतां॥ नांदीमुखाः मातामहाः प्रीयंतां। नांदीमुखाः प्रमातामहाः प्रीयंतां॥ नांदीमुखाः वृद्धप्रमाता

महाः प्रीयंतां॥ इति क्षीरयवजलानि दद्यात्॥ ततः प्रांजलिः आशीः प्रार्थयेत्॥ अघोराः पितरः संतु॥ संविति

ब्राह्मणाः॥ गोत्रं नो वर्धतामिति यजमानः॥ वर्धतामितीतरे। दातारो नोऽभिवर्धन्तां॥ अभिवर्धतामिति ते

वेदाः॥ संततिरेव च॥ अभिवर्धतामिति क्रमेणोत्तरे॥ श्रद्धा च नो मा व्यगमत्॥ मा गात्॥ बहुदेयं

च नोऽस्तु॥ अस्त्विति प्रतिवचनं॥ ततो मात्रादित्रयपित्रादित्रयमातामहादित्रयश्राद्धसंबंधिविश्वेदेवि

राम

॥घर॥
॥२७॥

मश्रा ५

(पयां)

क श्राद्धप्रतिष्ठार्थममुकशर्मन्नेवसुस्वरूपं इयं मार्जनामलकाई मल्लादिरूपा विष्णुदैवता दक्षिणा मया द
त्ता इति देवब्राह्मणाभ्यां दक्षिणां दत्वा अमुकगोत्राणां नांदीमुखानां मातृपितामहीप्रपितामहीनां
अमुकामुकदेवीनां कृतैतन्नान्दयिकश्राद्धप्रतिष्ठार्थं अमुकगोत्राभ्याममुकशर्मभ्यां इयं श्राद्ध
दत्ता इति मात्रादिब्राह्मणाभ्यां दक्षिणां दत्वा अमुकगोत्राणां नांदीमुखानां पितृपितामहप्रपिता
महानां अमुकशर्मणां कृतैतदाभ्यु० दत्ता इति पित्रादिब्राह्मणाभ्यां दक्षिणां दत्वा पित्रादिपदस्था
ने मातामहप्रमातामहवृद्धप्रमातामहपदप्रक्षेपेण मा[illegible]तामहादिब्राह्मणाभ्यां दक्षिणां द
द्यात्॥ ततो विश्वेदेवाः प्रीयंतामिति स्वादेवब्राह्मणाभ्यां विश्वेदेवाः प्रीयंता इति तत्करे दत्ते स्वस्ति
न्ववंतो ब्रुवंत इति सर्वान्प्रत्यस्वस्तीति ते रुक्ते ब्राह्मणान्प्रणिपत्य प्रसाद्य वाजे वाजे वते
ति मात्रादिवर्गत्रयद्विजपूर्वकं देवद्विजोविसर्जयन्ना मा वाजस्येति विप्रान नुव्रज्य प्रदक्षिणीत्या
नामेत॥ ततो मातृकादिविसर्जयेत्॥ जीवन्मातृकस्य न मातृपार्वणं॥ जीवन्मातामहस्य न मात

ह पार्वणं वा र लोपात् ॥ जीवत्पितृकस्त्वाये त्यएव पितादद्यात्तेभ्यो दद्यादित्युक्तमेव ॥ यदातु प
क्वान्नासंभवस्तु तदा आमश्राद्धविधिना आमान्नेन कर्तव्यं। आमान्नस्याप्यलाभे हिरण्येन कर्तव्यं।
ततः पत्नीयजमानयोरहतवस्त्रपरिधानं ॥ ततः सपत्नीकः प्राङ्मुख उपविश्य पवित्रपाणिः अद्येत्यादिदेशका
लौ स्मृत्वास्मात्कर्तृकाग्निमहमाधास्ये इति संकल्पं कुर्यात्। आन्यदपि कश्राद्धात्पूर्वसंकल्प इति ह
रिहरः। आच्छोत्तराभिमतिरेणुकः ॥ वैकल्पिकावधारणं ॥ मंथाग्निः। उत्तरतः पात्रासादनं। द्वे पवि
त्रे। घृतस्थाली मृन्मयी। चरुस्थाली औदुंबरी। पात्र्या त्रयः समिधः प्राचावाघारौ ॥ कोणयोराज्यस्य
णो। दक्षिणा पूर्णपात्रं ॥ इत्यवधारणं ॥ हरिहरमते ब्रह्मवरणं। अरणिप्रदानं चात्रैवं ब्रह्म
अरणी आदाय अधरारणिं पत्न्यै उत्तरारणिं यजमानाय प्रयच्छति। तौ चावसथ्याग्निसाधन
न्नेते इमे अरणी आवाभ्यां परिगृहीते इति परिगृह्णीतः ॥ अरणीप्रदानं स्मार्त्तेनिर्मूलत्वादुपे
क्षणीयं ॥ प्रदानाच्चावेपि धारणं च वत्येव। अधरा रणिं पत्नी बिभृयादुत्तरां पतिरिति यज्ञप

नो ५

२

राम

॥ चुर ॥
॥ २८ ॥

र्ध्वपरिलिखितात्॥ उक्तप्रकारेणारणिमानं। अरणिपूजनं॥ ततोपवेनचतुर्दशांगुलमानेनमे
खलाप्युक्तवत्खरकरणमग्नेस्स्थापावसथ्यगार्हपत्यवत्तुं अमितिनिगमपरिलिखितात्प
श्चपश्चिमेवत्तमेवकुंडमुक्तं। मेखलाद्वादशांगुलोच्छ्रायाकार्या। ततः खरेपरिसमूहनं॥ उपलेप
नं॥ उल्लेखनं॥ उद्धरणं॥ अभ्युक्षणं॥ अरणिपूजेग्निमंथनं। तत्रयजमानः॥ प्राङ्मुख ऊर्ध्व
त्नींधारयति। प्रत्यङ्मुखीपत्नीमंथनंकरोतीतिपत्नीवत्तुलेसर्वासुमैथुनमितिरेणु॥ पत्यामं
थनाशक्तौब्राह्मणेनकेनचित्मंथनंकार्यं काष्ठेरग्नेःप्रज्वालनं॥ खनेनिधानं। अपवावेस
गृहाग्रहोत्पाग्नेः खरेस्थापनं। तस्मादिस्मरणमंत्रे [illegible] रेणुकगंगाधरहरिहराः। तद्विचारणी
यं॥ कर्मकालेप्रतिमंत्रंस्मरणंउतपूर्वमेवस्मरणंकृत्वाकर्मारंभः॥ एतान्यविदित्वायोधीते
नुब्रूतेयजेतैतितस्यब्रह्मनिर्वीर्यंयातयामंचभवतीतिसर्वानुक्रमण्यामुक्तत्वात्तत्रसद्यार्षेद
नमात्रमपेक्षितंचनतुकर्मकालोच्चारणं। यथार्षेज्ञाने॥ अस्मिंन्त्रावसथ्याधानेतंब्रह्मोक्त

ते ॥ ब्रह्मणो व्यपदेशः दक्षिणतो ब्रह्मासनमास्तीर्य तत्र ब्रह्मोपवेशनं ॥ अग्नेरुत्तरतः ॥ प्रणीताप्रण-
यनं ॥ परिस्तरणं ॥ पात्रासादनं ॥ त्रीणि पवित्रच्छेदनानि पवित्रे द्वे ॥ प्रोक्षणीपात्रं चामसं वैकंकतमि-
तिरेण ॥ आज्यस्थाली चरुस्थाली संमार्गकुशाः ॥ उपयमनाः कुशाः समिधस्तिस्रः प्रादेशमात्राः
खादिरः स्रुवं आज्यं व्रीहितंडुलाः दक्षिणापूर्णपात्रं ॥ वरो वा ॥ पवित्रे कृत्वा प्रोक्षणीसंस्कारः
प्रत्येकं पात्रप्रोक्षणं ॥ प्रणीताग्न्योर्मध्ये प्रोक्षणीनिधानं ॥ आज्यनिर्वापः ॥ चरुपात्रे प्रणीतोदकमासि-
च्य तंडुलप्रक्षेपः ॥ चरुआज्ययोः सहाधिश्रयणं [illegible] मितिप्रतिकाराः दक्षिणतश्च
ज्यस्य ब्रह्मणः ॥ उत्तरतश्चरोः स्थापनं ॥ पर्यग्निकरणमुभयोः स्रुवस्यैवास्रुवप्रतपनं ॥ संमार्गकुशैः संमा-
र्जनं ॥ प्रणीतोदकेनाभ्युक्षणं ॥ पुनः प्रतपनं ॥ आज्योद्वासनं ॥ चरोरुद्वासनं ॥ आज्योत्पवनं ॥ अवे-
क्षणं ॥ अपद्रव्यनिरसनं ॥ [illegible] स्रुवं ॥ उपयमनादानं ॥ तिष्ठतः समिधः प्रक्षेपः ॥ प्रोक्षण्युदके-
न पर्युक्षणं ॥ प्रणीतासु पवित्रकरणं ॥ अग्नेरुत्तरतः प्राङ्मुख उपविश्य ॥ दक्षिणं जान्वाच्य ब्रह्मणा

प्रोक्ष

राम

॥ ५२ ॥
॥ २५ ॥

न्वारब्धे स्रुवेण होमः ॥ मनसा पूर्वाघारः ॥ ॐ प्रजापतये स्वाहा ॥ इदं प्रजापतये न ममेति त्यागांते ऽग्नौ

ऽन्य प्रक्षेपः ॥ सर्वत्र त्यागांते ऽन्य प्रक्षेपः ॥ इंद्राय स्वाहा ॥ इदमिंद्राय न मम ॥ ॐ अग्नये स्वाहा ॥ इदमग्नये

न मम ॥ सोमाय स्वाहा ॥ इदं सोमाय ॰ ततो ऽन्वहोमः ॥ सर्वत्र होममंत्रे प्रणवो न्तो पि स्वाहाकारः कार्यः ॥ स

र्वत्र मंत्रवत्सु जुहोतु पदे शादिष्टकावाता । त्वन्नो अग्ने ॰ मुमुग्ध्यस्मत्स्वाहा ॥ इदमग्नीवरुणाभ्यां ॰ ॐ

स त्वन्नो ॰ एधि स्वाहा ॰ इदमग्नीवरुणाभ्यां ॰ इमं मे ॰ चके ॥ इदं वरुणाय ॰ तत्वा ॰ मोषी इदं वरुणाय ॰ ॐ

ये ते शतं ॰ स्वर्काः ॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च ॥ त्यागाः इति पद्ध

तिकाराः ॥ वस्तुतस्तु देवेभ्यः पदं विहायैव त्यागः ॥ अयाश्चाग्ने ॰ भेषजं ॥ इदमग्नये ॥ उदुत्तमं ॥ स्याम ॥

इदं वरुणाय ॥ भवतन्नः ॰ मघनः ॥ इदं जातवेदोभ्यां ॥ इदमग्निभ्यामिति वा त्यागः ॥ ततः स्थालीपा

कहोमः ॥ ततस्तु रुशेषात् अग्नये स्विष्टकृते स्वाहा ॥ इदमग्नये स्विष्टकृते ॰ आज्येन ॥ अयास्यग्ने ॰

र्भिः स्वाहा ॥ इदं देवेभ्यो गातुविद्भ्यः ॥ भूः स्वाहा ॥ इदमग्नये ॰ भुवः स्वाहा ॥ इदं वायवे ॥ स्वः स्वाहा ॥

ॐ ... यपत्रकाय स्वाहा ॥ ॐ अग्नये शुचये स्वाहा ॥ ॐ ... त्यागः ॥ ततः पुनर ...

र्दस्रर्वाय० अथवा इदंन्नः। इदंन्नवः। इदं स्वः॥ इति त्यागाः इति वासुदेवनद्राः। वह्नो अग्ने। सवह्नो अ°
ग्नेऽग्नय आग्नेय०। पेते शातं। उदुत्तमं॥ त्यागा आक्ताः। प्राजापतये स्वाहा। इदं प्रजापतये० बर्हिर्होमः स्वाहे
ति। इदं प्रजापतये न मम मेति त्यागः॥ ततो अवनशेषप्राशनं। पवित्राभ्यां मार्जनं॥ पवित्रयोरग्नौ प्रक्षेपः
यदत्रौत्लिमंत बैहु हिर्धाग्निरसदितिलिंगात्॥ पवित्रयोः न्यस्तवनेलिमत्वात्॥ ब्रह्मणे दक्षिणादानं
प्रणीतानयनं। एक ब्राह्मणभोजनं। ततः स्रत्वंतरोक्त ब्राह्मणभोजने॥ अत्र माणिकावधानमिति
हरिहररेणुकदीक्षितौ। तत्रापक्रमः। मात् पूर्वमान्युदपिकं अन्नाद्दानं देवस्य त्वेति। इदमहमिति
अवटपरिलेखउत्तरपूर्वस्यां खननं॥ पांसूनावापः॥ प्राच्यां अवटे कुशास्तरणं। अक्षतानरिष्टका
नोवावापः॥ हरिद्रादीनां च॥ मणिकस्य मानं समुद्रोसि सर्वाव्यरित्यनेन॥ आपोरेवतीः क्षयथा हि व
स्वः। क्रतूंश्च वन्नद्रं विचष्यामतेऽच। रायस्पोषत्वस्य पत्नीः सरस्वती तद्गृणते वयोधाः॥ आपो हिष्ठे
ति तिसृभिरुदकासेकः। ततो ब्राह्मणभोजनं॥ आधाने पदार्थोपचारे नैमित्तिकहोमस्याभावः॥

राम°
ध्या°

॥५८॥
॥३०॥

अग्न्यभावात्॥ न चाग्निमंथनादूर्ध्वम ग्नितत्रहोमः स्यादिति चेत् मैवं। आवसथ्याग्नेर्हि संस्कारानि
मित्तो न जाति निमित्तो न योग निमित्तो वा॥ संस्कारेषु सत्स्वग्न्यादि प्रयोगदर्शनात्॥ अतश्च ये पदार्था अग्न्य
र्थाः पठितास्ते सर्वे आवसथ्याधानवाच्याः॥ एवं सति संस्कारे [illegible] देशाच्चावसि नावसथ्यता। अ
तः सकलकर्मसमुदायवृत्तिः॥ तथा च कारिकायां। अग्न्याधेयस्य मध्ये च वि[illegible] किं विधीयते। प्र
यश्चित्तं न विधेत आधानावृत्तिरिष्यते॥ तत्राग्निमंथनादूर्ध्वं विच्छेदे मंथनादि तु॥ श्रौतेन तद्वदेव
र्मं पूर्ववन्नांदिकं विनेति। अत्र वदामः॥ कश्चित्संस्कारोंगवान्भवति। यथा पूर्णाहुति होमे। आज्यादि
द्रव्यगुणाधेगं॥ चरुर्वा हुतोवरसंस्काराः॥ पर्यग्निकरणादि॥ यस्यैवांगिनो गोपचारस्तस्यैवावृत्तिर्यु
क्ता। तथा न सकलस्याधानस्येति॥ न तु प्रायश्चित्तमिति केचिदाहुः॥ युक्तरूपं चैतत्॥ ॥इत्या
वसथ्याधानं॥ ॥आधानमध्ये पत्नी रजस्वला तदा विशेषः कारिकायां। अग्न्याधेये प्रदानाच्चे
दाधाने स्त्री रजस्वला। तच्छुद्धौ पुनराधानं मात् पूर्णेन पूर्वकं। स्यातां ते अरणी तत्र योनिः सैवतो

व ५ लै ५

त्रेरस्तथा॥ आधानानंतरं चेत्स्याद्रजो पुत्राकपंचनामणिकादिनकर्त्तव्यमृषिदेवोऽब्रवीदिदं॥ आधा
नाग्रलाणहूं धितस्मात्त्रैवसूतकं। मणिकादिनकर्त्तव्यं कुर्यादेकादशेऽहनि॥ बौधायनमतादेवं आ
रब्धानमतादपि॥ अत्र प्रापाप्तिर्नेदेवलाब्धि॥ पत्न्यां रजस्वलायां सूतिकायां वा प्रारब्धं कर्म क्रियत एवेति
गदाधरः॥ तथा त्रिकांडमंडनः। रजोदोषे समुत्पन्ने सूतके मृतकेऽपि वा। नित्यं नैमित्तिकं कुर्यात्काम्यं
कर्म न किंचन॥ आधानं पुनराधानं पुनः सौत्रामणी तथा। चातुर्मास्यानि सोमश्च तथैवाग्रयणक्रिया
। अकाम्यत्वेऽपि नै तेषां सूतकादावनुष्ठितिः। प्रक्रांतेषु सूतकादिसमुद्भवे। कर्त्तव्यान्येव येतानि कां
रितान्यप्यशेषत इति॥ अतः प्रारब्धे स्वस्य सूतकरजोदोषाद्दाववप्यनुष्ठानमेव युक्तं। न स्मृद्धिप्रतीक्षणं।
कारिकारमते तु आधाने न भवतीत्युक्तमेव पूर्वं॥ ॥ अथ पुनराधाननिमित्तानि लिख्यंते॥ ॥
अग्नावनुगते पत्न्या होमकालद्वयं व्रजेत॥ उभयोर्विप्रवासे वा लौकिकोऽग्निर्विधीयते॥१॥ अनेनाविना
समारूढे ऊर्ध्वं शम्यापरासनात्॥ हुतोऽग्निर्लौकिको ज्ञेयः [illegible] कृतौ सर्वे

चैतेषु

राम

॥ धर॥
॥३१॥

त्रेदर्शनात्॥२॥ कुरुक्षेत्रादितीर्थानां गमने देशविप्लवे॥ समारोपं विनैवाग्नीन्नो देहे पूर्वपश्चितः॥ आ
रोप्याग्नीन् अरण्योः स्वानुद्रवस्येत्सहाग्निभिः॥३॥ दृष्टोग्निर्यदि नश्येत मथ्यमानो हुताशनः॥ ग्रामात्सी
मांतरं गच्छेत् स्वतन्त्रो हव्यवाहनः॥ अहुतो वत्सरं तिष्ठेत् कुण्डकेन श्रमं गतः॥ त्रिः संपन्नो गृहे येऽग्नीन् पुन
राधानमर्हति॥ अग्निहोत्रेण रहितः पंचाशत्योजनं॥ आहिताग्निः प्रयायाच्छेदग्निहोत्रं विन
श्यति॥४॥ अब्दं स्वपमंजुकन्यालावये द्विगादिना॥ तस्यास्यात्तु पुनराधेयं पावित्रेष्टिरथापि वा॥५॥ वि[illegible]
यग्निं सभार्यश्चेत्सीमामुल्लंघ्य गच्छति॥ होमकालात्ययेतस्य पुनराधानमिष्यते॥६॥ अरण्योः द्वा
यना शाग्निं गृहेष्वग्निं समाहितः॥ पाल्ययेत्पुण्यं तस्मिन्पुनराधानमिष्यते॥७॥ ज्येष्ठा वेद्वल्गुना
ये स्यात्यतिर्वारेण गच्छति॥ पुनराधानमत्रैक इच्छन्ति नेतु सूरयः॥८॥ गृहपित्वाग्निर्मिश्रार्यौ स
दत्नी पूर्वसंस्थितां॥ पात्रेस्वापाग्निमादध्यात्कृतदारो विलंबतः॥९॥ गृहपित्वाग्निहोत्रेण त्रिपं
नत्नवती पतिः॥ आहरेद्विधिवद्दारानग्नींश्चैवाविलंबयन्॥ जीवंत्यामपि ज्येष्ठायां द्वितीयपरिणये

ति स्तु सु हैौन ६

तो उत्सर्गेष्वाग्नीनुत्सृज्यान्यपासह पुनराधानादिति चंद्रिकायां ॥ जायायां विद्यमानायां द्वितीयास्तु
द्वहे यदि । तदावैवाह्निके कर्म कुर्यादावसथ्योग्निमान् ॥११॥ उपघातस्त्रिपाल्लोप उपेक्षाव प्रमादतः ॥
चतुर्विधमिदं प्रोक्तं पुनराधानकारणं ॥१२॥ प्रसिद्धः कर्मणां लोप उपघातो न्यजादिना । उपेक्षणं प्र
वासादि प्रमादोग्नेरधारणं ॥१३॥ सपत्नीकोग्निर्यदि चोऽलिरुदकादिभिरेवका उपघाते तु सर्वेषु पुन
स्तवेति सर्विधनं ॥ यजमानस्य पत्नी चेदुच्चैः प्रवसितौ यदी ॥ त्रिहोमात्र निवर्त्तेत पुनराधानमर्हति ॥
॥१४॥ यदैवात्रावपतिक्रम्यसीमां प्रत्यागतो पुनः ॥ होमकालमतिक्रम्य तदा न दोष इति वक्तृपः ॥१५॥ वि
नाग्नेर्निर्यदा पत्नीनदीमंबुधिगामिनी ॥ अतिक्रामेत्तदाग्नीनां विनाशः स्यादिति स्मृतिः ॥१६॥
पत्न्यंतरेष्ववाप्तौ हुताशाने समीप [illegible] गतदा पत्नीयथाकाममतिक्रामेन्नदीमपि ॥१७॥ पत्नी
सीमामतिक्रांता यजमानो गृहे यदि ॥ त्रिहोमाद्यदिनागच्छेत्पुनराधानमर्हति ॥१८॥ एकाकिनी यदा प
त्नी वन्हिमादाय गच्छति ॥ तत्र नाशोपरे त्वाहुर्नेयाधानेन दुष्यति ॥१९॥ स्त्रीदोषे समुत्पन्ने नैमित्तके

दे

रा म

॥ ५२ ॥

॥ ३२ ॥

मृतके पि वा ॥ प्रवसन्नग्निमान्विप्रः पुनराधानमर्हति ॥ २० ॥ बह्वीनामपि चैकस्यामुदक्यायां तु न व्रजे
त् ॥ एकादशाश्च तु स्त्रीर्नि गंतुमिच्छन्निमित्ततः ॥ २१ ॥ त्रयीमुत्क्रात्तु यो लोभात्प्रवसेत्सर्वसंधिषु । करोति
पुनराधानं प्रायश्चित्तमणाहुतौ ॥ २२ ॥ नाग्निकायस्य वेलायां प्रवसेन्नच पर्वणि । अविनाच निमि
त्तेन क्रीडार्थं तु न व्रजेत ॥ २३ ॥ नदीसंतरणे ग्नीनां सीमातिक्रमणे तथा ॥ सर्वत्राधीतसीम्नो वी
स्वामिस्पृष्टाः स्युरग्नयः ॥ २४ ॥ प्रसह्य मरणे ह्यासं स्वान्यपाग्निविनाशने ॥ आत्मारंभ्रणपक्षे तु न
चारंभणमिष्यते ॥ २५ ॥ तत्र नान्वारभ्ने दग्निं पुनराधिरुदाहृता ॥ न वा पारं च णं किंचित्स्त्रीगाद्यादनि
र्वधनात् ॥ २६ ॥ उदक्याचेद्भवेत्पत्नी प्रसूता प्रवसत्यपि ॥ अन्वारंभं विकल्पत्वात्तु न राधिनेत न्मतान
॥ २७ ॥ [illegible] रभ्ने तेव न्हिं बहुना यस्य तेन तरा ॥ नरुध्ये कामिनी पत्नी प्रयायाद्दग्निभिः सहार्य ॥
राष्ट्रच्छन्ने शो[illegible] प्राप्ता वुषितेयानमीदृशी ॥ अन्यथा हि प्रवसेत्तां वन्केयोल्लोकिकाः स्वन्तु ॥ २८ ॥ राष्ट्रभ्रं
[illegible]दिगमने ग्रामे देशे मनस्यती ॥ जुहुयाच्च तु रातेः स्मार्ते ग्नौ सर्वमीरितं ॥ २९ सायं प्रातर्हुते सर्वे मे
न

ममनेनाह। परस्त्वग्न्याधेयमात्मार्थं कृतवान्मृतेन्नार्यकः॥२१॥ पत्नीविरहितो वन्हौ नूयपाकामं
नि हरेत्॥ होमद्वयात्ययेदर्शपूर्णमासात्ययेतथा। पुनरेवाग्निमादध्यादिति भार्गवशासनं।२२॥
वहुधाविहृतास्वेग्निरावसथ्यात्कथंचन। यावद्देवोपितिष्ठेत्तावदन्नो न मण्यते।२३॥ वैश्वदेवान्न
पाकमात्मार्थिनेवमंथनं। एकेनांतरितो वन्हिरावसथ्यात्क मण्यते।२४॥ आवसथ्याल्लौकिकमौपयो
ग्निरु क्रियते क्वचित्॥ पूर्वेणापोज पिवातेतस्मिन्को मा विधीयते।२५॥ चतुर्विंशतिमते। प्रातर्होमंतु नि
र्वर्त्य समुद्धृत्य हुताशनात्॥ शेषं महानसे कृत्वा तत्र पाकं समाचरेत्॥२६॥ ततोस्मिन्वैश्वदेवा
दिकमकुर्यादिति स्थितिः॥ वह्वृचकारिकायां॥ नित्यपाकाय शालाग्नेरेकदेशस्य कारयेत्॥ पाकार्थमुल्मु
कं हृत्वा तत्र पत्नी महानसे।२७। वैश्वदेवो ग्न्यगारिस्यात्सा कार्याग्निश्च लौकिकः। अपि पाको न वेद्य
त्र श्राद्धं हाहवृत्तं वैश्वदेवं च॥२८॥ कृतेग्न्ये वैश्वदेवे पत्नी लौकिको नैव कार्यते॥ होमेनांतरिते केचिदाहु
सर्वत्र लौकिकं॥४०॥ न तत्समं जसं तेषामपपड्डे मदर्शनात्॥४०॥ समासे चोल्मुकस्याहुरग्न्या

तमग्निं पुनराहृत्य शालाग्नावेव निक्षिपेत्॥८

राम

॥पर॥
॥२२॥

गारे मथनं स्यात् ॥ पाकांते वैश्वदेवात्प्राक्चेत् दग्धुपपद्येत ॥४१॥ अग्नौ हुते धुल्मुके पाकः त्वाग्निरेव
दत्तपतेपत्नी ॥ वचनात् हृतिः सा तु लौकिकस्त्वपवर्गतः ॥४२॥ दीपको धूपकश्चैव तापार्थं यश्च नीयते ॥ स
र्वे ते लौकिका ज्ञेयास्तावन्मात्रापवर्गतः ॥४३॥ पचनाग्नेरुपच्छेदं त्रैसूतके मृतकेपि वा ॥ अपत्काले तु वसे
द्रात्रिं पुनराधानमेति ॥४४॥ अरण्योर्दग्धयोर्वापि नष्टयोः क्षीणयोस्तथा ॥ आहत्यान्ये समारोप्य पुन
स्तत्रैव निर्मथेत् ॥४५ अरण्योर्नूत्नमप्यग्निं यावत्तिष्ठति पूर्वयोः ॥ न तावत्पुनराधानमन्यारण्योर्वि
धीयते ॥४६॥ पूर्वैव योनिः पूर्वावृत पुनराधानकर्मणि ॥४७॥ एकाकिनी यदा पत्नी कदाचिद्ग्राम
माव्रजेत् ॥ होमकाले त्विसंप्राप्ता न सा दोषेण युज्यते ॥४८॥ अपत त्रैव निवसेद्ग्रामं गत्वा प्रमादतः ॥ लौ
किकोग्निः स विज्ञेयः इत्येषा नैगमे श्रुतिः ॥४९ भार्यायां प्रोषितायां चेद् देशकालमेति वा ॥ तत्रस्य
स्तु न राधेयमन्यैर्ब्राह्मणैरन्यथा ॥५०॥ पत्न्याः प्रवासविषये पुनराधिरुदाहृता ॥ वाक्ये मनीषिभिः
ने हैरेकत्वार्पस्य सेव्यते ॥५१॥ बहुभार्यस्य ज्येष्ठा चेत्प्रवसेत्पुनराहितिः ॥ ज्येष्ठा चेदग्निसंपृक्ता ग

५ ह

स न्यायपारविः ॥५२॥ यजमानेन सहिता यद्वा ता एव केवलाः ॥ एकस्यामप्यतिष्ठं सामग्निहोत्रस
मीपतः ॥५३॥ पतिस्तिष्ठति चेदग्निनाशो नेत्यपरे जगुः ॥ यदा सीमामतिक्रम्य रात्रौ तत्रैव [illegible]न्न स्य
ति ॥५४॥ सगृहस्य प्रयाणं पत्न्या वासस्तूच्यते बुधैः ॥ पत्नारायणेनोक्तं ग्रामाद्यग्निसमन्विता न ॥ ग
त्वा ग्रामांतरे वासः प्रवासोऽयमीदृशः ॥५५॥ ग्रामांतरे नगर्यां वा पत्न्यां वान्यत्र वा क्वचित् ॥ सीमाम
तीत्यैव रात्रौ वासः प्रवसनं स्मृतं ॥५६॥ प्रवसेद्धनसंपत्त्यै न तीर्थाय कदाचन ॥ इति कूर्मपुराणे को
त्पा वो घापने न च ॥५७॥ साग्निर्वा सपत्नीको गच्छेत्तीर्थानि मानवः ॥ पुराणवचनात्साग्नेः प्र
वासोऽस्तीति केचन ॥५८॥ न कुर्युरग्न्युपस्थानं प्रवत्स्य[illegible]पि योषितः ॥ त्यागान्न शोषिताः कुर्युरग्नं
सेवस्व धर्मके ॥५९॥ आगतोपस्थितिं चापि स्त्रीणां नेच्छंति सूरयः ॥ सगृहस्य प्रयाणं पत्न्यास्त्वग्नि
समन्वितं ॥६०॥ क्लिष्टश्चेत्तत्तनुं वस्त्रं यमनसा सह गच्छति ॥ ग्रनस्यारोपयेदग्नीस्त्वत्सात्त्राणपितत्र
च ॥६१॥ स्त्रीं गैव नवा नयेदग्निं कास्यापन मताद्यपि ॥ न येद्वा ब्राह्मणस्तन्यायोपा[illegible]न समन्वि

ष्णा

राम

॥५२॥
॥३४॥

२ सा

तः॥६२॥ प्रत्यक्षेण न पत्न्यग्निमुद्धृत्य सेवेदि न नृपति॥ यदि वानुद्धृत्य सत्यौ तौ निधायोद्धृत्य सा तं पुनः॥६३
हरेदनुद्धृत्य सत्येवं न श्रेयस्त्रिहरणे न लः॥ शाकटेनापि हरेद्वा रुरे देवं यथा रुचि॥६४॥ स्वांगे नैवाप्यवा नाम्य
परोत्सङ्गे ये द्धृत्य सनाकर्मार्थं हरणे ग्नीनां नानानुद्धृत्य सादिच्यो घते॥६५॥ कात्यायनमतीत्यो घिद्धृत्य संतोप्य
ति हरतः॥ प्रत्यक्षेण न पंत्य ग्नीन्नृ शाकटेन विनापि तु॥६६॥ आधानावसरे जाते प घाधातु रूपद्रवः॥
गृह्याद्विनामसा प्रोक्तात त्रस्या पुरनां हितिं॥६७॥ उद्धाते ग्नौ विहारात्प्राक् मध्यमाने प्रजन्मनि। लौकाग्न्या
दावनिर्मिते च्युदये स्तमयेपि वा॥६८॥ विनष्टहेतुनानेन जातवेदा विन नृपति। विहारोत्तरकालं वा न
ष्टो पूर्वापरानलौ॥६९॥ शेषं पूर्वोदितं सर्वं तत्राप्यग्नावि न नृपति॥ कालात्यये वनिमप्यलौका
ग्न्यादिन्नि पे यदि॥७०॥ उदयास्तमयात्पूर्वं कर्कीत्रानात्रामिच्छति॥ लौकाग्न्यादावलक्षेपि पुराको
त्तमयोदयात्॥७१॥ मंपनारं न मात्रेण नाशो वह्नेर्निवारितः। उभयोर्नाशविज्ञानाद्धर्मं कीस्तमेति
..॥७२॥ कर्कीग्नि नाशमाचष्टे पश्चाज्जातेपि नेच्छति॥ एकयोनित्वपक्षेपि सर्वाग्न्यनुगमा यदि॥

॥ ३६ यास्तमयेत त्वनाश्य मेकेन तत्त्वयोः ॥ ग्रपवेदुत्त्वयो घाते स्तु द या स्तमयात्पुरा ॥ ७४ ॥ पुनरोग्निरे
को जातश्चेत्तावतापि नन त्रपति ॥ तदनुस्मृत्ति मात्रेण स्याद्दग्न्याधिर्न पूर्वयोः ॥ ७५ ॥ मंत्रं विना समारूढो र
णौ रात्मनि वापदि ॥ ७६ ॥ तत्र ज्वलन शांतो स्यादिस मारूढ शांतिवत् ॥ ७६ ॥ आरूढोपि यदा त्वा स्व मवरू
ढो न त्वा स्त्रित ॥ तत्ताये होम कालेप्य संप्राप्ते पुनराहितिः ॥ ७७ ॥ यदा तु लौकिकाग्न्यादि निधाय हवनं
न दा ॥ हुतेपि लौकिकाग्न्या होम मप्य मानो प्यनंतरं ॥ ७८ ॥ द्वितीये [illegible] त
तीया द्वा होम कालात्पुरापदि ॥ अग्निर्न ज्ञायते तत्र पुनराधेय माचरेत् ॥ ७९ ॥ हुतेषु पञ्चहोमेषु पञ्च
त्वयम नंतरं ॥ कर्त्तव्यं पुनराधेयं मप्य मानो हुताशनः ॥ ८० ॥ द्वादशाहमग्नौ नुगच्छेत् तस्य विनाश
ने ॥ ज्ञात श्चानुगमेच्चा नो पुनर्निर्मथ्य जन्यते ॥ ८१ ॥ न[illegible]मपित मात्रे वा समारोपयज्जुजे पेत ॥ पुन
र्निर्मथ्य जन्म व्यपनुस्तु पावरोहणे ॥ ८२ ॥ जले नष्टे हुतेना वह्नि रूप[illegible]तोयदा त्वेवेत ॥ कर्त्तव्ये पुनरा
धेयं पञ्चपार्श्वे निरूपितं ॥ ८३ ॥ तदेव पुनराधेयमग्नावनुगते सति ॥ असमाधाय चेत्त्वा मासीम

राम

॥ ७२ ॥
१२५ ॥

मुत्सृज्य गच्छति॥८४॥ श्वशूकररासभकाकशृगालैः कङ्कोष्ट्रमर्कटस्पृष्टे त्रेतायां पातकिभिः कृमायैर्वीक्ष्यति
कयापि रजस्वलया॥८५॥ रेतोमूत्रपुरीषैर्वा पूयासृक्श्लेष्मशोणितैः दुष्टास्थिमांसमज्जाभिरन्यैर्वापि जुगुप्सि
ते॥८६॥ आरोपितारणिस्थे वा कृतेऽग्नौ स्पर्शनेऽपि वा॥ आत्मारूढेषु मज्जोषावदेशापातिनादिभिः॥८७॥ अथवा
योषते गच्छेदन्तो काममोहितः॥ वदेत्सु निमित्तेषु केचिदग्निविनाशने॥८८॥ तत्रारणिगते वह्नौ नष्टे स्यात्पु
नराहितिः। इतरेषु निमित्तेषु पुनराधेयं प्रकीर्तितं॥८९॥ पवमानसर्वीपघातेषु पुनस्त्वेति समिंधनं॥ इत्यस्या
स्तुपघातेषु इत्यस्तु सिद्धिः समिंधने॥९०॥ समिंधनं पुनस्त्वादित्यारुद्रा वसव इति मंत्रेण समिदस्याधानैः
पुनरिंधनं प्रदीपेण प्रदीप्ततरकरणं॥९१॥ आरोपितारणी चोच्चे एका वा यदि वनेष्पातितात्तत्राग्न्याधेय
मिर्थति पुनराधेयमेव वा॥९२॥ इत्यनारोपितारण्योः क्षेपे ग्राह्येन वे पुनः॥ तदन्ताज्जेपदेशाया इत्यस्या
स्तु नराहितिं॥९३॥ स्पृष्टो हस्त्यात्स काके स्मपतितामेघ्यरासभैः॥ अनारूढारणिस्यत्रौ नेविहायान्ययोग्र
॥९५ इत्यवतत्राः समेतस्तु मज्जेपेद्दूषितारणी॥ एकारण्येव दुष्टा चेत्तामेवास्तु निमज्जयेत्॥९४॥

...न्तं मुभयानुगमादिना ॥ स्वा...

...न्यारणिनाशात्स्रागुत्पाते पुनराहितिः ॥ काण्डानुध्यावि शेषोध्येवाप्यतेऽशेषेति सं ततो ॥९५॥ नष्टायामरणौ पावदग्निरस्ति ध्रुवति वेश्मनि ॥ तावद्धोमादिकं कुर्यात्तन्नाशे पुनराहरेत् ॥९६॥ प्रागादिष्टो ह्ययं होमः संकल्प्य न जुहोति चेत् ॥ अग्न्याधिः पुनराधिर्वा नो चेदयं स्वाम्यसन्निधौ ॥९७॥ नाशापत्तावग्नीनां यत्र कारणैः पि हा ॥ कुर्यात्पुनराधेयमिति बौधायनोऽब्रवीत् ॥ अत्रैतेषु निमित्तेषु नष्टानां पुनराहितिः ॥९८॥ स्थितानां तु तस्य चान्येषु पुनराधेयमिष्यते ॥९९॥ अग्निहोत्रं च निसेष्टिः पितृयज्ञ इति त्रयं ॥ कर्तव्यं प्रोषिते पत्यौ नान्यत्स्वामिक्रियान्विता ॥१००॥ नैमित्तिकाः स्नातेऽपि गृहदाहेष्टिपूर्वकाः ॥ स्वाम्यागमनपर्यंतमुत्सृष्टव्यमसंज्ञायं ॥१०१॥ मपित्वापौवकं सर्वं प्रायश्चित्तं विधीयते ॥ मिश्रोऽपि त्यादि जिहुत्वा घादशानुगमाहुतीः ॥१०२॥ अग्निहोत्रं यथाकालं नित्येष्टिं वसमाचरेत् ॥ आ स्वाम्यागमनाद्धि ष्ठहागत्या पादधीतसः ॥१०३॥ एकेनावसिच्चातात्प्रोषितस्याग्निषु क्रियाः ॥ अव दृष्टा विनीमत्का धुनावदृष्टमतीतरं ॥१०४॥ काम्याः क्रिया न कर्तव्याः स्वामिनि प्रोषिते सति ॥ नित्यनैमित्तिकीः कुर्यात्स

राम

॥५२॥
॥२६॥

वसत्यपि न्नगरे ॥१०५॥ तदापि नैव कर्त्तव्याः क्रियाः स्मार्तश्रवैदिकाः ॥ आधानं पुनराधानेन नष्टः प्रवासे प्रवा
सिनि ॥१०६॥ उत्तरायनगमादौ तु प्राप्ते ग्नाधेयपतः पुरा ॥ न किंचिदग्निहोत्रादिकं कर्त्तव्यामि दर्शने ॥१०७॥
रजोदोषे समुत्पन्ने सूतके मृतके पि वा ॥ नित्यं नैमित्तिकं कुर्यात्काम्यं कर्म न किंचन ॥१०८॥ आधाने पुन
राधाने पशुः सोत्रामणी तथा ॥ चातुर्मास्यानि सोमश्च तथैवाग्रयणं क्रिया ॥१०९॥ स्मृका लेपि नैते प्रांस
कालावनुष्ठिताः ॥ प्रक्रांतेष्वपि चैतेषु सूतकादिसमुद्भवे ॥११०॥ कर्त्तव्यान्येव चैतानि वारितान्यथ त्रो ब
तः ॥ जातेपि वा विनाजन्म स्वस्य श्रीजातकर्म विना ॥१११॥ प्रायश्चित्तं विना काष्ठमंथने चोदितं विना ॥ लौ
किकः स्यादतो लुप्तादारन्यावर्त्तयेत्सुतः ॥११२॥ यदि नावर्त्तयेद्दत्तो ताहदेव सदूहोति च ॥ हूयमाने पि लु
प्तहोमकालात्कात्ययं ॥११३॥ जन्मस्य श्रीविनाप्येके लौकिकत्वं नमन्यते ॥ होमात्पूर्वकाधिके लुप्तेष्वतोऽप्य
ग्निर्विनश्यति ॥११४॥ अतो ल्पहोमलोपेपि प्रयुक्तायेद्विनश्यति ॥ आधानपुनराधाने विकल्पे नात्र वो
दे ॥११५॥ लुप्ते होमद्वये प्राह्णे लौगाग्निरनलाहिति ॥ ज्वलत्स्वग्निषु कर्त्तव्यातंत्रमते वकेवला ॥

१६॥ आपद्यग्निषु हीयत्सु मासार्धं चेन्न हूयते। सर्वहोमानतिक्रान्तान्यज्ञांतान्प्रहोमवत्॥११७॥ सम
स्य जुहुयात्तस्माद्दिष्टिं संतुमती नवेत्। न तत्र पुनराधेयमिति कौषीतकिश्रुतिः॥११८॥ वत्सरं वत्सरार्धं वा
होममन्लोपमतीतरं। आपत्कालेन न क्षंतिदीपं ते चेकुतावानः॥११९॥ पंचकायोः पुरोडाशाहोमे लुप्ते व
त्सरं॥ पथिकृत्स्यपमाग्नेयः पावकः शुचिरेव च॥१२०॥ व्रतपतिस्तंतुमांश्चाग्नेर्देवतागुणाः क्रमात्। सस
कुर्यात् पुरोडाशाग्निहोमे लुप्ते तु वत्सरं॥१२१॥ पवमानः पावकश्च शुचिं पथिकृदित्यपि॥ वैश्वानरो व्रतप
तिः संतुमानिति सप्तमः॥१२२॥ विशेषितोऽग्निरेवस्यादेवतात्रपथाक्रमं। एकार्थं न्यपराधोऽतविच्छेदे षवि
शेषतः॥१२३॥ मनस्वती व्रतपुतां नाधानमननलेसति। इयमापत्सु घोरासु मि॰ तास्यपपोद्यते॥१२४॥
पाद्दशाहाद्धति च्छेदे कुर्युरन्येमनस्वती॥१२५॥ अरण्योः क्षयनाशाग्निदाहेषग्निं समाहितः॥ पात्यपेद्
प शांते स्मिन्पुनराधानमिष्यते॥ एकारण्यां विनष्टायामस्तिचेदितरारणिः॥१२६॥ तां छित्वा मंथनं
प्राक् त्र्याब्दे वोधायनीयकं॥ अरणीमंथनात्सूक्ते जं तु निर्मंथनेन वा॥१२७॥ स्यातां चेदरणीन्नेगृ

राम
सि

॥ भर॥
॥१२७॥

हेशास्त्रोक्तलक्षणे॥ स्वाभ्युदिते नुष्ठिते ह्येतस्मिन्नूजीर्णारणिद्वयं॥ शकलीकृत्य पाश्चात्ये वन्हौ निक्षिप्य दी
पयेत्॥ ततो दक्षिणहस्तेन नूतनामुत्तरारणिं॥२९॥ गृहीत्वा सव्यहस्तेन गृह्णीयादधरारणिं॥ तेउभे अरणी
ते चदीप्तेग्नौ धारयन्जपेत्॥३०॥ उद्बुध्यस्वाग्न इत्येतद् यत्ते योनिरित्यपि॥ उद्बुध्यस्वाग्ने प्रविशेत्यस्य योनि
मन्त्रा देवयज्यायेवोढ वेजातवेदः॥ अरण्योररणी अनु संक्रमेत्संजीर्णेतनुमंत्री एपानि
णि दक्षेतिप्रथमोमंत्रः॥ मंथयित्वा ततः सम्यक् मप्रिवाम्बिविहस्तव॥३२॥ विल्वाप्याम्लवदर्चीच्यां स्त
च्याहायत्वनुगेघतं॥ जुहोत्याहवनीयेग्नौ मनस्वेत्याघृतंयशा॥३३॥ इष्टिं तंतुमतीं कुर्यात् छ रावेददक्षि
णाददेत्॥ वत्संप्रादेशमात्रं तु नारावं निगमोदितं॥३४॥ इत्यनारोपितारण्योः क्षये ग्राह्ये न वै पुनः॥
॥३५॥ तद्दत्वा नेपदेदोषायेत्तदस्यास्त्तनराहितिः। कामे निमित्तप्रयोगे वा पुनराधेयमिष्यते॥३५॥ निमित्ते
षु पापयोगमाधानमपिवाञ्चवेत्॥ तत्रयेषु निमित्तेषु प्रसंगग्राहिकया विधिः॥३६॥ तत्रैव पुनराधि
न्यपाधानमिष्यते॥ अन्यत्राप्यपरे प्राहुः पुनराधिविकल्पतः॥३७॥ यदि त्वं जीवनायालं स्यं

...कवत्सरं ॥ तन्नाशेऽपुत्र मर्त्यापांशाती नामवरोधने ॥ ३८ ॥ अंगनाशैं गनानाशेऽपुनराधानमिष्यते
॥ ज्यानिः सर्वत्रैहानिः स्यान्मरणं माघ्यंदिनि मते ॥ ३९ ॥ पुत्रान्यन्नानि कुर्वीत तस्माद्धानो विमत्सरः । न
त्वल्पदक्षिणो यज्ञैर्यजेतेह कथंचन ॥ ४० ॥ इंद्रियाणि पशून् स्वर्गमायुः कीर्तिं प्रजां पशून् ॥ हंत्यल्पेन धनेनै
वविप्रानल्पधनोपजन् ॥ ४१ ॥ ॥ इति पुनराधानप्रमराधेपयानि मितानि ॥ ॥ अथ पुनराधा
नेपदापक्रमः ॥ ॥ तत्र प्रमादाद्विरात्रमग्नित्यागे प्राणायामशतं विंशति रात्रे एकादिनोपवासः । मा
सद्वयेत्रिरात्रमुपवासः । अर्द्धप्राजापत्यकृच्छ्रः । एवं त्यागानुसारेण प्रायश्चित्तं केचित्पुनराधानेच्छा
त्तेस्यादिनावृद्धि पर्वकमाग्नित्यागे तत्कालानुसारेण दंवादि प्रायश्चित्तं द्वादशाहपर्यंते त्रिरात्रमुपवासः ।
मासपर्यंते द्वादशरात्रमुपवासः । अर्द्धकृपर्यंते मासं पयोव्रते द्विवर्षपर्यंते चांद्रायणं । ...पर्यंते चांद्रायणं से
मायनं च ॥ तदूर्ध्वमब्दकृच्छ्रं धानि नौ गौदानं चेति प्रयोगपारिजाते ॥ स्मृत्यर्थसारे तु ॥ द्वादशाहातिक्र
मे त्र्यहमुपवासः मासातिक्रमे द्वादशाहमुपवासः ॥ संवत्सरातिक्रमे मासमुपवासः पयोव्रतेन वा

राम

वेति विशेषः ॥ एवं कालविलंबे संकल्पपूर्वकं प्रायश्चित्तं कृत्वा पुनराधानं ॥ पत्न्युपेतेनैव श्रित्रिमित्तेना
ग्निनाशः कालविलंबश्च नास्ति तत्र प्रायश्चित्तमकृत्वैव पुनराधानं ॥ निसर्जितयो विधाय देशकालौ सं
कीर्त्य तावंतं कालमावसथ्याग्निविछेदजनितप्रत्यवायपरिहारार्थं एतावत्प्रायश्चित्तममुकप्रत्याम्नायेन
नाहं करिष्य इति संकल्प्य ॥ त्नुप्तानां होमानां तंडुलादिद्रव्यं ब्राह्मणाय संप्रददे इति होमद्रव्यं दद्यात् ॥ सायं
प्रातर्होमानां तण्डुलादिद्रव्यप्र ए मासस्थालीपाकानां संप्रतिपर्वाणं व्रीह्यादिद्रव्यमाज्यं चरुद्रव्यादिति प्रयो
गरत्ने ॥ ततः शुचौ काले शुचिराचांतः प्राणानायम्य देशकालौ संकीर्त्याविछिन्नावसथ्यस्य पुनराधानं
करिष्य इति संकल्प्य ॥ नांदीश्राद्धं चावं ॥ स्वरेपं चभूसंस्कारादि ब्राह्मणतर्पणांतं माधानवत्सर्वं कार्यं
॥ अथ पत्न्याः पत्युः प्रवासप्र सक्तोग्निसमारोपविधिः ॥ प्रातर्होमानंतरमरणिद्वयमयं ते योनिरिति मं
त्रेणावसथ्ये व्रतपतीत्यरणिप्रदेशे समारोपः ॥ आहरणपदेनेत्ययं ते योनिरिति मंत्रेणाश्वत्थसमिधं म
थ्ये व्रतपति ॥ अथ वा यातेअग्नेयज्ञियातनूस्तपेयारोहात्मात्मानमच्छावसूनि कृण्वन्नस्मे नर्या

य

...णि पञ्चोत्क्रान्तावपन्नमासीद्यस्यां योनिर्जातवेदो भुवस्त्राजायमानः स ब्रह्मय एहीति मंत्रेण पाणी प्रतप्या
ग्निं समारोपयेत् । तत्र प्राङ्गुद्धरणकाले चारणी समारोपे अरणीनिमित्या प्रत्यवरोह जातवेदः पुनस्त्वं
देवेभ्यो हव्यं वह नः प्रजानन् ॥ प्रजां पुष्टिं रयिमस्मासु धेह्यथा भव यजमानाय शं योः ॥ इत्यनेन रवरे
ग्निं स्थापनं ॥ अथ स्वस्य समित्समारोपणे वैश्यादि गृहादिस्थि माहृत्य रवरे पंचाग्ने यान्संस्कारान्कृत्वा
ग्निं स्थापयित्वा प्रत्यवरोहेति मंत्रे [illegible] णतां समिधमग्नौ निदध्यात् ॥ आत्मसमारोपपक्षे सर्वं गृह्य इप
स्पर्शनेऽजलेनिमज्जनेस्नाने स्त्रीगमनं चाकुर्वन्मूत्रपुरीषोत्सर्गे शौचमकलात्तिरकाले मतिष्ठंतः अहे
मकाले आत्मसमारूढमग्निमुष्णासरूपेण प्रत्यवरोहेति मंत्रेण लौकिकाग्नौ निदध्यात् । एवं य
थाधिकारमग्निं प्रतिष्ठाप्य होमं कुर्यात् ॥ इदं समारोपणं द्वादशरात्रपर्यंतमेव कुर्यादिति प्रयोगरत्ने ॥
कात्यायनानां त्वरणि समारोपः श्रौते दृष्टांतत्वत्स्मार्तेपि कार्य उक्तवानिति त्रिपिष्टाः ॥ समित्समारोपणे पि
अयं ते योनिरिति मंत्रेण समारोप्य प्राङ्गुद्धरणकाले लौकिकमग्निं स्थापयित्वा तत्र तां समिधमादध्या

राम

॥५२॥

॥३९॥

दिति रक्ष्यां ॥ वस्तेनस्नो कातीयानामपि समित्समारोपः शाखांतरोक्त एव भवति [illegible] स्व
शाखायां समित्समारोपस्यानुक्तत्वात् आवसथ्याधानं दारकाल इत्युक्तं दारग्रहणे कर्म्यं क्रियते तत उ
च्यते । तत्र च वरस्यार्घ्यदानं स्मर्यते तेन तत्संगेन प्रावंतो र्घ्यास्ते कथ्यंते ॥ ॥ षडर्घ्या भवंति ॥ ॥ अर्हपू
जायामिति धातोर्भावे घञ्प्रत्ययः । न्यंकादित्वात्कुत्वं । ततो दंडादिभ्यो यदिति यत्प्रत्ययः । अर्घमर्हंतीत्य
र्घ्याः षट् पुरुषा अर्घ्या भवंतीत्यर्थः ॥ तानाह ॥ ॥ आचार्यऋत्विग्विवाह्यो राजा प्रियः स्नातक इ
ति ॥ ॥ उपनयनपूर्वकं कृत्स्नं वेदमध्यापयति स आचार्यः । लौकिकयोः दक्षिणापरिक्रीतः कर्माणि करो
ति । विवाह्यो जामाता । राजा दंडप्रवर्तकं परिपालनकर्त्ता ॥ प्रियो इष्टः उत्कृष्टः ज्ञातिः समानजातिर्वा ॥ स्ना
तको व्रतचर्यात्समावर्त्तः तस्य विवाहेण मात्राचार्यकर्तृके स्मृतं । तं प्रतीतं स्वधर्मेण ब्रह्मदायहरं पितुः ॥ स्र
ग्विणं तल्प आसीनमर्चयेत्प्रथमं गवेति ॥ पूर्वसूत्रेषु ह्यग्रहणं प्रियस्नातकयोः एष पत्वोदाप नार्ये ॥ ६ ॥
[illegible]तिसंवत्सरानर्हयेयुः ॥ ॥ प्रतिसंवत्सरं गृहे आगतानाचार्यादीनर्घेणार्चयेयुः । न संवत्सरादर्वा

॥ प्रतिसंवत्सरान्हर्येयुरित्यविशेषेणोक्तत्वादृत्विजोपि संवत्सरांतेऽर्हयितव्या इति प्राप्ते आह ॥ ॥
यज्ञमानाणरुत्विजः ॥ ॥ ऋत्विजस्तु प्रयज्ञमाणे यागकाल एव पूज्याः ॥ न ततोन्यत्रा इदं सूत्रं हवि
हरेणान्यथाव्याख्यातं ॥ यज्ञं करिष्यंतो यजमानाः ॥ ऋत्विजो याजकानिति ॥ पूजनीया उक्तौ कालस्म
इदानीमर्हणप्रकारमाह ॥ ॥ आसनमाहार्याह साधुभवानास्तामर्चयिष्यामो भवंतमिति ॥
अर्घ्यासनं पीठादि आसनमावाहरेति माह प्रैषपूर्वकं अनुचरद्वारानीय साधुभवानिसर्घयि
तामर्घ्यं प्रतिवदति ॥ अर्घ्यप्रत्यध्येषणमेतत् ॥ ॥ आहरंति विष्टरं पद्यं पादार्थमुदकमर्घ्यमाचम
नीयमधुपर्कं दधिमधुघृतमपिहितं कांस्ये कांस्येन ॥ ॥ बहुवचनादर्घ्यपितुः पुरुषाः वि
ष्टरादीन्याहरंति ॥ तत्र विष्टरास्त्रिवृद्दरत्निमात्रः कौशो रज्जुविशेष इत्यन्ये पक्षः ॥ प्रादेशांशि
वृंतं कौशं वा काशं वा निर्मितमिति रेणुकः ॥ पंचविंशतिदर्भतरुणमयं कूर्चमिति हरिहरः ॥ श्वाश
ङ्गिन्नेव कूर्मात दर्घेन तु विष्टर इति परिशिष्टात् ॥ पादयोरन्यमिति वचनादत्र द्वयोराह रण

राम
ति२
॥धर॥
॥४०॥

मितित्रिर्वदन्॥ पद्यं पादयोरधस्तान्निधानार्थं विष्टरं॥ त्रिर्वदन्मते पादप्रक्षालनार्थमुदकं पद्यशब्देन॥
पादार्थमुदकं सुखोष्णं॥ अर्घशब्देनोदपात्रमेवोच्यते॥ तदेकमुदपात्रमुपनिनयेतियपाराशरग्रागता
यादकमाहरेदेवंतदिति लिंगात्॥ उदकगंधपुष्पाक्षतवदराणीमिति त्रिर्वदन्॥ गंधपुष्पाक्षतकुरा
तैतिलयवत्रसर्षपदूर्वादध्यन्वितं सुवर्णादिपात्रस्थमिति हरिहरः॥ आचमनीयमाचमनार्थमुद
कमेव॥ दधि मधु घृतं एकस्मिन्कांस्यपात्रे कृतमपरेण पिहितं मधुपर्कशब्देनोच्यते॥ मधुपर्के दध्यला
भे पयो जलं वा प्रतिनिधिः॥ मध्वलाभे घृतं गुडो वेत्याश्वलायनः॥ ॥ अन्यास्त्रिस्त्रिः प्राह विष्टरादीति॥
॥ ॥ अर्घपितुर्व्यतिरिक्तोन्यो विष्टरादीनि द्रव्याणि त्रिस्त्रिवारत्रयं वदति विष्टरो विष्टरो विष्टरः प्रति
गृह्यतामित्येवं॥ ॥ विष्टरं प्रतिगृह्णाति वर्ष्मोस्मि समानानामुद्यतामिव सूर्यः॥ इमंतमभितिष्ठामि
यो मा कश्चाभिदासतीत्येनमभ्युपविशति॥ ॥ ततोऽर्घ्योऽर्घपितुः सकाशाद्विष्टरं तस्मीमेव प्रतिगृह्यते
विष्टरं न्यासनेनिधाय वर्ष्मोस्मीति मंत्रेणोपविशति॥ गृहणोपवेशनयोर्मध्ये पठितोपि मंत्र इमंत

...नेति प्रथमातिलिंगादुपवेशने विनियुज्यते॥ पाणिभ्यां विष्टरप्रतिग्रहः इति हरिहरः। तदतीव मंदं। प्रमाणा
भावात्॥ मंत्रस्याप्यर्थः॥ अर्घ्यगात्मानं स्तौति अर्घ्यलापकुलज्ञानाचारवपुर्वयोगुणैरहं समानानां स
जातीयानां मध्ये व... श्रेष्ठः ज्येष्ठः अस्मि भवामि उद्यतां उदयं प्रकाशं कुर्वतां ग्रहनक्षत्रादीनां मध्ये स
र्य इव॥ किंच। इमं विष्टरं तं पुरुषमुद्दिश्यापि विष्टरवत् अवबध्य अभिलक्षीकृत्य तिष्ठामि अधःकृत्वा पर्युपाविशामि
यः कश्चन मां मां अभिदासति उपक्षीणं कर्तुमिच्छति॥ ... उप ... ये॥ ॥पादयोरन्यं विष्टरमासी
नाय॥ ॥विष्टरे आसीनाय उपविष्टाय पाद्यार्थं पादयोरधस्तात्त्रिधा नार्पयमन्यं विष्टरं ददाति। एतच्च
पादप्रक्षालनोत्तरं द्रष्टव्यं तत्पासति द्रष्टार्पितास्यात्॥ प्रक्षाल्या हि पादौ विष्टरे क्षिपेत इति। तेनात्राप्यर्थे
न पाठक्रमबाधः। तदुक्तं विरोधे पर्यस्तत्व्यवरत्वादिति॥ ॥सव्यं ... पादं प्रक्षाल्य दक्षिणं प्रक्षालयति ब्रा
ह्मणश्चेद्दक्षिणं प्रथममेव विराजो दोहोसि विराजो दोहमशीय मयि पाद्यायै विराजो दोह इति॥ ॥ततः
पाद्यं प्रति गत्वा विराजो दोहोसीति मंत्रेण सव्यं पादं पादं प्रक्षाल्य दक्षिणं प्रक्षालयति ब्राह्मणे त्रियादि दर्घ्यः॥

राम
मधुपर
२।४१।८

ब्रह्मार्पणोर्घः स्यान्नदादक्षिणं पादं प्रथमं प्रक्षाल्य ततः सव्यं प्रक्षालयति॥ मंत्रार्थः॥ प्राणधारणादिगुणैः सक
लसौहित्येन विविधतया राजत इति विराडन्नं तस्य विराजो दोहः परिणामसारो रसः स त्वं अस्मिन्नवसि।
हे उदक तं त्वां विराजो दोहं अशीय॥ अस्तुवे। व्यामुयो॥ किंवा मयि विषपेयापाद्या पादयोः स्याद्धासपर्यातस्ये
तदर्घ्यं विराजो दोहः मंत्रसंस्कृतं जलं नवेति बोधः॥ ॥ अर्घं प्रतिगृह्णात्यापः स्थ युष्माभिः सर्वान्कामान
वाप्नवानीति॥ ॥ अर्घः समर्पितमर्घं प्रतिगृह्णाति आपः स्थ युष्माभिरिति मंत्रेण॥ मंत्रार्थः॥ हे आप
यूयं आपः स्थ। आप्तिहेतवः अतः युष्माभिः कृत्वा सर्वान्कामानभीप्सितार्थानहं अवाप्नवानि इत्यर्थः॥ ०॥
निनयन्नभिमंत्रयते समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत॥ अरिष्टा अस्माकं वीरा मा परासिचि मत्प
यशति॥ ॥तमर्घं अक्षमो निनयन् आपपन्नभिमंत्रयते समुद्रं व इति मंत्रेण॥ ननु मंत्री ते॥ अर्घं शि
रसाभिवंद्य प्रागुदग्वा निनयनमिति वासुदेवः॥ मंत्रार्थः॥ आपः वो युष्मान् समुद्रं प्रहिणोमि गम
यामि॥ अतः स्वां योनिं स्वकारणं अभिगच्छत समुद्रं अभिलक्ष्यीकृत्य गच्छत व्रजत॥ किंच युष्मत्प्रसादाद्वास्माकं वी

ल

हे २

पुत्रा भ्रातरः दिक्षु रिष्टा अस्मदुपहताः सन्तु। मन्त्रः पदः अर्घ्यादि मंगलं तुलं मा परासेचि। अपगते मास्त्वास
द्वाहमर्घ्याञ्जवानी सर्थः॥ ॥आचाममत्या मागन्यसा वो सं सृज वर्चसा॥ तं मा कुरु प्रियं प्रजानां
मरिष्टिं तनूनामिति॥ ॥ततो द्वितीयमाचमनीयं प्रतिगृह्य मागन्त्या चामति सकृत् अन्यद्वयति
।ततः स्मात्रीचमने।मेत्रार्थः॥ हे वरुण जलेन त्वं तमेवं रूपेण त्वामाश्रितं मामांप त्रासासह त्वावं सामीप्य
वाञ्छगनू। आगमप॥ आङुपसर्गे [illegible] ग्रान्नितिक्रियापदेन संबध्यते। तस्माद्वर्चसा वर्चसेन संसृज
संसृष्टं कुरु। किं च प्रजानां पुत्रपौत्रादीनां प्रियं। पशूनां गोअश्वादीनां माधिपतिं स्वामिनं च। तस्मात्तनू
नां देहावयवानां शरीराणां वा अरिष्टिं अहिंसकं कुरु। हिंसा त्रान च्चासेन वेदनामाचारस्य च तं घ
नात्॥ आत्मस्या इत्र दोषाच्च मृत्युर्विप्रान् जिघांसती त्यादि दर्शिता॥ ॥मित्रस्य त्वेति मधुपर्कं प्रती
क्षते॥ ॥ततो र्घ्यो घ्यिनुर्हस्तस्थितमधुद्वारितं मधुपर्कं मित्रस्य त्वेति प्राञ्चित्रमंत्रेण प्रतीक्षते। पश्य
तीत्यर्थः॥ ॥देवस्यत्वेति प्रतिगृह्णाति॥ ॥ततो देवस्यत्वेति प्राञ्चित्र प्रतिग्रहणमंत्रेण मधुपर्कं प्रतिम्

मधिपतिं पशू

राम

॥ग्रं॥
॥१४२॥

मा

या... ॥ वास्यान्तेत्वान ... पद्मतत्ते निरुक्ता मोक्ति॥ तेन मधुपर्कं सव्यहस्ते कृत्वा दक्षिण॥ स्य हस्तस्यानामिकया

पश्चानामिकाङ्गुष्ठाभ्यां त्वनामिकाङ्गुष्ठेन अनामिकाङ्गुष्ठेन वारत्रयं निरुक्षयति ।

का॥ति॥ ॥ सव्येपाणौ कृत्वा दक्षिणस्यानामिकयाङ्गुल्या प्रदक्षिणं त्रिरालोडयति॥ नमः श्यावास्यायान्न

तिमंत्रेण॥ अत्र सव्यहस्तस्थितस्यैव दक्षिणस्यानामिकया त्रिरालोडनं यथा स्यादिति तदर्थं दक्षिण

ग्रहणं॥ मंत्रार्थः॥ हे अग्ने तेतुभ्यं नमः किंभूताय श्यावास्याय कपिश्यामुखाय॥ तेत व अग्ने अन्नाने अन्ना

ने अग्नघतरस्य त्वं तस्यान्नाने अन्नदुनीये मधुपर्के [illegible] स्यां रसः॥ पदप्येग्नाविर्द्धंसः ष्विषं अन्नदनीयं तत्रि

ष्वंतामिनिरस्यामि॥ ॥ अनामिकाङ्गुष्ठेन च त्रिर्निरूक्षयति॥ ॥ मधुपर्कैकदेशं पात्राद्बहिः प्रक्षि

पति॥ चशब्दात्स्पृतिसंप्लवनेनिरूक्षणं॥ एकेन निरूक्षणव्यवधानात्स्पृतिसंप्लवनं मंत्रावृत्तिः॥ ॥ तस्य त्रिःप्रा

श्नाति यन्मधुनो मधव्यं परमं रूपमन्नाद्यं॥ तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधे

व्योन्नादोसानीति॥ ॥ तस्यैतस्यापवलक्षणं षष्ठी॥ तस्य मधुपर्कस्य त्रिः प्राश्नीयात् यन्मधुनो मधव्य

मिति अनेन मंत्रेण॥ प्राशनत्रयेपि हविर्ग्रहणन्यायेन मंत्रावृत्तिः॥ उच्छिष्टस्यैव मंत्रोच्चारणं॥ एवं हि

...रति॥ तांबूलेक्षुफले चैव भुक्तस्नेहानुलेपने॥ मधुपर्के च सोमे च नोच्छिष्टं मनुरब्रवीदिति॥ ❀

से

ऽर्थः ॥ हे देवाः मधुनो मकरंदस्य यत् मधु तं मधुनि साधा परमं उत्कृष्टं रूपपति प्रकाशयतीदं तत् संघा
तमिति रूपं ॥ अत्राघं व्रीह्यादि वस्त्रादाधारकं अत्रोपादानकं च । तेन सर्वरूपोपपत्ते नरसे न उक्ते विशेष
णविशिष्टे नाहं परम ॥ सर्वेभ्यो गुणाधिकः ॥ मधव्यं मधुपर्कीयं ॥ अत्राह सदत्रोक्ता च असानि म
वानि ॥ ॥ मधुमती त्रिर्वा प्रत्यृचं ॥ ॥ वा विकल्पे न मधुवाता ऋतायत इत्येतास्तिसृभिः प्रत्यृ
ति ॥ तत एवं ॥ मधुवाता इति प्रथमं । मधु नक्तमिति द्वितीयं ॥ मधुमान्न इति तृतीयं ॥ ॥ पुत्रायांतेवा
सिने वोत्तरत आसीनायोच्छिष्टं दद्यात् ॥ ॥ अवशिष्टं मधुपर्कस्योच्छिष्टं । पुत्राय अंतेवासिने शिष्या
य वोत्तरत उपविष्टाय दद्यात् ॥ ॥ सर्वं वा प्राश्नीयात् ॥ ॥ अप्सु वा सर्वं स्वयं प्राश्नाति ॥ ॥ प्राग्वा
संचरे निनयेत् ॥ ॥ प्राक् प्राच्यां यत्र जना न संचरंति तस्मिन् असंचरे मधुपर्कशेषं प्रक्षिपेत् ॥ ॥
आचम्य प्राणान्त्संमृशति वाङ्म आस्ये नसोः प्राणोऽक्ष्णोश्चक्षुः कर्णयोः श्रोत्रं बाह्वोर्बलमूर्वोरोजोऽरिष्टा
नि मे गानि तनूस्तन्वा मे सहेति ॥ ॥ आचम्य वाङ्म आस्य इत्येतैर्मंत्रैः प्रति मंत्रं यथालिंगं प्राणा

ष्व

राम

गो

४२

यतनानि सं मत्राति हस्तेन स्पृशति ॥ सर्वत्र साकांक्षत्वादस्त्वित्यध्याहारः ॥ अरिष्टानि मे गानि
तनूरित्यत्रानुसंबित्य अध्याहारः ॥ मेपदस्य सर्वत्रानुषंगः ॥ नन्वध्याहारानुषंगयोः को विशेष उ
च्यते । अनुषंगः श्रुतपदानयनं । अध्याहारश्च अश्रुतपदस्य लौकिकस्यानयनं ॥ वाक्यानिराकांक्षा प्र
॥ प्रयोजनं वाध्याहृतपदस्य संहितावत्वयोगो न भवति । सावसाने प्रयोग इत्यर्थः । अयमर्थ४ क कौ
पाध्यायैरपि पञ्चसमंजनप्रकरणे प्रदर्शितः ॥ अत्रैवेवाङ्म आस्ये अस्त्विति मुखं नसोर्मे प्राणो अ
स्त्विति नासिकाछिद्रद्वयं युगपत ॥ अक्ष्णोर्मे चक्षुरस्त्विति त्वक्षिद्वयं युगपत ॥ कर्णयोर्मे श्रोत्रमस्त्विति द्वि
णं कर्णं मन्त्रिम्रुपततो वा मम नेनैव मंत्रेण ॥ बाह्वोर्मे बलमस्त्विति दक्षिणं बाहुं ततो वाम मनेनैव मंत्रेण ॥
ऊर्वोर्मे ओजोस्त्विति ऊरुद्वयं युगपदेव ॥ अरिष्टा॰ सह संवितिशिरः प्रभृति सर्वांगानां युगपत ॥ हरिह
हरेण प्राणायतनस्पर्शः सजलेन हस्तेन कर्तव्य इत्युक्तो ॥ तद्रतीव मेदं ॥ न पुनः स्तत्रैजलग्रहणमस्ति ॥
सर्वांगालंभेऽप्यालंभनार्थं हस्तान्यामालंभने उक्तः सोपि न युक्तः ॥ आचमेति ग्रहणे आचीतोदकोपेते व द्यमा

अ

नासेो आचांतोदकः नरर्थस्नासंभसिंआ

हंत न्यादेह [illegible] नि च [illegible]

एत्वा इन्नाचांतस्पेवप्राणपतनस्मर्श्नं नमात्मदित्येन दर्पे ॥ मंत्रार्थः ॥ हे मम वागिंद्रियं आस्ये स्तात् । नसो

र्नासिकयोः प्राणो वायुः ॥ अक्ष्णोर्नेत्रगोलकयोरिति यावत् । चक्षुश्चक्षुरिंद्रियं । श्रोत्रं श्रवणेंद्रियं ॥ बलं बा

ह्नोः ॥ ओजस्तेजः ॥ मेममतन्कदै [illegible] आचांतोदका [illegible] यन्नासं [illegible] आदाय [illegible] गोरिति [illegible]

[illegible] त्रिः प्राह । आलभन्तामित्यध्याहारः । आचांतोदकं गृहणस्तु न राचमनमिति केचित् । आचां

तोदकायेतिता दर्पेवतुर्थी । वासनान स्यतादर्थ्येतुत इत्यालभनं न कारकं ॥ ॥ प्रत्याह माता रुद्राणां

दुहिता वसूनां स्वसादित्यानाम् अमृतस्य नाभिः ॥ प्रनुवोचं चिकितुषे जनाय मा गाम् अनागाम् अदितिं

वधिष्ठ । मम चामुष्य च पाप्मानं हनोमीति यद्यालभेत ॥ ॥ अथ यद्युपजमानं प्रत्याह मातेत्यमुं मं

त्रं पदिगामालभेतत हा मम चामुष्य च पाप्मानं हनोमीति तदंते प्रयोगं ॥ अत्रामुष्येत्यत्र वदमुहुत

र्घ्यं वित नाम ग्रहणं कार्यं । मंत्रार्थः ॥ अमृतस्य क्षीरस्य नाभिराश्रयः ॥ नु वितर्के । छंदसि व्यवहिता अ

प उपसर्गस्य वोचमित्यत्रान्वयः ॥ प्रवोचं वीमि ॥ चिकितुषे चेतनावते जनाय पर्यपं इमां गां मा वधिष्ठ मा

६५ स्यालंभनस्यादर्थहान्राव्र

नानिसं क३

राम

नक्षर ॥

॥४४॥

त

घ्नतां किं तु गोपशुं विधात्तु घ्नते ति तास्यर्थः ॥ किं च्युतां अघ्न्यां नागां अनपराधां ॥ अदितिं देवमातरं प्रयोगना
त ॥ अहं मम अमुष्याघ्रं घियितुः पाप्मानं गोस्थाने हनो मि हन्मीति ॥ ॥ अथ यदि उत्सृज्यते मम चामु
ष्य च पाप्मा हतः ॐ मुत्सृजत तृणान्यत्तु इति ब्रूयात् ॥ ॥ यदि अघ्न्यां गामुत्सृष्टुमिच्छेत् देवं प्रयोगः ॥ माता
रुद्राणां इति तु त्वा मम चामुष्य च पाप्मा हतः ॥ ॐ मुत्सृजत तृणान्यत्तु ॥ अत्रापि अमुष्य स्थाने अर्घयितुर्ना
मग्रहणं ॥ ॐ मुत्सृजत तृणान्यत्तु इति उच्चैर्ब्रूयात् । शेषमुपांशु ॥ एवं गवालंभस्य सर्वत्र विकल्पे प्राप्ते कश्चि
त्रियममाह ॥ ॥ नवेवामा १० सोर्घः स्यादधिपर्कमाघ विवाहं कुर्वते सैव ब्रूयात ॥ ॥ पर्कविवा
हयोरमांसोर्घो न भवति ॥ पर्कमधिकृत्य कुर्वि व हमधिकुर्वते स्वयं प्रयोगः अतस्त्वालं [illegible] मनियमोय
त्र विवाहयोः । गोरालंभस्य कलिवर्जितिकाले भवति ॥ यज्ञाधानगवालंभं संन्यासं पलपैतृकं ॥ दे
वराच्च सुतोत्पत्तिः कलौ पंच विवर्जयेदिति पराशरस्मृतौ । अतस्तस्य गवालंभस्य कलौ निषिद्धत्वादुत्सर्गे
स्य च पर्कविवाहयोरप्राप्तत्वाहोरित्युच्चारणादि पर्कविवाहयोः कलौ न प्रवर्तते ॥ पर्कविवाहयोरन्यत्रासु

गौ

३

...र्गपञ्चएवकल्लौ॥कल्लौगोपञ्चौनिषिद्धात्तत्स्थानेच्छागोलं च॥ ॥पाप्यसंवेतिजयरामः॥परिगतसंवत्सराश्च
र्घ्याश्चवंतीत्युक्तंतदपवादमाह॥ ॥यद्यप्यसकृत्संवत्सरस्यसोमेनयजेतकृतार्घ्याएवैनंयाजयेयुर्नाकृ
तार्घ्याइतिश्रुतेः॥ ॥यद्यपिसंवत्सरस्यमध्येऽसकृत्पुनःपुनःसोमेनयजेततथाप्येनंयजमानंकृतार्घ्या
एवऋत्विजोयाजयेयुः॥नाकृतार्घ्याःकुतःश्रुतेः॥एतत्सूत्राद्देवंज्ञायतेसोमयागार्घ्यमेववक्ताऽत्रऋत्विजोऽर्घ्यानि
तरयागार्घ्यमितिपद्मनाभस्तुऋत्विजइहस्नेनैवमीगार्घ्यत्वात्सोमेनवरेमाणाएवार्घ्याइतिनियमविधा
नार्घ्यंप्ययागारंत्र॥ ननुवसंतेवसंतेज्योतिषायजेतेत्यकस्मिन्संवत्सरेएकएवसोमयागःप्राप्तस्त
त्कथमुच्यतेऽसकृत्संवत्सरस्यसोमेनयजेतेति॥सत्यं॥उच्यते॥यद्यपिनित्यःसोमयागः॥सकृदेवानु
ष्ठातव्यस्तथापिप्रीतिस्मान्नत्साध्यकाममसकृत्संवत्सरस्यसोमेनयजेतेति॥वरःशाखयामधुपर्कदानंगृह्यप
रिशिष्टे॥वरस्ययान्नवेछारवातछारवायाःयैचेदिति॥मधुपर्कःप्रदातव्योऽन्यशाखेपिदातरीति॥ग्रंथांत्रे
त्विग्मधुपर्कोर्ध्यैवरदातृशाखो॥तदुक्तं॥गृह्येशाखयामधुपर्कइति॥याज्ञिकास्तुगृह्येस्वयछारवी

राम

॥ घर ॥
॥४५॥

पकर्मतच्छाखीयो मधुपर्क इति वदंति। तथा जगन्नाथपंक्तारिकायां। तत्तद्गृह्योक्तविधिना विष्टराद्यर्हणं
तत इति॥ सर्वत्र यजमानशाखीयैव मधुपर्क इति जयंतः। तन्नु कैरपि नादृतं॥ ॥ इति श्रीत्रिरग्नि
चित्सम्राट्स्थपतिमहायाज्ञिकवामनात्मजगदाधरकृते गृह्यसूत्रभाष्ये प्रथमे कंडिके तृतीया कंडि
का॥ ३ ॥ ३ ॥ चत्वारः पाकयज्ञाः॥ ॥ पाकयज्ञा इति कर्मणां नामधेयानि॥ चतुःप्रकारा भवं
ति। के ते॥ ॥ हुतो हुतः प्रहुतः प्राशित इति॥ ॥ हुतो होममात्रं। यथा सायंप्रातर्होमः॥ अहुतो य

यद हि ६

त्र न हूयते यथा स्रस्तरारोहणं॥ प्रहुतो यत्र हूयते बलिहरणं च यथा पक्षादि॥ प्राशितो यत्र प्राश्यते य
एव न होमो न बलिहरणं यथा सर्वासां पयसि पायसं श्रपयित्वा ब्राह्मणान्भोजयेदिति॥ ननु य
दि यजमाना एवैते चत्वारो भवंति॥ प्रकारकथनं प्रवृत्तिशेषकरत्वान्नावाच्यमनर्थकमिति चेत्॥ ना
नार्थकं॥ प्रकारांतरनुसंख्यानार्थत्वात्॥ चत्वारः प्रकारा उपदिष्टाः॥ अस्ति हि पंचमः प्रकारः स नोपदि
ष्टः तत्संख्यानार्थमेवैतत्सूत्रं॥ कस्मा सौ॥ ब्रह्मयज्ञ इति। तस्य विधेर्ब्राह्मणोपदिष्टत्वात्॥ एतावता

त्वचूप मह रह रद्योतव्यमिति चर्तयन्त्ताः॥ ॥ पंचसु बहिः शालायां विवाहे चूडाकरणउपन
यने केशांते सीमंतोन्नयन इति॥ ॥ विवाहादिषु पंचसु कर्मसु गृहात् बहिः शालायां कर्म चैव
ति। अन्यत्रांतः शालायां बहिः शालायां वा चवति विवाहेतु मंडपो वसिष्ठेनोक्तः षोडशारत्निकं कुर्या
त्॥ चतुर्द्वारोपशोभितं। मंडपं तोरणैर्युक्तं तत्र वेदिं प्रकल्पयेत्॥ अष्टहस्तं तु स्वपेन्मंडपं वाधि
षट्कर्यां वेदीकरणं नाम देशकं॥ हस्तोच्छ्रितां चतुर्हस्तैश्चतुरस्रां समं ततः॥ स्तंभैश्चतुर्भिः सुश्ल
क्ष्णां वाम स्त्रागेतु सम्मनशास मांतपाचतुर्दिक्षु सोपानैरति शोभितां॥ प्रागुदक्प्रवणां रंभास्तंभ
हंसपक्षकादिभिः॥ एवंविधा मात्रदानि भिपुनेसाग्रेवेदिकामिति॥ सप्तर्षिमते च॥ मंगलेषु च
सर्वेषु मंडपो गृहवामतः॥ कार्यः षोडशहस्तो वा द्वादशहस्तो वा विधिः॥ स्तंभैश्चतुर्भिरेवात्र वेदीम
ध्ये प्रतिष्ठितेति॥ कारिकायामपि विवाहे मंडपवेदिकरणमुक्तं॥ ॥ उपलिप्त उद्धृतावोक्षिते अग्नि
मुपसमाधाय॥ ॥ यत्राग्नेः स्थापनं तत्रोपलिप्ते उद्धृते अवोक्षिते उदके नाभ्युक्षिते देशे

रा

राम

॥ घ रा ॥

ग्निस्थापनं। अत्रानेन पूर्वाग्निसंस्कारो लक्ष्यते॥ ननु परिसमूहनादेरुक्तत्वात् किमर्थमुपलेपना-
दिकमुच्यते॥ सत्यमुच्यते॥ यत्र क्वचिद्धोमस्थाने नाप्राप्तिः परिसमूहनादेरन्यथात्वात् तत्राग्नेः
स्थापने तत्र तत्रैते भवन्तीति॥ तथा च लिंगं॥ उद्धृते वावोक्षिते वाग्निमादधातीति॥ एवमेवं विधिरयं
क्वचित्को मध्यस्थाने न च होमार्थमग्निस्थापने स्युः॥ अन्यच्च गृह्यान्तरे ग्निनिधाने आग्निगमने
मथित्वा। आग्निस्थापने च न स्युः॥ किंचैवमेवेत्यनेन यत्र स्वस्थाने स्थिते ग्नौ स्थालीपाकादि-
के क्रियते तत्रापि एते स्युः स्वभावात् [illegible] दित्यनेन सूत्रेणापयाते। उप लिप्त उद्धृतावोक्षिते देशे अ-
ग्निमुपसमाधाय विवाहो भवतीति भर्तृयज्ञैः सूत्रे योजितं। परिसमूहनपरिसंख्या च तेषां मते॥
निर्मथ्यमेके विवाहे॥ ॥विवाहति [illegible] कर्मणो नामधेयं। एके विवाहकर्मणि निर्मथ्यमग्निमि-
च्छंति॥ अन्ये लौकिकमिच्छंति॥ निर्मथ्योग्निश्चिरं निर्मथितो ग्राह्यः॥ सर्व एव ह्यग्निर्मथनाज्जायते॥
[illegible]पा नाव नीते न च [illegible] रस्तु [illegible] अचिरदग्धेनेति ज्ञायते॥ अत्र यथा कश्चिद्दारणिग्राह्यो॥ ॥

॥ पुण्याहेपि उदगयनादीनां सं

दगयन त्वापूर्यमाणपक्षेषु पुण्याहे ॥ ॥ उदगयने उत्तरायणे आपूर्यमाणपक्षे शुक्लपक्षे पुण्याहे
शौचनैविष्ट्यादिरहितकाले दैवानि कर्माणि कुर्यात् ॥ एवं हि स्मर्यते ॥ सय ओदङ्ङावर्त्तते देवेषु त
र्हि भवतीति ॥ तस्मात्तत्र दैवकर्मोचितं ॥ आपूर्यमाणः सोपि देवानामेव ॥ तथा ॥ य एवापूर्यमाणप
क्षे पुण्याहे कार्यं ॥ इदं चानुक्तकालविषयं सूत्रं ॥ यत्र नियतः कालं यथा सायं जुहोति प्रातर्जुहोति ॥ य
था पौर्णमास्यां पौर्णमास्या यजेत अमावास्यायाममावास्यया यजेत इत्यादौ तत्र तत्काले कार्यं ॥ नहि कृष्ण
पक्षे पुण्याहादावग्निहोत्राद्यनुष्ठानमिष्टम् अहरहरनुष्ठातव्यत्वात् ॥ अत उपनयन चूडाकरणा
दीनि उदगयनादौ कार्याणि अन्यानि तु येषु न समुच्चयः संभवति तानि यथासंभवमेतेषु कर्त्तव्या
नि ॥ यथा सर्पबलिरनाहिताग्न्याग्रयणमित्यादीनीति तं चरत्वे ॥ एवं पित्र्याणि दक्षिणायने पराह्वे
च ॥ ॥ कुमार्याः पाणिं गृह्णीयात् ॥ ॥ कुमारीमक्षतयोन्याः पाणिं गृह्णीयात् वक्ष्यमाणेन वि
धिना विवाहं कुर्यात् ॥ विंशति प्रसूता द्वादशवर्षकुमारीग्रहणं ॥ स्मर्यते हि तस्याः पुनर्विवाहः ॥

राम

॥ पर ॥
॥ ५७ ॥

त्रिषु त्रिषूत्तरादिषु॥ ॥उत्तरात्र्यादिर्येषां तान्युत्तरादीनि तेषु तेषु त्रिषु। ज्यमर्थः॥ उत्तराफाल्गुन्यां हस्ते
चित्रायां च॥ एवमुत्तराषाढायां श्रवणे धनिष्ठायां च॥ एवमुत्तराप्रोष्ठपादि रेवत्यामश्विन्यां च॥ स्वातौ मृगशि
रसि रोहिण्यां वा॥ ॥एतेषामन्यतमे वा नक्षत्रे विवाहो भवतीत्यर्थः॥ उदगयन आपूर्यमाणपक्षे पुण्ये
हेरन्युक्ते स्योत्कालप्रसंगाच्च स्मृत्यंतरोक्तसंवत्सरादिकं न्याविवाहकालो ऽत्र निरूप्यते। तत्र ज्योति
र्निबंधे॥ षड्ब्दमध्ये नोद्वाह्या कन्या वर्षद्वयं यतः॥ सोमो भुंक्ते ततस्तद्वद् गंधर्वश्च तथानलः॥ तत्पा
यमः। समसंवत्सरादूर्ध्वं विवाहः सार्ववर्णिकः॥ कन्याया स्यते राजन् पचाधर्मे गर्हितः॥ राजमा नय्य ६
र्तंडे॥ अयुग्मे दुर्भगा नारी युग्मे तु विधवा भवेत्। तस्मात् गर्भान्विते युग्मे विवाहे सा पतिव्रता॥
मासत्रयादूर्ध्वमयुग्मवर्षे युग्मे पि मासत्रयमेव यावत्॥ विवाहमुद्दिश्य प्रवदंति संतो वात्स्यादयस्त्री
जन्मजन्ममासात्। स्मृत्यंतरे तु। जन्मतो गर्भाधानाद्वा पंचमाद्वाब्दसंयुते॥ कुमारीवरणं दानं
मेखलाबंधनं तथेत्युक्तं॥ सर्वसंग्रहवाक्यानि कारिकायां॥ अष्टवर्षा भवेद्गौरी नववर्षा तु

...हिणी। दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला॥ दशमे नग्निका वा स्याद्द्वादशे वृषली स्मृता॥ अ
प्राप्य वृषली ज्ञेया कुमारी या रजस्वला॥ प्राप्ते तु द्वादशे वर्षे यः कन्यां न प्रयच्छति। मासि मासि रज
स्तस्याः पिता पिबति शोणितं॥ एतच्च प्रापि वृं ज्ञेयं न रजोदर्शनं भवेत्॥ स्त्रीणां कामा सां चि दर्षे स्त्रिभित्रा
त्रीणि मनुनापि तत॥ उद्वहेत्त्रिंशद्वर्षः कन्यां द्वादशवार्षिकीं। अष्टवर्षाष्टवर्षां वा धर्मे सीदति
सत्वरः॥ एकविंशतिवर्षो वा सप्तवर्षामवाप्नुयात्॥ वर्षैरेकगुणां भार्यामुद्वहेत्त्रिगुणः स्वयं। त्रिं
शद्वर्षो दशाब्दां च भार्यां विंदेत नग्निकां॥ तस्मादुद्वाहयेत्कन्यां यावन्नर्तुमती भवेत्॥ प्रदानं प्राग्
तोस्तस्या ऊर्ध्वं कुर्वन्न दोषभाक॥ ज्येष्ठो भ्राता पिता माता दृष्ट्वा कन्यां रजस्वलां। त्रयस्ते नरकं यांति स्व
पमित्यब्रवीद्यमः॥ यस्तां विवाहयेत्कन्यां ब्राह्मणो मदमोहितः॥ असंभाष्यो ह्यपांक्तेयः स विप्रो वृष
लीपतिः॥ वृषलीसंग्रहीता यो ब्राह्मणो मदमोहितः॥ सततं सूतकं तस्य ब्रह्महत्या दिने दिने॥ पितु
र्गृहे तु या कन्या रजः पश्यत्यसंस्कृता। भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता॥ द घा[illegible]

राम
॥५९॥
॥४७॥

न्यानग्निकां ब्रह्मचारिणीं ॥ अपि वा गुणहीनाय नोपरुंध्याद्रजस्वलामिति ॥ अथ मासाः ॥ व्यासः ॥ मा
घफाल्गुनवैशाखेषु पूर्वमार्गशीर्षके । ज्येष्ठे चाषाढके चैव सुलग्ना वित्तसंयुता ॥ आवृत्तोपि च पौषे वा
कन्याम्नास्वपदेत या ॥ चैत्राश्वयुक्कार्त्तिकेषु याति वैधव्यतां लघु ॥ नारदः ॥ माघफाल्गुनवैशाखज्येष्ठमा
साः शुभावहाः ॥ ॥ कार्त्तिको मार्गशीर्षश्च मध्यमौ निंदिताः परे । पौषेपि कुर्यान्म
करस्थे तेर्के चैत्रे चैवेन्मेषगतौ शुभदः स्यात् ॥ प्रशस्त माघादकृतं विवाहं वदंति गर्गा मिथुने स्थिते र्के ॥
तथा । मार्गमासि तथा ज्येष्ठे क्षौरं परिणयं व्रतं ॥ ज्येष्ठपुत्रदुहित्रोस्तु यत्नेन परिवर्जयेत् ॥ कृत्तिकास्थं
रविं त्यक्त्वा ज्येष्ठपुत्रस्य कारयेत् ॥ उत्सवादिषु कार्येषु दिनानि दश वर्जयेत् ॥ तथा रत्नकोशे ॥ जन्म
र्क्षे जन्मदिवसे जन्ममासे शुभं त्यजेत् ॥ ज्येष्ठे मास्यादिगर्भस्य शुभं वर्ज्यं स्त्रिया अपि ॥ राजमार्तं
डे । जातं दिनं दूषयते वसिष्ठो ह्यष्टौ च गर्गो नियतं दशात्रिः । जातस्य पक्षं किल भागुरिश्च शेषाः प्र
शस्ताः खलु जन्ममासि ॥ जन्ममासे तिथौ भे च विपरीतदले सति ॥ कार्यं मंगलमित्याहुर्गर्गा

...वत्रौ नवका॥ जन्ममासे निषेधे पि दिनानि दश वर्जयेत्॥ आरभ्य जन्मदिवसाच्छुभाः स्युस्त्रिप
क्षापरे॥ पराशरस्मृतौ विशेषः। अज्येष्ठकन्यका यत्र ज्येष्ठपुत्रो वरो यदि। व्यत्ययो वा तयोस्तत्र ज्येष्ठो मा
सः शुभः स्मृतः॥ ज्येष्ठस्य ज्येष्ठकन्याया विवाहो न प्रशस्यते। तयोरन्यतरे ज्येष्ठे ज्येष्ठो मासः प्रशस्यते॥
तथा। द्वौ ज्येष्ठौ मध्यमौ प्रोक्तावेकज्येष्ठं शुभावहं॥ ज्येष्ठत्रयं न कुर्वीत विवाहे सर्वसंमतं॥ यत्तु
सार्वकालमेके विवाहमिति वदंति तदतिप्रौढकन्याविषयं वेदितव्यं॥ तथा च राजमार्तंडे। राहुग्रस्ते
तथा पुष्ये पितृणां श्रवणे संशये॥ अतिप्रौढा च या कन्या चंद्रलग्नबलेन तु। पश्चात्तत्रास्तु राद्धि विवाह
विषयं॥ तथा च मत्स्यपरिशिष्टं। धर्मेषु विवाहेषु कालपरीक्षणं नाधर्मेष्विति॥ अथ गुर्वा
दिबलं॥ तत्र गर्गः॥ स्त्रीणां गुरुबलं श्रेष्ठं पुरुषाणां रवेर्बलं। तयोश्चंद्रबलं श्रेष्ठमिति गर्गेण भाषि
तं॥ देवलः॥ नष्टात्मजा धनवती विधवा कुशीला पुत्रान्विता हतधवा सुभगा विपुत्रा॥ स्वा
मिप्रिया विगतपुत्रधवा धनाढ्या वंध्या च वेश्म सुरगुरौ क्रमशो निजजन्म[तः]॥ गर्गः॥ जन्मत्रिदश

राम

॥५२॥

॥४८॥

मारिस्थः प्रज्यास्तु नेष्टो गुरुः ॥ विवाहे पंचतुर्थाष्टद्वादशास्थो मृतिप्रदः ॥ अस्यापवादः ॥ सर्वत्रापि
शुभं दद्याद्द्वादशा दान्तरं गुरुः ॥ पंचषष्ठाब्दयोरेव शुभगोचरतामता ॥ सप्तमाब्दे च वर्षेषु स्वोच्चस्व
क्षेत्रगतो यदि ॥ अशुभोपि शुभं दद्याच्छुभदृष्टेषु किं पुनः ॥ रजस्वला या कन्या या गुरुशुद्धिं न चिंतयेत्
॥ अष्टमे विप्रकर्त्तव्यो विवाहस्त्रिगुणार्चनात् ॥ अर्कगुर्वोर्बलं गौर्या रोहिण्याः केवलास्मृता ॥ कन्या
चेद्बल्ला प्रोक्ता वत्सल्ली लग्नतो बल्ला ॥ अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी ॥ दशवर्षा भवेत्कन्या
अत ऊर्ध्वं रजस्वला ॥ बृहस्पतिः ॥ मषचापकुलीरस्थो जीवोप्यशुभगोचरः ॥ अतिशोभनतां या
द्द्विवाहोपनयादिषु ॥ शौनकः ॥ गुर्वादित्ये व्यतीपाते वक्रातिचारगे गुरौ ॥ नष्टे शशिनि शुक्रे वा
बाल्ये वृद्धे पवा गुरौ ॥ पौषे चैत्रे वर्षास्वारद्विक मासके । केतूद्गमे निरंके शौ सिंहस्थे मर
मंत्रिणि ॥ विवाहव्रतयात्रादि परिहर्त्यं गृहादिकं । क्षौरं विशेषविद्यांच यत्नतः परिवर्जयेत् ॥ ल
नृपा ॥ सिंहस्थे मकरस्थे च गुरुपत्ने न वर्जयेत् ॥ लल्लः ॥ अतिचारगतो जीवस्तं राशिं नैति चेत्पुनः ॥

म्या

द्याशे वसिष्ठेनोक्तः ॥ विवाहादन्निशुभे कूले गो तस्मिन्नेतरे त्र त्रुत्वा गौरप्युत्त...

शुभसंवत्सरे राज्ञे च्युः सर्वकर्म वहिष्कृतः ॥ सिंहस्थे गुरौ रपवादो हि व्रतबंधस्य सिंहस्थे जीवे न दुष्यति ॥ पु

रोहितोपि ॥ गोदावर्या गौतमी मध्ये नोद्वाहः सिंहगे गुरौ ॥ भागीरथ्युत्तरे देशे यावत्सा मी नगते रवौ

॥ सर्वत्र गुरुबलाबलात्मनैवं नक्षत्रे ग्रहशांतिः कार्या ॥ सा चास्मिन्नि प्रयोगे लेखनीया ॥ अतिचार

गे गुरौ नुवसिष्ठः ॥ अतिचारगते जीवे वर्जयेत्तद्वत्सरं ॥ विवाहादिषु कार्येषु अष्टाविंशति वासरान् ॥

रत्नमालायां ॥ एकपंचनवयुग्मषड्दशत्रीणि सप्तचतुरष्टलाभदः ॥ द्वादशौ विषमाद्राशितो नै

चंद्र इति कीर्तितो बुधैः ॥ नारदः ॥ भूबाणनवहस्ताश्वरसोदिग्वह्नि दौलन्नाः ॥ वेदावसुत्रिवादि त्वाघा

तं वंशाय पापाक्रमं ॥ यात्रायां मृत्युकार्येषु घातचंद्रं विवर्जयेत् ॥ विवाहे सर्वमांगल्ये चौलादौ व्रतबं

धने घातचंद्रो नैव चिंत्य इति पाराशरो ब्रवीत् ॥ ज्योतिर्निबंधे ॥ विवाहचौलव्रतबंधयज्ञे

महाभिषेके च तथैव राज्ञां ॥ सीमंतपात्रासु तथैव जाते नो नीपः स्वल्पु चिंतते च्चंद्रः ॥ अकालवृष्टौ

नारदः ॥ अकाल जाता वेपुष्पे विद्युन्नीहारवृष्टयः ॥ प्रत्यर्कपरिवेषेंद्रचापाभ्रध्वने यदि ॥

धु घात

र्ति

राम

॥ ५ र ॥

॥ ५० ॥

दोषाय मंगले नून मदोषायैवकालज्ञाः ॥ अकालवृष्टिस्वरूपं च लल्लेनोक्तं ॥ पौषादिचतुरो मासान्प्रो
क्ता वृष्टिरकालजेति ॥ निर्घाते द्विति(?)र्चैव निग्रहयुद्धे राहुदर्शने चैव ॥ त्र्यहं पंचदिनान्कार्यान्यावपरिणीताना
मुपयाति ॥ उल्कापाते इंद्रचापप्रबलघनरजोधूमनिर्घातविद्यु द्दृष्टिप्रत्यर्के दोषादिषु सकल
बुधैस्त्याज्यमेवैकरात्रं ॥ दुःस्वप्ने दुर्निमित्ते ग्रहणग्रहणतदग्रोर्कमनोच्चांतबुद्धौ चोल्के मौंजीनिबंधे परि
णयनविधौ सर्वदा त्याज्यमेव ज्योतिःप्रकाशे ॥ पूर्वाकषोडशी नाड्यः संक्रांते उपर्णाः परतः ॥ उपनय
नव्रतयात्रापरिणयनादौ विवर्ज्यास्तिः ॥ गर्गः ॥ दिग्दाहे दिनमेकं च ग्रहे सप्तदिनानि तु ॥ भूकंपे च वस
मुत्पन्ने त्र्यहमेवं तु वर्जयेत् ॥ उल्कापाते त्रिदिवसं धूमे पंचदिनानि च ॥ वज्रपाते चैकदिनं वर्जये
त्सर्वकर्मसु ॥ दर्शनादर्शनाद्राहुकेतोः सप्तदिनं त्यजेत् ॥ पावकेतोतके सोमसावर्णमुच्चः समपाने
ता ॥ अद्भुतसागरे भस्मापवादः ॥ अथ दिवसत्रयमध्ये मद्रुपानीयं प्रदोत्रवर्तते ॥ उत्पातदोषश्च
तदैवशांत्या ... संबधत तैवा ॥ भूकंपादेर्न दोषोस्ति वह्निस्त्राद्धे कृते सती ॥ अथ प्रति

…नादिः मेधातिथिः॥ वधूवरार्थं घटितेषु निश्चितेवरस्यगेहे यदि कन्यकायाः॥ मृत्युर्यदिस्यान्ननुज्ञ
…प… तदानकार्यं खलु मंगलं बुधैः॥ मंगलं विवाहः॥ तथागर्गः॥ कृते तु निश्चयेपश्चान्मृत्युर्भवति क
स्यचित्॥ तदानमंगलं कुर्यात्कृते वैधव्यमाप्नुयात्॥ स्मृतिचंद्रिकायां॥ कृते वाङ्निश्चयेपश्चान्मृत्युर्मातृस्य
गोत्रिणः॥ तदानमंगलं कार्यं नारी वैधव्यदं ध्रुवं॥ भृगुः॥ वाग्दानानंतरं पत्रकुलयोः कस्यचिन्मृ
तिः। तदोद्वाहो नैव कार्यः स्ववंशक्षयदापतः। शौनकः। वरवध्वोः पिता माता पितृव्यश्चसहोदरः॥ ए
तेषां प्रतिकूलत्वे हि महाविघ्नप्रदो भवेत्॥ पितापितामहश्चैव माता चैव पितामही॥ पितृव्यः स्त्रीसु
तोभ्राताभगिनीत्वविवाहिता॥ एभिस्त्रिविपन्नैश्च प्रतिकूलं बुधैः स्मृतं॥ अन्यैरपि विपन्नैस्तु केचि
दुचुर्नेतद्भवेत॥ संकटे मेधातिथिराह॥ [illegible] वाग्दानानंतरं पत्रकुलयोः कस्यचिन्मृतिः॥
तदासंवत्सरादूर्ध्वं विवाहः शुभदो भवेत्॥ स्मृतिरत्नावल्यां पितुरब्दमशौचं स्यात्तदर्धं मातुरेव च
।मासत्रयं तु भार्यायास्तदर्धं भ्रातृपुत्रयोः॥ अन्येषां तु सपिंडानामाशौचं मासमीरितं। तदं

राम

॥धर॥

पि

तेशांतिकंकृत्वाततोलग्नंविधीयते। ज्योतिःप्रकाशे। प्रतिकूलेकर्तव्योविवाहोमहस्ततःपरः। शांतिविधा
यगांदत्वावाग्दत्तानादिचरेत्तुनः॥ शांतिरत्रविनायकशांतिः॥ तथा च मेधातिथिः॥ संकटेसमनुप्राप्तेय
ज्ञवल्क्येनयोगिना॥ शांतिरुक्तागणेशस्यकृत्वातांमन्नमाचरेत्। अन्यत्तत्रैव। प्रतिकूलेनकर्तव्या
गृह्येघावदृतुत्रयं। प्रतिकूलेपिकर्तव्यमितिहुबहुवि[illegible]दे॥ प्रतिकूलेसपिंडस्यमासमेकंविवर्ज
येत्॥ ज्योतिःसागरेपि। दुर्भिक्षेराष्ट्रभंगेवपित्रोर्वाप्राणसंशये॥ प्रौढायामपिकन्यायांनानुकूल्यं
मांगलिकवेषः शुभासने उपविश्याचम्य प्राणानायम्य देवतागुर्वादिनमस्कारं कृत्वा देशकालौ सं
कीर्त्य अस्याममुकनाम्न्याः श्वः करिष्यमाणविवाहांगत्वेन स्वस्तिवाचनं मंडपप्रतिष्ठां मातृपूज
नं वसोर्धारापूजनं आयुष्यजपं नांदीश्राद्धं चाहं करिष्ये इति संकल्पं कुर्यात् ॥ ततो ब्राह्मणानुपवेश्य
स्वस्तिवाचनं कुर्यात् ॥ मंडपप्रतिष्ठा चैवं ॥ दूर्वाशमीपल्लवबकुलपल्लवादिनाम्रादिप्रत्रास्तवक्षप
ल्लवपत्रवेष्टितान् ॥ सूत्रेण पंचधा वेष्टयेत् ॥ आग्नेयकोणस्थमंडपस्तंभोपरि नंदिनीनामकं
वेष्टितं मनो जूतिरिति स्थापयित्वा तत्र नंदिनीं पूजयेत् ॥ तत्र चैवं आपो हि ष्ठेति मंत्रेण गंधद्वारा
मिति गंधाक्षतान् दधिक्राव्ण इति दधि ॥ कांडात्कांडादिति दूर्वापुष्पाणि समर्पयेत् ॥ ततो नैर्ऋ
त्यवायव्येशानस्तंभेषु मंडपमध्ये परिभागे काष्ठचक्रे मेणनलिनीमैत्रामापशुवर्धिनीनामकं
वेष्टितानि पूर्ववत् स्थापयित्वा पूजयेत् ॥ ततो मातृपूजनं वसोर्धारापूजनं आयुष्यं वचस्यमिति

राम

ग.ध.स.

स्मृत्यंते श्राद्धप्रयोगे २

घो

आपुष्यजपं च कुर्यात् ॥ एषामनुष्ठानप्रकारो [illegible] ऽप्युक्तः । ततो नांदीश्राद्धं द्वंद्वं चैव दाहे पिता कु-
र्यात् । द्वितीयादौ वर एव वा । तथा स्मृतौ ॥ नांदीश्राद्धं पिता कुर्याद्दाघे पाणिग्रहे पुनः । पित्रोस्तु जीवितोः
कुर्यात्सुनः । पाणिग्रहं द्वयदा ॥ पितुर्नांदीमुखं श्राद्धं नोक्तं तस्य मनीषिभिरिति । पितुरत्नावे असंस्कृ-
तास्तु संस्कार्या भ्रातरः । निःपूर्वसंस्कृतो रितिपः कर्त्रक्रमस्तेन क्रमेण ज्येष्ठभ्राता चादिदं द्याद्दिति वैदिका
द्य आहुः ॥ हेमाद्रिस्तु । तस्य पितरि चावेषः पितृव्य मातुलादि संस्कुर्यात् तत्र क्रमसंस्कार्यपितृभ्यो
दद्यात् तु स्वपितृभ्य इति वाचस्पतिः । अत्र बहुवक्तव्यं विस्तारभयान्नोच्यते ॥ रेणुकारिकायां ॥ उक्ते
काले विवाहांगं कुर्यान्नांदीमुखं पिता ॥ देशांतरे विहित्वेन तत्र गत्वान्नवेदिदं । अत्र पदार्थक्रमो स्मृता-
कृते श्राद्धप्रयोगे आलोचनीयः ॥ एवं वरपिता स्वगृहे पि सर्वं कुर्यात् ॥ इदं च वधूपित्राकृते नांदीश्रा-
द्धं कार्यात् उक्तं कारिकायां मंडपादिकं कर्म वरस्य श्राद्धमतरेति ॥ आचारो प्येवं । ततो वरगृहे गत्वा व
कार्यं तत्र गणपतिं स्मृत्वा देशकालौ संकीर्त्य करिष्यमाण विवाहांगवरणं करिष्ये । इति

नु

वा

अतऊर्ध्वं प्रकुर्वीत स्वयमेव तु नांदीकं । मंडनः २

...ल्प उपवीतादिद्रव्ये स्नानेवरणे॥ इति तानि द्रव्याणि वराय दत्वा पादौ प्रक्षाल्य वंदनादिभिः पूजां कु-
र्यात्। वरदेयानि द्रव्याण्याह चंडेश्वरः॥ उपवीतं फलं पुष्पं वासांसि विविधानि च। देयं वराय वरणे क-
न्याभ्रात्रा द्विजेन चेति। इति पूर्वदिनकृत्यं आगतौ सर्वमेतद्विवाहदिन एव पूर्वं कुर्यात्॥ ॥
अथ विवाहदिनकृत्यं॥ ।तत्र पूर्वं घटिस्थापनं कार्यं॥ नारदः॥ षडंगुलमितोत्सेधं द्वादशांगु-
लमायतं॥ कुर्यात्कपालवत्ताम्रपात्रं तद्दशभिः पलैः। ताम्रपात्रे जलैः पूर्णे मृत्पात्रे वाप्यवाप्सु च॥
मंडलार्धोदये वीक्ष्य रवेस्तत्र विनिक्षिपेत्॥ तत्र मंत्रः॥ मुख्यं त्वमसि यंत्राणां ब्रह्मणा निर्मितं पुरा।
भवाय भव दंपत्योः कालसाधनकारणमिति। ततो वरः कृतनित्यक्रिय इष्टदेवतां पित्रादींश्च नमस्कृ-
त्य तैरनुमोदितो यानं वा अश्वादियानमारुह्य वधूगृहं प्रविश्य प्राङ्मुखस्तिष्ठेत्। ततः कन्यापिता
मधुपर्केण समर्चयेत्॥ ॥ अथ मधुपर्कः॥ ॥तत्र वरस्य वैकल्पिकावधारणं॥ यन्मधु
न इति मधुपर्काशनं। गोपस्य ग्रामसंचरं निनयनं। एतौ विकल्पौ स्मरेत्। ततः साधुभवा

...वा
राम

गधर
।७५।

निति अर्घयिता अर्घ्यं प्रवदति॥ अर्घपेलर्घस्य प्रतिक्ष्वनमिति वासुदेवजहारूपः। विष्टरादीनामा

२२ र्पणं॥ अर्घपितुर्विष्टरादानं॥ अर्घपितुर्मातिरिक्तः अन्य अर्घ्यं संबोधयति॥ विष्टरो विष्टरो विष्टरः प्र

२ नुष्टि तिगृह्यतामिति अनेन। ततो र्घ्यो र्घपितुः सकाशाद्विष्टरमादायासनेनिधाय वर्ष्मोस्मि समानानामि

त्युपविशति॥ ततः पाद्योदकादानमर्घपितुः। ततो र्घ्यमन्यं संबोधयति। पाद्यं३। प्रतिगृह्यतामिति।

ततो र्घपितुः। सकाशात्पाद्यं प्रतिगृह्य प्रथमं दक्षिणं पादं प्रक्षालयति। विराजो दोहोसीति। ततो

२।४ नेनैव मंत्रेण वामपादप्रक्षालनं। अनेनैव द्वपयोस्तत्र वर्वैवामपादप्रक्षालनं॥ अर्घपितुर्विष्टरा

दानं। अन्यः प्राह विष्टरो३ प्रतिगृह्यतामिति॥ ततो र्घ्यो द्वितीयं विष्टरं प्रतिगृह्यन्यमौ निधाय व

र्ष्मोस्मी स्वनेन तस्योपरि पादौ निदधाति। अर्घपितुरर्घादानं॥ अन्य प्राह। अर्घो३ प्रतिगृह्यतामि

ति। ततो र्घ्यः आपस्थ युष्माभिर्दिसर्घं प्रतिगृह्णाति॥ अर्घ्यस्तमर्घं निनयन्नभिमंत्रयते समुद्रं वः

ततोऽर्घयितुराचमनीयादानं ॥ पुनरन्यः प्राह ॥ आचमनीयं प्रतिगृह्यतामिति । ततोऽर्घ्योऽर्घयितु
राचमनीयं प्रतिगृह्य आमागन्यशसेति सकृदाचामति । ततः स्नातो चमने । अर्घयितुः मधुपर्कदानं
अन्यआह । मधुपर्कः प्रतिगृह्यतामिति । ततोऽर्घ्योऽर्घयितुर्हस्तस्थितं मधुपर्कं मित्रस्य त्वेत्यनेन ई
क्षते । ततो मधुपर्कं देवस्य त्वा इत्य प्रतिगृ ह्णामीति गृह्य सव्ये पाणौ कृत्वा दक्षिणस्यानामिकया लो
डयति नमः श्यावास्यायामिति ॥ ततो मधुपर्कैकदेशस्यानामिकांगुष्ठेन च बहिः प्रक्षेपः पुनर्द
क्षिणस्यानामिकया लोडयति नमः पुनः नमः श्यावास्यायामिति लोडनं मधुपर्कैकदेशस्य ब
हिः प्रक्षेपः । एवं च त्रिरालोडनं । त्रिर्निरुक्षणमनामिकांगुष्ठेन भवति ॥ ततोऽर्घ्यो मधुपर्कैकदेश
प्र मधुनो मधव्यामिति प्राश्नाति पुनरनेनैव मंत्रेण वारद्वयं उच्छिष्टमेव प्राश्नाति ॥ उच्छिष्टदोषा
चावोमन्नक्षो द्रष्टव्यः । मधुमती निवीप्रत्यचं ब्राह्मणानं । ततोऽर्घ्यो मधुपर्कशेषं नत्वार्घ्यो ब्राह्मणाय

राम

१

अ२ अ

उत्तरेत उपविश्याप ददाति ॥ अथ वास्य यमेव सर्वं प्राश्नाति ॥ प्राग संचरे वा निनयं ॥ ततो र्घः आच
म्य प्राणानसम्मृशेत् चैवं ॥ वाङ्म आस्येऽस्त्विति मुखमालभते ॥ नसोर्मे प्राणोऽस्त्विति नासिकाछिद्र
द्वयं युगपत् ॥ अक्ष्णोर्मे चक्षुरस्त्विति [illegible] द्वयं युगपत् ॥ कर्णयोर्मे श्रोत्रमस्त्विति दक्षिणं कर्णमपि स
व्यपतो नैव वाम कर्णं ॥ बाह्वोर्मे बलमस्त्विति दक्षिणबाहुं ततो नैव बा० ऊर्वोर्मे ओजोऽस्त्वि
त्यूरुद्व यं युगपदेव ॥ अरिष्टानि मेंगानि तनूस्तन्वा मे सह ॥ संत्विति शिरः प्रभृति सर्वांगं युग
पत् ॥ ततो गामानीया [illegible] वेपिता चाऽऽसमादाय गोर्गौर्गौः आलभ्य तामिति त्रिः प्रतिवदति ॥ ततो र्घं प्र
त्याह माता रुद्राणां इत्यादि विघिष्टे ऽन्तमुत्था ममत्वामुष्य च पाप्मा [illegible] हतो मानि ब्रूयात् अथ युत्सिस्
जेत ममचामुष्य च पाप्मा हतेऽमुत्सृजत तृणान्यत्त्विति ब्रूयात् ॥ विवाहयज्ञ योऽत्र नियमे नालं
भः ॥ स च कल्लो न भवति ॥ स्मृत्यंतरात् ॥ आलं [illegible] नावेतु गोरालम्भारणादिकमपि न भवति ॥ सर्वत्र
ता त्राऽऽवेद्युत्सर्ग एव तिकारिकायां ॥ गोरालंभनिषेधात् स्यात्सर्वेत्रोत्सर्जनं कल्लौ इति ॥ ॥

अ

क्षि
अ
ने

अ
मा

त मधुपर्कः॥ ततो दाता गंध माल्य वस्त्र युगोपवीत युगाभरणादि भिर्वरं यथाविभवं पूजयेत॥
यकन्या स्नाता परिहिताहत वस्त्रा गृहांतः सौभाग्यादिकामनया गौरीं पूजयति। तत्रैव गौरीध्याने
तिष्ठेत्। ततो वरो बहिः शालायां पंचभूसंस्कारान् कृत्वा लौकिकाग्निस्थापनं करोति। निर्मंथ्य वाग्निर्वा
स्थापनं। ततो वैकल्पिकावधारणं वरस्य॥ अग्नेः पश्चात्तेजनीनिधानं॥ अग्नेरुत्तरतः कुंभधक्
उत्तरतः पात्रासादनं। द्वे पवित्रे मन्थयी आज्यस्थाली पालाशः समिधः प्रोवावाघारौ समिद्धतमे
अग्न्याज्यभागौ वरो दक्षिणा राष्ट्रभृद्धोमः। जयाहोमः। अभ्यातानहोमः। स्रुणं नु पंथामित्याहुत्यन्नेप
रं मृत्यो इत्येकाहुतिं। वध्वा अग्नानडुहचर्मोपवेशनं प्राच्यां॥ त्रिरात्रमधःशायानाक्षुन्नयोः॥ इतिवे
कल्पिकानामवधारणं। ततो मातुलादिः कन्यानयनं करोति सा चाग्नेः पश्चात् प्राङ्मुखी उपविशति। आ
रणे वा नरो यथा आकृतमिवित्वनेन परिधापयति॥ ततः कन्यापिता वधूदक्षिणं परस्परं सम
ञ्जयामि इति॥ अतः पटस्य प्रसारणं वधूवरयोः समंजनं ततः संमुखीकरणं समंजंत्विति मंत्रे

२ अवधूवरयोर्मध्ये वस्त्रेणांतर्धानं॥ ततो वरो वधूं जरां गच्छेति मंत्रेण वासः परिधापयति॥ व३

राम

॥५६॥
॥८०॥

अत्र वधूवरयोर्गोत्रप्रवरपूर्वकं प्रपितामहपितामहपितॄणां त्रिर्नामग्रहणं कार्यमिति १

कल्पोक्त ४

णं वासुदेवहरिहरो॥ सकृदिति गंगाधरः॥ अथ कन्यादानं। तत्रायं क्रमः। दाता वरदक्षिणतः स्वदक्षिणे देशा
स्थपत्नीसहितउदङ्मुखउपविश्य वरं देवांशं विष्णुरूपिणं चिराचम्य कुशपाणिः प्राणानायम्य देशकालौ स्मृत्वा
कन्यायाउद्दिश्य [illegible] कोहं मम समस्तपितॄणां निरतिशयानंदब्रह्मलोकावाप्त्या
दिकन्यादानकल्पोक्तफलावाप्तये अनेन वरेणास्यां कन्यायामुत्पादयिष्यमाणसंतत्या द्वादशावरान्पुरुषांश्च
पवित्रीकर्तुमात्मनश्च लक्ष्मीनारायणप्रीतये ब्राह्मविवाहविधिना कन्यादानमहं करिष्य इत्युक्त्वाक्षततिलकु
शजलेन संकल्पं समाप्य वरः कन्यां कनककंपत्नीं कनकाभरणैर्युतां। दास्यामि विष्णवे तुभ्यं ब्रह्म
लोकजिगीषया। विश्वंभरः सर्वभूताः साक्षिण्यः सर्वदेवताः। इमां कन्यां प्रदास्यामि पितॄणां ता
रणाय चेति मंत्रोपठित्वा स्वदक्षिणतस्थ भार्याहस्तपूर्वकल्पितजलधारां कन्यादक्षिणहस्तं गृही
त्वा वरदक्षिणकरे क्षिपेत॥ अमुकगोत्रोमुकोहं ममसं इत्यादि प्रीतये इसंतं पूर्ववदुक्त्वा अमुका मुक
प्रपौत्रायामुकपौत्रायामुकपौत्रीममुकस्य मम पुत्रीममुकनाम्नीं

१० अमुकगोत्रायामुकप्रवरोपेतायामुकप्रवरोपेतामिमेकगोत्रायामुकप्रपौत्रीम[illegible] १०

द्वादशापरान्

॥ श्रीरूपिणीं प्रजापतिदैवत्यां प्रजोत्पादनार्थं तुभ्यं संप्रददे ॥ इति वरहस्ते सकुशोदकं जलं क्षिपेत् । प्र-
जापतिः प्रीयतामिति मनसा स्मरेत् ॥ न ममेति वाच्यमिति प्रयोगे वेति स्पष्टे । वरः स्वस्तीत्युक्त्वा
द्यौस्त्वेति प्रतिग्रहं करोति ॥ ततो दाता गौरीकन्यामिमां विप्र यथाशक्ति विभूषितां ॥ गोत्राय प्रशर्मणे तु-
भ्यं दत्तां विप्र समाश्रय । कन्ये ममाग्रतो भूयाः कन्ये देवि पार्श्वयोः ॥ कन्ये मे पृष्ठतो भूयास्त्वद्दानान्मोक्षमा-
प्नुयां ॥ मम वंशकुले जाता पालिता वत्सराष्टकं ॥ तुभ्यं विप्र मया दत्ता पुत्रपौत्रप्रवर्धिनी ॥ न्यूनवय-
स्कायां पालिता वर्षसप्तकमित्यूहः कार्यः । धर्मे चार्थे च कामे च नातिचरितव्या त्वयेयं । नाति-
चरामीति वरः । दाता देशकालौ स्मृत्वा कृतस्य कन्यादानस्य प्रतिष्ठासिद्ध्यर्थमिमां दक्षिणां तुभ्यम-
हं संप्रददे ॥ इति सजलं यथाशक्ति सुवर्णं दक्षिणात्वेन वरहस्ते दत्त्वा न ममेति वदेत् ॥ स्वस्तीति वरः । त-
तो दाता जलभाजन गोमहिष्यश्वगजदासीदासशय्यावाहनालंकारादि यथाविभवं संकल्प्य वरा-
दद्यात् ॥ गृह्यकोक्तादिति कामस्तुतिपाठः इति हरिहरगंगाधरौ । ततो वरो वधूं गृहीत्वा निष्क्राम-

पूर्वकं २

नियदेषि मनसेति। असौ स्थाने वधूवरौ नामादेशः। निष्क्रमणप्रभृति कन्यां पुरुषे दक्षिणहस्तं
धेवारि प्रयुंजे कल्याणं गृहीहां अग्नेरुत्तरतो दक्षिणतो वा वाग्यतस्तिष्ठेत्॥ ततः परस्परं समीक्षे
यामित्याह॥ अन्योन्यं समीक्षणं अघोरचक्षुरिति वरकर्तृके समीक्षणमंत्रपाठः। देवपश्चादग्नेः प्रदक्षि
णं। अत्र वा वासः॥ परिधानादिकर्म ततः पश्चादग्नेस्तेजनीं कटं वा दक्षिणपादेन प्रवर्त्य उपविशतीति व
रः॥ वरदक्षिणतो वध्वा उपवेशनं। ततो ब्रह्मोपवेशनादि चरुवर्ज्यमाज्यभागांते विशेषः॥
विपत्रच्छेदनं कुशादि वरांतानामासादनं॥ उपकल्पनीयानि। शूर्पे शमीपलाशमिश्रा लाजाः। दृष
त्॥ लोमान्यनुडुहश्चर्म कुमार्या भ्राता॥ आचार्यः प्रवरद्यं। आज्यभागांते आज्येनैव च हुत्वा हातुः स्वा
हा स्वः स्वाहा। लवंत्री सवन्त्री। अयाश्चाग्ने पते त्राते १। ३। उत्तमं। तत्सर्वप्रायश्चित्तं हुत्वा राष्ट्रभृतो हो
माः। तन्नु नाम्नाराजन्तः॥ ऋताषाडृतधामाग्निर्गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्॥ इदम
ग्नये गंधर्वाय न मम। ऋताषाडृतधामाग्निर्गंधर्वस्तस्यौषधयोऽप्सर

मुदो नाम ताभ्यः स्वाहा ॥ इदमोषधिभ्योऽप्सरोभ्यो मुद्भ्यो न मम ॥ २ ॥ सꣳहितो विश्वसामा सूर्यो गंधर्व
स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा ॥ वाट् ॥ इदं सꣳहिताय विश्वसाम्ने सूर्याय गंधर्वाय ॥ ३ ॥ सꣳहि
तो विश्वसामा सूर्यो गंधर्वस्तस्य मरीचयोऽप्सरस आयुवो नाम ताभ्यः स्वाहा ॥ इदं मरीचिभ्योऽप्सरो
भ्य आयुभ्यो न मम ॥ ४ ॥ सुषुम्णः सूर्यरश्मिश्चन्द्रमा गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा
वाट् इदं सुषुम्णाय सूर्यरश्मये चन्द्रमसे गंधर्वाय न मम ॥ ५ ॥ सुषुम्णः सूर्यरश्मिश्चन्द्रमा गंधर्व
स्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ताभ्यः स्वाहा ॥ इदं नक्षत्रेभ्योऽप्सरोभ्यो भेकुरीभ्यो न मम ॥ ६ ॥
इषिरो विश्वव्यचा वातो गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ॥ इदमिषिराय विश्वव्यच
से वाताय गंधर्वाय ॥ ७ ॥ इषिरो विश्वव्यचा वातो गंधर्वस्तस्यापोऽप्सरस ऊर्जो नाम ताभ्यः स्वाहा
वाट् ॥ इदमद्भ्योऽप्सरोभ्य ऊर्ग्भ्यो न मम ॥ ८ ॥ भुज्युः सुपर्णो यज्ञो गंधर्वः स न इदं ब्रह्म क्षत्रं पातु त
स्मै स्वाहा वाट् ॥ इदं भुज्यवे सुपर्णाय यज्ञाय गंधर्वाय न मम ॥ भुज्युः सुपर्णो यज्ञो गंधर्वस्तस्य दक्षिणा

सुपर्णाय

यं

बो २

राम

॥ ८२ ॥

॥ ८२ ॥

नम१

अप्सरसस्ताबायमेतान्य स्वाहा इदं दक्षिणाभ्योऽप्सरोभ्यस्ताबाभ्यो॥ प्रजापतिर्विश्वकर्मा मनो गं
धर्वः स न इदं ब्रह्मक्षत्रं स्वाहा वाट्॥ इदं प्रजापतये विश्वकर्मणे मनसे गंधर्वाय न मम॥११॥ प्रजापति
विश्वकर्मा मनो गंधर्वस्तस्य ऋक्सामान्यप्सरस एष्टयो नाम ताभ्यः स्वाहा॥ इदमृक्सामेभ्योऽप्सरोभ्य एष्टि
भ्यो न मम॥१२॥ इति राष्ट्रभृद्धोमः॥ ॥अथ जयाहोमः॥ ॥चित्तं च स्वाहा इदं चित्ताय॥ चित्तिश्च स्वाहा
इदं चित्त्यै॥ आकूतं च स्वाहा इदमाकूताय॥ आकूतिश्च स्वाहा इदमाकूत्यै। विज्ञातं च स्वाहा इदं विज्ञाताय। वि
ज्ञातिश्च स्वाहा इदं विज्ञात्यै॥ मनश्च स्वाहा इदं मनसे। शक्वरीश्च स्वाहा इदं शक्वरीभ्यः। दर्शश्च स्वाहा इदं दर्शा
य॥ पूर्णमासं च स्वाहा इदं पूर्णमासाय॥ बृहच्च स्वाहा इदं बृहते। रथंतरं च स्वाहा इदं रथंतराय। प्रजाप
तिर्जया निंद्राय वृष्णे प्रायच्छदुग्रः पृतनाजयेषु॥ तस्मै विशः समनमंत सर्वाः स उग्रः स इह हव्यो ब
भूव स्वाहा। इदं प्रजापतये॥ ॥इति जयाहोमः॥ ॥अथाभ्यातानहोमः॥ अग्निर्भूतानामधिपतिः
स मावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्यां स्वाहा

२

रमग्नये भूतानामाधिपतये। इंद्रो ज्येष्ठानामधिपतिः स मावतु देवहूतो ८ स्वाहा। इदमिंद्राय ज्ये
ष्ठानामधिपतये। ब्रह्मा माणोष्ठु सर्वमंत्रेषु समावत्वित्यादि मंत्रशेषस्यानुषंगः। यमः पृथि
व्या अधिपतिः स० हूतोथं स्वाहा। इदं यमाय पृथिव्या अधिपतये। ग्रन्थोदकालं चेइति वा सुदेव
॥ वायुरंतरिक्षस्याधिपतिः स० इदं वायवेंतरिक्षस्याधिपतये॥ सूर्यो दिवोधिपतिः स० इदं सू
र्याय दिवोधिपतये। चंद्रमा नक्षत्राणामधिपतिः स० इदं चंद्रमसे नक्षत्राणामधिपतये॥ बृहस्प
तिर्ब्रह्मणोधिपतिः स०। इदं बृहस्पतये ब्रह्मणोधिपतये। मित्रः सत्यानामाधिपतिः॥ स० इदं मि
त्राय सत्यानामाधिपतये॥ वरुणोपामधिपतिः स० इदं वरुणायापामधिपतये। समुद्रः स्रोत्याना
मधिपतिर्वः स०। इदं समुद्राय स्रोत्यानाम० अन्नं ७ साम्राज्यानामधिपतितन्मावतु स० इदमन्नाय
साम्राज्यानामधिपतये। सोम ओषधीनामधिपतिः स० इदं सोमायौषधीनामधिप० सवि
ता प्रसवानामाधिपतिः स०। इदं सवित्रे प्रसवानामधिपतये। रुद्रः पशूनाम०। इदं रुद्राय पशुप

स० रि

राम

॥घर॥
॥८७॥

इदमग्नये। स्वस्तिनाम॰ इंद्राहा इदंमन ... र्या॰ इदंप्रोनुस्वाहा इदंवैवस्वताय॰ परम्रसो॰ वीरास्वाहा ८

नामधिपतये। उदकोपस्पर्शनं॥ त्वष्टा रूपाणामधि॰ इदंत्वष्ट्रे रूपाणामधिपतये। विष्णुःपर्वतानामधिपतिः स॰ इदंविष्णवेपर्वतानामधि॰ मरुतोगणानामधिपतयस्तेमावंत्वस्मिं॰ इदंमरुद्भ्योगणानामधिपतिभ्यः॥ पितरःपितामहाःपरेवरेततास्ततामहाः॥ इहमावंत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मण्यस्यांदेवहूत्यां॰ स्वाहा। इदंपितृभ्यःपितामहेभ्यःपरेभ्योवरेभ्यस्ततेभ्यस्ततामहेभ्यः॥ उदकोपस्पर्शनं॥ इत्यभ्यातानहोमः। अग्निरैतुप्रथमोदेवतानां॰ रोदात्स्वाहा। इदमग्नये। इमामग्निस्त्रायतां॰ इदमग्नये। उदकोपस्पर्शनं। संस्रवप्राशनांतेवाग्न्यायंहोमः॥ ततःकुमार्याश्चभ्राताशमीपलाशमिश्रांल्लाजानंजलिनांजलावावपति तांजुहोतिकुमारीतिष्ठंती अर्यमणमिति प्रथमा॥ इदमग्नयेर्यम्णेनेतित्यागोवरस्य॥ इयंनार्युपब्रूतेतिद्वितीया। इदमग्नये। इमांल्लाजानावपामीतितृतीया। इदमग्नये। कन्येवमंत्रंजपंपठंति॥ ततोवरोगृह्णामितेसौभगत्वायहस्तमिति तेनमंत्रेणकन्यायाःसांगुष्ठंसहितंदक्षिणंहस्तंगृह्णाति॥ अथैनामश्मा

५

जुहोति ४

तृतीयांतांतृतीयांतां ४

ली

रोहयति दक्षिणपादेनोत्तरतः स्थापितं आरोहेमम श्मानमिति मंत्रेण। वरस्य मंत्रपाठः॥ त
तो वरः सरस्वती प्रेदमवेती मां गाथां पठति। अथ वधूवरौ अग्नेः प्रदक्षिणं परिक्रामतस्त त्यमग्ने प
र्यवहन्निति वरः पठित मंत्रेण। ततो लाजावपनादि परिक्रमणांते पुनर्वारद्वयं कुर्यात्॥ ततो परिक्रम
णांते शूर्पकोणेन सर्वान् लाजानामंजल्लौ प्रक्षेपः॥ ततः कुमारी तांजुहोति॥ अर्यमायस्वाहेति॥ इदं अर्यमाय
स्वा नमेति वरः। अत्राचारानुष्ठी चतुर्थपरिक्रामणं कुतः इति रेणुकारी क्षितादयः॥ ततो वरः आज्ये
न प्रजापतये स्वाहेति जुहोति॥ इदं प्रजापतये॥ अथैनामुदीचीं सप्तपदानि प्रक्रामयति। तत्र वरः
सप्तपदानि प्रक्रामस्वेति ब्रूयात्। एकमिषे विष्णुस्त्वां नयत्विति मंत्रपठित्वा पूर्वमंद्धे ऊर्जे विष्णु॰ त्री
णि रायस्पोषाय वि॰। चत्वारि मायोभवाय वि॰। पंच पशुभ्यो वि॰। षडृतुभ्यो वि॰। सखे सप्तपदा भव सा
मामनुव्रता च भव वि॰। सप्तमं। ततो वरः पूर्वघटात् उदकुंभात् उदकमादाय आपः शिवेति मंत्रेण वधूम
धन्य निषिंचति। ततो वरः। सूर्यमुदीक्षस्वेति॥ वधूं प्रेरयति। सा च तच्चक्षुरित्यादि॰ स्मरणमान

राम

म॰ष॰र॰॥
।८४।

शारदः शतमिति मंत्रेण सूर्यमुदीक्षते॥ ततो वरो वधूमभिमंत्रयते। सुमंगलीरिति। अथाचारात्
स्त्रियः सिंदूरादिदानं कुर्वंति। ततो वरस्तामुत्थाप्य प्राच्यामुदीच्यां वापरिवर्तते रोहिते आनडुहे चर्म
णि उपवेशयतीह गावइति। ततो वर आगत्य पश्चादग्ने रुपवेश्याग्नये स्विष्टकृते स्वाहेति जुहोति॥
इदमग्नये स्विष्टकृते। संस्रवप्राशनं मार्जनं॥ पवित्रप्रतिपत्तिः। प्रणीताविमोकः। ब्रह्मणे दक्षिणा
दानं। ततः स्वकीयामाचार्याय गां ददाति ब्राह्मणेभ्यस्त्रेत्॥ ततोस्तमिते वरो ध्रुवं दर्शयति ध्रुवमसी
ति मंत्रेण॥ सा च तूष्णीं ध्रुवं पश्यति। सा यदि न पश्येत्तथापि पश्यामीत्येव ब्रूयात्॥ ततो दंपत्योस्त्रिरा
दि नियमः॥ इति विवाहे पदार्थक्रमः॥ ॥ अथ देवकोत्थापनमंडपोद्वासनविधिः॥ तत्र कालः॥
समे वा दिवसे कुर्याद्देवकोत्थापनं बुधः। षष्ठे च विषमे नेष्टमुत्थापं पंचमसप्तमे॥ समेषु षष्ठं विष
मेषु पंचमसप्तमान्यातिरिक्तदिने नात्रेष्टमित्यर्थः॥ संकल्पपूर्वकं सर्वदेवताः प्रत्येकं पूजयित्वा उत्ति
…णस्य तत इति विसर्जयेत्॥ मंडपोद्वासनं यथाकुलाचारं कृत्वा द्विजाशिषो मंत्रेण कारय

स

यात्॥ ॥अथ वधूप्रथमगृहप्रवेशः॥ ॥वधूप्रवेशः प्रथमे तृतीये ऽब्दे पंचमके प्रव
के। द्वितीयके वाथ चतुर्थके वा षष्ठे वियोगाभयदुःखदः स्यात्॥ लल्लः॥ स्वजनजनपुरप्रवेशो देशान्तरवि
निवृत्तेत्यो विवाहे॥ नववधूगृहगमने प्रतिशुक्रविचारणं नास्ति॥ नित्यायाने गृहे जीर्णे प्राशने नीते
षुप्रसू॥ वधूप्रवेशमांगल्ये न मो षो गुरुशुक्रयोः॥ ज्योतिःप्रकाशे॥ वामे शुक्रे न वोढव्याः सुखेहानिश्च
दक्षिणे। धनं धान्यं प्रसूतश्च सर्वं नाशं पुरःस्थिते॥ नवोढयास्तु वधूयं यदुक्ते संमुखे न्वगो॥ त
देव विधुघेर्द्धये केवलं तदिह गमने॥ पूर्वतो ध्रुदिते शुक्रे प्रयायाद्दक्षिणापरे। पश्चाद्ध्रुदिते चैव
यायात्पूर्वोत्तरे दिशौ। तथा चाषाढादमास मार्गस्य पूर्वादिमुखो दिश प्रातीतं वा मास त्रयं कुर्यात्
ये॥ चैत्रमार्गस्य पूर्वा घष्टादिदस्य मुखादिशि मासद्वयं विदिद्वैकं मासिकं मेषेके ष्ठकेंजीनी या
त्॥ इदं द्वयं ग्रामांतरे नववधूगमने वर्ज्यं॥ नियतकालेपि कदाचित्रिषेधमाहगार्ग्यः॥ व्य
तीपाते च संक्रांतौ ग्रहणे वैधृतौ न वधि॥ श्राद्धं विना शुभं नैव प्राप्तकालेपि मानवः॥ तथा गर्ग

दि

राम

॥धर॥
॥८५॥

म२

ल

संक्रांतिविष्टयादिप्राप्तेकालेपिमाचरेत्॥ इतिविवाहात्प्रथमेपौषेआषाढेचाधिमासिके।अर्द्धग
हेवसेत्स्त्रीचैत्रेतातगृहेतथा॥ ॥इतिवधूगृहागमनविधिः॥ ॥अथप्रयोगेतिपदार्थक्रमः॥ ॥
विशेषः॥ अग्निस्थापनादिब्राह्मणतर्पणांतंविवाहकर्म।प्रथमंआचार्यकर्तृकमग्निस्थापनं।ततोमधुपर्का
दि।अभ्यर्चयेतिवरः॥ विष्टरोऽइत्यन्यः॥ प्रतिगृह्यतामितिदाता॥ प्रतिगृह्णामीतिवरः॥ ॥एवमग्रेसर्वत्रपाद्यादौज्ञे
यं॥ कस्मिंश्चिद्विष्टरेआसनं।तद्देवतेनैवमंत्रेणपादयोरधस्तात्त्रिधानंद्वितीयविष्टरस्य।प्राणसम
र्पणेनास्तिसंप्रदायः सर्वत्रगौरात्तुत्रांतेत्लाऽत्रांतिवाचनं॥ पुण्याहवाचनस्थाने॥ ततोमधुपर्क

८४

वेनसमापनं॥ ततः सौन्निएकन्यादानं।ततःकौतुकागारंप्रविशतियुवतीनांमंगलाचारयुक्तानामप्रति
कूलत्वाचैनप्रविशति।अन्यत्रापद्यपातकेन्यः॥ ततआचार्योवासः परिधापयति॥ जरांगछ इति।उत्तरी
यंचाततःसमंजनं।अध्येयमाणमाचार्यस्य।कंकणवचनेपरस्परं।दक्षिणहस्तेनपाणिंगृहीत्वा
ग्राभतियदेषीति॥ अकन्यामग्रहणेआचार्यः परस्परंसमीक्षणं।उदकुंभेस्तंघेकत्वानस्थेयं॥

ण दक्षिणमग्निं परीत्य पश्चादग्नेस्तेजन्यां कटे वा दक्षिणपादं दत्त्वाउपवेशनं। ब्रह्मोपवेशनादि सर्वं
प्रायश्चित्तांते विशेषः। अश्मास्थापनाद्यंते चैवोरश्मा वः॥ अर्यमणे शमीपलाशमिश्रांल्लाजाः। हृदपले चाग्यानडु
हं। चात्ता। वरश्च। पर्युक्षणंते आघारादि सर्वं प्रायश्चित्तं। राष्ट्रभृतो हीनामिष्टयाहोमः। राष्ट्रभृद्धोमः॥ अ
ताषा०। ततो जयाहोमः॥ चित्तं च स्वाहेति चतुर्थ्यंतेन प्रयोग इति श्रीअग्नेनेतोदाहृतपणपरे स्वाहाकारः
सर्वत्र साकांक्षत्वादिति सूत्रे ज्ञेति गर्गः। ततोऽभ्यातानहोमः। ततोऽग्निरैत्वादि चतुष्टयं। परं मृत्यविति च
त्वा ततः कुमार्या हस्तयोरुपस्तरणं भ्रातुः॥ मातकुमारीहस्ते लेपनं ददाति। लाजानामविपनमं
जलौ॥ प्रत्यभिघारणं। सव्येन हतेन दक्षिणेन होमः॥ इदमर्यमणे इति प्रत्ययमस्य त्यागः। द्वितीयत
तीयपोरग्नये। अर्यमणमिति त्रयाणां मंत्राणां पाठो वरस्य० पाणिग्रहणं। अश्मानमारोहेत्यस्वे
ति प्रेषपूर्वकमारोहणं। परिक्रमणं एवं वारद्वयं लाजादिपरिक्रमणांते। जगाय स्वाहेत्यनेन विग्रा
हं वारद्वयं होमः॥ तदेशी परिक्रमणं॥ प्रजापतये होमः। अभिषेकः। ततोऽस्य निष्क्रमप्रेषपूर्वकं स

त्रै१ १सप्तपदानि१ त

राम

॥घर॥
॥८६॥

यविदक्षिणं। हृदयालंभनं। अभिमंत्रणं। शाकटेचर्मास्तीर्णे वरः कन्यामुपवेशयति॥ स्विष्टकृद्धोमः॥ संस्र
३२ वप्राशनं। परं मन्यविस्त्र वाहोमः॥ मार्जनं पवित्रप्रतिपत्तिः॥ ब्रह्मणे दक्षिणादानं। आचार्याय गोदानं॥
अस्तमिते ध्रुवदर्शनं॥ प्रेषपूर्वकं ध्रुवमसीति वध्वापाठः॥ बर्हिर्होमः॥ प्रणीताविमोकः कंकणापवर्गसमि मा३
दाधानं। उत्सर्जनं। भ्रमणं॥ उपयमनकुशानामग्नौ प्रक्षेपः॥ ब्राह्मणभोजनं॥ ॥ इतिगर्गतेपद्धायेम म४
न मः॥ ॥ अथ पुनर्विवाहः॥ कृते विवाहे पंचांगशुद्धिराहित्यादिदोषश्चेद्ज्ञातस्तदा शान्तिः शास्त्रोक्त
काले विशेषे पुनर्विवाहः कार्यः। तदाह नृसिंह श्रीधरीये पुनर्विवाहं वक्ष्यामि दंपत्योः शुभवृद्धिदं॥ ४६
लग्ने कुलग्नयोर्दोषे ग्रहताराविसंभवे। अन्येषु अशुभकालेषु दुष्टयोर्दिसंभवे। अपनं चोत्तरं श्रेष्ठ ४८
२स वर्धनं तु विशेषतः। आषाढ माघ शीर्षौ द्वौ वर्ज्यौ शेषाः प्रशस्तवहाः। विवाहोक्ते तिथिष्यता राशि वारादि वर्ज ति
ज्ञाः॥ करणयोगसंज्ञा वे ग्रहगोचरवर्गकाः। तस्मिन्विवाहसमये अन्ये शस्ताः पे वाहि पूर्वोक्ते पूर्ववरा
के च विवाहः प्रजायते॥ अथ द्वितीयादिविवाहविधिः॥ ॥ तत्राधिवेदनीया आह या

२१ स२ दौर गा४

ज्ञवल्क्यः॥ सुरापि व्याधिता धूर्ता वंध्यार्थघ्न्यप्रियंवदा। स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा॥
अधिविन्ना तु भर्त्तव्या महदेनोन्यथा भवेत्। अधिवेत्तव्या नाम तदुपरि स्त्र्यंतरं वर्त्तव्यामित्यर्थः॥ आ
पस्तंबः॥ धर्मप्रजासंपन्ने दारे नान्यां कुर्वीतेति॥ अधिवेदने प्रतीक्षाकालं मनुराह॥ वंध्याष्ट
मेधिवेत्तव्याब्दे दशमे तु मृतप्रजा। एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी॥ इत्यर्थ्ये तु विवाहांतरे
विशेषः॥ एकामुत्क्रम्य कामार्थमन्यां लब्धुं य इच्छति। समर्थस्तोषयित्वार्थैः पूर्वोढामपरां वहेत्॥
याज्ञवल्क्यस्तु। आज्ञासंपादिनीं दक्षां वीरसूं प्रियवादिनीं॥ त्यजन्दाप्यस्तृतीयांशमद्रव्यो भरणं
स्त्रियः॥ सधनो धनतृतीयांशमधनोऽशनाच्छादनात्मकं भरणं दापयेदित्यर्थः॥ यात्वेतीवतापरितुष्टा
गृहाद्विनिर्गच्छेत्तां प्रत्याह मनुः॥ अधिविन्ना तु या नारी निर्गच्छेद्रोषिता [illegible] गृहात्। सा
सद्यः संनिरोद्धव्या त्याज्या वा कुलसन्निधाविति॥ बहुभार्योऽपि ज्येष्ठयैव सह धर्म्यं सपत्नीकसाध्यं कु
र्यादिति॥ हेमाद्रौ कात्यायनः॥ अग्निशिष्टादिशुश्रूषां बहुभार्यः सवर्णया॥ कारयेत्तद्बहुत्वे

स्मृ

राम
॥५२॥
॥८१॥

चेत्तुष्ट्या च गर्हिता न चेदिति। शिष्टसमुत्पन्नघाग्रातिथ्यादिपूजा॥ सा च पत्नी संपाद्यधर्ममात्रोपलक्षणे
ष्या। गर्हिता धर्मायोग्यत्वापादकपातित्यादिदोषवती न चेदित्यर्थः। तादृशी चेत्प्रतया किं त्वनेन विन
तया॥ अन्यास्मसवर्णा इदं चाधानेस्म हाधिकृता न कन्यायाविषयं॥ अनधिकृता या स्त्री प्रसन्नस्य त्वावे
एवन्नत्रापि केवले कृत्वर्ण्यमात्मा वेदहणादियजमानो कुंबरी समानवदेकये वसवर्णया द्वितीयया का
रयेत्। पत्नीसन्नहनादिकं तु संस्कारकं। सताधिकृतान्निः सवर्णान्निदित्यादिम्नी मांसामासल्ल
मनसांसु त्वानं। द्वितीयादिविवाहेश्मिनियममाहहोमापकालापनः॥ सदारोन्यान्पुनर्दारानुद्वोढुं
कारणांतरात्॥ यदीच्छेदग्निमान्कुर्वंन्क्वहोमास्य विधीयते। स्वाग्नावेव न वेदोमो लौकिकेन कदाच
नेति। अयं चनियमः संज्ञेत्र॥ आमातरादावसन्नवेतु लौकिकाग्नौ। अत्र द्वितीयादिविवाहे जीवत्पि
तकोपि स्वयमेव नांदीश्राद्धं कुर्यात्॥ नांदीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे पुनः॥ अत ऊर्ध्वं प्रकुर्वीत
स्वयमेव तु नांदिकमिति स्मृतेः। तत्र पितृवर्गं विहाय मातृमातामहवर्गयोः कुर्यात्॥ मात्रादि जीव

स्या मातामहवर्गस्यैव॥ तस्मिन्नपि जीवति दारलोपाद्द्वितीयाद्युत्प्य एव। सोपि साग्निकश्चेत् येभ्यः पिता
ददाति तेभ्यः स्वयमपि दद्यात्। येभ्य एव पिता ददाति तेभ्यो दद्यात्स्वयं सुत इति वचनात्॥ अनग्निस्तु साग्नि
कोपि पितृदेवताभ्यो दद्यात् अनुलोपः। वृद्धौ तीर्थे च संन्यस्ते ताते च पतिते सति॥ येभ्य एव पिता ददाति तेभ्यो
दद्यात्स्वयं सुत इति मैत्रावरुणीयपरिशिष्टादिस्मृतेः॥ द्वितीयादिविवाहे कालविशेषः संग्रहे। प्रम
तामृतिवासरादितः पुनरुद्वाहविधिर्वरस्य च॥ विषमे परिवत्सरे शुभो युग्मे चापि मृतिप्रदो भवेत्॥
जीवत्स्त्रीकस्य पत्न्यां द्वितीयादिविवाहे नायं कालनियमः॥ ॥ अथ तृतीयमानुषीविवाहस्य निषि
द्धत्वात्तस्मिन्काले अर्कविवाहविधिः॥ ॥ तृतीयानिषेधमाह कश्यपः॥ तृतीयां मानुषीं नै
व चतुर्थीं पासमुद्वहेत्। पुत्रपौत्रादिसंपन्नः कुटुंबी साग्निको वरः॥ उद्वहेद्दितिसिद्ध्यर्थं तृती
यां न कथंचन। मोहादज्ञानतो वापि यदि गच्छेत्तु मानुषीं। नश्यत्येव न संदेहो गर्गस्य वचनं यथा॥
अन्यत्रापि। तृतीयां यदि चोद्वाहेत्तर्हि सा विधवा भवेत्। संग्रहे। तृतीयां यदि चोद्वाहेत्तर्हि

सा विधवा न भवेत्॥ चतुर्थ्यादि विवाहार्थं तृतीयेऽर्कं समुद्वहेत्। आदित्यदिवसे वापि हस्तर्क्षे वा शनैश्चरे। शुभे
दिने वा पूर्वाह्णे कुर्यादर्कविवाहकं। इत्यादि ब्रह्मपुराणे दर्शितं॥ ग्रामात्प्राच्यामुदीच्यां वा सपुष्पफलसंयुतं।
परीक्ष्यार्कं यतोऽधस्तात्स्थंडिलादि यथाविधि॥ वासःसूत्रकाले कृते वासास्तोरणगंधादिभूषिते। सपुष्पफ
लशाखैकमर्कगुल्मं समाश्रयेत्। सल्लक्षणेन संयुक्तमर्कं संस्थापयेत्ततः। अर्ककन्याप्रदानार्थमाचार्यं वर
येत्सुरा। अर्कसन्निधिमागत्य तत्र स्वस्त्यादि वाचयेत्॥ नांदीश्राद्धं हिरण्येन अष्टवर्गान्प्रपूजयेत्॥ पू
जयेन्मधुपर्केण वरं विप्रस्य हस्त[illegible]तः। यज्ञोपवीतं वस्त्रं च हस्तकर्णादिभूषणं। अलीषंगं घर्मात्यादि वरा
यास्मै प्रदापयेत्॥ स्वशाखोक्तविधानेन मधुपर्कं समाचरेत्। ब्रह्मपुराणे यथाविधि। तस्यानंतरं कुर्वीत
पुरतस्तिष्ठन्प्रार्थयेत्तद्द्विजोत्तमः॥ त्रिलोकवासिन्सप्ताश्व छायया सहितं रवे। वहेत्वमात्यैस्तथा
गंधैस्तन्मंत्रेणैव प्रपूजयेत्॥ तन्मंत्रेण आकृष्णेनेत्यादिना। अन्नत्राणि। श्वेतवस्त्रेण संवेष्टतप्ता
[illegible] सतन्तुभिः॥ गंधपुष्पैः समभ्यर्च्यैतल्लिंगैरन्वैः पिंच्य च॥ गुडौदनं च नैवेद्यं तांबूलं च समर्पयेत्॥

...प्रदक्षिणं कुर्वन्न् जपेन्मंत्रमिमं बुधः। मम प्रीतिकरा येयं मया सृष्टा पुरातनी॥ अर्कजा ब्रह्मणा सृष्टा
अस्माकं प्रतिरक्षतु॥ पुनः प्रदक्षिणीकुर्यान्मंत्रेणानेन मंत्रवित्। नमस्ते मंगले देवि नमः सवितुरात्मजे
त्राहि मां कृपया देवि पत्नी त्वं मे इहागता। अर्क त्वं ब्रह्मणा सृष्टः सर्वप्राणिहिताय च। वृक्षाणामादिभूत
स्त्वं देवानां प्रीतिवर्द्धनः। तृतीयोद्वाहजं पापं मृत्युं चाशु विनाशय। ततस्त्वर्ककन्यावरणं त्रिपुतयं कुर्या
त्समाचरेत्। आदित्यः सविता सूर्यः पुत्री पौत्री च नप्त्रिका। गोत्रं कश्यपमित्युक्तं लोके लौकिकमाचर
त्॥ शुभमुहूर्त्ते निरीक्ष्येत स्वस्तिसूक्तमुदीरयन्। आचार्याग्नि सहितः कुर्यादाचार्यप्रमुखैर्द्विजैः॥ अथा
चार्यं समाहूय विधिना तन्मुखाद्व्रती। प्रतिगृह्णीत तां होमं गृह्योक्तविधिनाचरेत्॥ आचार्यस्य दान
मंत्रमाह व्यासः॥ अर्ककन्यामिमां विप्र यथाशक्ति विभूषितां। गोत्राय नाम्ने तुभ्यं दत्तां विप्र समाश्र
येति मंत्रं उत्तन्न्यत्स्नातकमालिंग्य वा कंकणपूर्वकं। यावत्संवावतं सूत्रं तावदर्के प्रवेष्टयेत्। स्वशाखोक्तेन मं
त्रेण गावश्चा...पबाजपेत्॥ पंचीकृत्य पुनः सूत्रं स्कंधे बध्नाति मंत्रतः। बृहत्सामेति मंत्रेण सूत्ररक्षां

राम

द

॥ ५२॥

॥ ८९॥

६०

रवौ

कल्पयेत्॥ अर्कस्य पुरतः पश्चाद्दक्षिणोत्तरतस्तथा। कुंभांश्च निक्षिपेत्पश्चादाग्नेयादि चतुष्टये॥ सर्व[illegible] प्रति
कुंभं त्रिःसूत्रेणैव वेष्टयेत्॥ हरिद्रागंधसंयुक्तेः पूरयेच्छीतलं जलं॥ प्रतिकुंभे मालाविष्णुसंपूज्य परमेश्व
रं॥ पाद्यार्घादि निवेद्यांतं कुर्यान्नाम्नैव मंत्रवित्॥ अथ होमप्रकारः शौनकेन प्रदर्शितः॥ तृतीयेत्(?) विवाहे तु
प्राप्ते पुरुषस्य तु। आर्के विवाहं वक्ष्यामि शौनकोक्तविधानतः॥ अर्कसन्निधिमागत्य तत्र स्वस्त्यादि वाचयेत्॥
नांदीश्राद्धं प्रकुर्वीत स्थंडिलं च प्रकल्पयेत्॥ अर्कमभ्यर्च्य सौर्या च गंधपुष्पाक्षतादिभिः। सौर्या सप्तदेव
त्या। आकृष्णेत्यादिऋचा॥ सूपं चाल्पं कृत तस्य दक्षिणात्(?) लंकरणैः प्रसूनैः। अर्कस्योत्तरदेशे तु समन्वारब्धेण(?)
तया। एतत्पात्कन्यया। उल्लेखनादिकं कुर्यादाघारांतमतः परं। आज्याहुतिं च जुहुयात्सगोत्रिरनये(?)
कया। यस्मै त्वा काम कामायेत्येवं ततः परं। व्यस्ताभिश्च समस्ताभिस्ततश्च स्विष्टकृद्भवेत्। परिषिंचन
पर्यंतमयाश्चेत्यादिकं क्रमात्॥ प्रार्थनामंत्रादि विशेषमाह व्यासः॥ पुनः प्रदक्षिणं कृत्वा मंत्रमेतमु
दीरयेत्। मया कृतमिदं कर्म स्थावरेषु जरायुणा॥ अर्क त्वाप्यानि नो देहि तत्सर्वं क्षंतुमर्हसि॥ इत्यु

...शीतिसंख्यानि जप्त्वा तं विसर्जयेत् पुनः ।। गोयुग्मं दक्षिणां दद्यादाचार्याय स्वशक्तितः ।। इतरेभ्योपि विप्रेभ्यो
दक्षिणां चापि शक्तितः । ततः सर्वं गुरवे दद्यात्ते पुण्याहमाचरेत् ।। अत्र पंचमदिने कर्त्तव्यमुक्तं वृत्तौ उपाणे
च तुर्ये दिवसे तीते सर्ववर्त्तां प्रपूजयेत् । विसर्जयेद्धोममग्निं च विधिनामानुपूर्वशः ।। उद्वाहे त्वापाने वपु
त्रपौत्रादिवृद्धिमान् । न पत्नी त्र च मित्राणि मंगलं नैव गच्छति । एवमेव द्विजश्रेष्ठ विधिना सम्यगुद्वहे
त् ।। धनधान्यसमृद्धिश्च रक्षा शक्तिः परत्र चेति ।। ।। अत्रैव संक्षेपतः प्रयोगः ।। ।। उक्तादिसावा
रादौ उक्तदेशे पप्यो क्तार्कसमीपे गत्वाचम्य प्राणानायम्य देशकालौ संकीर्त्य मम तत्तीप मानुषी विवाह
दोषान्नाशार्थं अर्कविवाहं करिष्य इति संकल्प्य ।। आचार्यवरणं स्वस्तिवाचनादि सर्वक्रमेण कुर्यात् ।।
अत्र होमविशेषः । देशादिसंकीर्त्य अर्कविवाहांगत्वेन होमं करिष्ये । ततोऽग्निस्थापनाद्याघारांते
कृत्वाऽऽज्येन षडाहुतीर्जुहुयात् ।। संगोभिरंगिरसो नक्षमाणो भग इवेदर्यमणं निनाय ।। जने
मित्रो दंपती अनक्तु बृहस्पते वाजया शूरिव वाजौ स्वाहा ।। इदं बृहस्पतये० । यस्मै त्वा काम कामा

राम

गण राम
ग १४०

एवं यं संम्राड् प्रजा महोतमस्मन्नंकामेदं तापेदं घृतं पिब स्वाहा। इदमग्नये। ॐ भूः स्वाहा। ॐ भुवः स्वा
हा। ॐ स्वः स्वाहा। ॐ भूर्भुवः स्वः स्वाहा। त्यागाउक्त्वा॥ ततः स्विष्टकृत्प्रवाहुत्यादि समापयेत्॥ ततः प्रद
क्षिणप्राशनादि कर्मशेषसमापनं॥ ॥इत्यर्कविवाहः॥ अथैकक्रियानिर्णयः॥ ॥तत्र बृह
मनुः। एकमातृज [illegible] योरेकवत्सरे पुरुषस्त्रियोः॥ न समानक्रियां कुर्यान्मातृभेदे वि
धीयते॥ अत एकस्य पुंसो विवाहद्वयमेकवत्सरे निषिद्धं मातृभेदे दाम्नावात्॥ नारदः॥ पुत्रोद्वाहात्
परं पुत्रीविवाहो न ऋतुत्रये॥ न तयोर्व्रतमुद्वाहान्मंडनादपि मुंडनं॥ वराहः॥ विवाहस्त्वेकजा
तानां षण्मासाभ्यंतरे यदि॥ असंशयं त्रिभिर्वर्षैस्तत्रैका विधवा भवेत्॥ वसिष्ठः॥ न पुंविवाहोर्ध्व
मृतुत्रयेपि विवाहकार्यं दुहितुः प्रकुर्यात्॥ न मंडनात्स्त्रीपितृमुंडनं च गोत्रैकतायां यदि नाब्दभे
दः॥ एकोदरप्रसूतानां विवाहकृत्यात्स्वसुर्नृपाणिग्रहणं विधेयं॥ षण्मासमध्ये मुनयः समूचु
र्ने मुंडनं नेमंडनतोपि कार्यं॥ एतदपवादोप्यत्रैव॥ ऋतुत्रयस्य मध्ये चेदन्याब्दस्य प्रवेशनं॥

तदाप्येकोदरस्यापि विवाहस्तु प्रशस्यते॥ सारावल्यां॥ फाल्गुने चैत्रमासे तु पुत्रोद्वाहोपनायने। ज्ये
ष्ठाद्वस्य कुर्वीत तन्न ज्येष्ठापि विलंबने॥ संहितापदीपे॥ ऊर्ध्वं विवाहात्तनयस्य नैव कार्यो विवाहो दु
हितुः समाब्दं॥ अप्राप्यकन्याश्वसुरालयं च वधूः प्रवेशपास्वगृहं नन्चाद्रौ॥ वसिष्ठः॥ द्विशोभनं त्वेक
गृहेपि नेष्टं शुभं तु पश्चान्नवभिर्दिनैस्तु॥ ग्रीवस्त्रपकं शोभनमुत्सवो वा वाद्यादेरेष्वाचार्यविद्वद्देता
वा। एकोदरप्रसूतानां नाग्निकार्ये त्रयं भवेत्। भिन्नोदरप्रसूतानां नेति शातातपोब्रवीत्॥ ज्यो
तिर्निबंधे कात्यायनः॥ कुले ऋतुत्रयादर्वाक् मंडनात्तु मुंडनं॥ प्रवेशान्निर्गमो नेष्टो न कुर्यान्मं
गलत्रयं। कुर्वंति मुनयः केचिदन्यस्मिन्वत्सरे लघु। लघुवा गुरुवा कार्यं प्राहुर्नैमित्तिकं तु यत्॥
पुत्रोद्वाहः प्रवेशाख्यः कन्योद्वाहस्तु निर्गमः। मुंडनेवोलमित्युक्तं व्रतोद्वाहोतु मंगलो। चौलं मुं
डनमेवोक्तं वर्जयेन्मंडनात्परं। मौंजीबंधापरतः कार्यापि तो मौंजीनमुंडने॥ अभिन्नेवत्सरे पि
स्यान्नदहस्तत्रमेदयेत्॥ अन्नेदेतु विनाशः स्यात्त्रकुर्यादेकमंडपे॥ संकटे तु कपर्दिकारिका

राम

॥धर॥
॥५९॥

सु॥ उद्वाह्य पुत्रीं न पिता विदध्यात्पुत्र्यंतरस्योद्वहनं त्रियां च॥ यावच्चतुर्थं दिनमत्र पूर्वं समाप्य चान्योद्व
हनं विदध्यात्॥ कात्यायनः॥ मौंजीबंधस्तथोद्वाहः षण्मासाभ्यंतरे पिवा॥ पुत्र्युद्वाहं न कुर्वीत विभक्तानां न
दोषकृत्॥ गार्ग्यः॥ भ्रातृयुगे स्वसृयुगे भ्रातृस्वसृयुगे तथा। न कुर्यान्मंगलं किंचिदेकस्मिन्मंडपे हनि॥
ज्योतिर्विवरणे। एकोदरयोर्द्वयोरेकदिनोद्वहने नवेभ्राताः। नघंतरेप्येकदिने केप्याहुः संकटे पुनः।
ऊर्ध्वं विवाहात्षण्मासादे नरस्य नारीविवाहो न कर्त्तव्यं पेस्यात्। नारीविवाहात्तद्देहे पि क्वाप्यान्नरस्यपाणि
ग्रहमाहुरार्याः॥ भिन्नमातृजयोस्तु एकवासरे पि विवाहमाह मेधातिथिः॥ पृथग्मातृजयोः कार्यो वि
वाहस्त्वेकवासरे॥ एकस्मिन्वत्सरे कार्यः पृथग्वैदिकयोस्तथा॥ पुष्पवृद्धिकयोः कार्यं दर्शने वत्सर
स्वयोः॥ भगिनीभ्यामनुज्ञाभ्यां वर्षावत्समपदी भवेत्॥ यमलयोस्तु विशेषमाह गार्ग्यः॥ एकस्मिन्व
मरे प्राप्ते कुर्याद्यमलजातयोः॥ क्षौरं चैव विवाहं च मौंजीबंधनमेव च॥ तथा च कारिकायां। एकस्मि
न्वत्सरे चैव वासरे मंडपे तथा। कर्त्तव्यं मंगलं स्वस्रोर्भ्रात्रोर्यमलजातयोरिति॥ ॥अथ एक

...गृहे भोजननिषेधः॥ ॥ मदनरत्ने भविष्ये। अप्रजायां तु कन्यायां न भुंजीत कदाचन। दौहित्र
स्य मुखं दृष्ट्वा किमर्थमनुशोचसि॥ अपरार्के आदिपुराणे॥ विभुंज्या मातरं मन्येत स्या कोपं न कारये
त्। अप्रजायां तु कन्यायां नाश्नीयात्तस्य वै गृहे। यदि भुंजीत मोहाद्वा पूयं पाशी नरकं व्रजेत्॥ इति॥ ॥ अ
थ नांदीश्राद्धानंतरं धर्माः॥ निर्णयदीपे गार्ग्यः। नांदीश्राद्धे कृते पश्चाद्यावन्मातृविसर्जनं। दर्शश्रा
द्धं क्षयश्राद्धं स्नानं शीतोदकेन च॥ अपसव्यं स्वधाकारं नित्यश्राद्धं तथैव च। ब्रह्मयज्ञं वाध्ययनं न
दीसीमातिलंघनं। उपवासव्रतं चैव श्राद्धभोजनमेव च। नैव कुर्युः सपिंडाश्च मंडपोद्वासनावधि॥
ज्योतिषे। स्नानं सचैलं तिलमिश्रकर्म प्रेतानुयानं कलशप्रदानं॥ अपूर्वतीर्थामरदर्शनं च विवर्ज
येन्मंगलतो ब्दमेकं। पितृणामुद्देशेन कलशप्रदानमित्यर्थः॥ मासषट्कं विवाहादौ व्रतप्रारंभणे न
व। जीर्णभांडादि न त्याज्यं गृहसंमार्जनं तथा। ऊर्ध्वं विवाहात्पुत्रस्य तथा च व्रतबंधनात्॥ आल
नो मुंडनं नैव वर्षं वर्षार्धमेव च॥ अन्यं गेसूतके चैव विवाहे पुत्रजन्मनि। मांगल्येषु च सर्वेषु

न धार्यं गोपिचंदनं॥ बृहस्पतिः॥ तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे॥ नगरग्रामदाहे च स्पृष्टास्पृष्टिर्न वि
द्यते॥ नरस्नायाद्युत्सवेतीते मंगलं विनिवर्त्य च॥ अनुव्रज्यासुहृद्बंधूनर्चयित्वेष्टदेवतां॥ ज्योतिर्निबंधे॥ उद्वा
हात्प्रथमेष्वचौ यदि वसेद्भर्तुर्गृहे कन्यका हन्यात् जननीं क्षये निजतनुं ज्येष्ठे पतिज्येष्ठकं पौषे च श्वसुरं
पतिं च मलिने चैत्रे स्वपित्रालये तिष्ठती पितरं निहंति न च पतेः शासना वेत्रवेत्॥ नि०॥ विवाहात्प्रथमे पौ
षे आषाढे वाधिमासके न सा भर्तृगृहे तिष्ठेच्चैत्रे पितृगृहे तथा॥ हेमाद्रौ स्मृत्यंतरे॥ विवाहव्रतचूडासु व
र्षमर्धं तदर्धकं॥ पिंडदानं मृदास्नानं न कुर्यात्तिलतर्पणं [illegible] स्मृतौ॥ महालये गयाश्राद्धे मातापित्रो
र्मृतेहनि॥ कृतोद्वाहोपि कुर्वीत पिंडनिर्वपणं सुतः॥ ॥इति श्रीगदाधरकृते मु०प्र०का० अष्टमकंडि
कायां विवाहप्रयोगः॥ ॥अथावसथ्योऽग्निहोमः॥ उपयमनप्रभृतौपासनस्य परिचरणं॥ ॥
उपयमनकुशादानादि औपासनस्य आवसथ्याग्नेः परिचरणं व्याख्यास्यत इति सूत्रशेषः॥ प्रभृतिग्र
हणेन उपयमनान्कुशानादाय समिधोन्याधायेत्यपवर्गस्य जुहोति पादेतावल्लभ्यते॥ होमस्य त्रौपदि

...होमे पि चस्तति परिचरणाग्रहणादिति कर्त्तव्यतानन्नवति। स्मोनचात्र होमः। इति कर्त्तव्यताव्युदा
सात्। कथमिति कर्त्तव्यताव्युदास इति चेत्॥ उपयमनप्रभृतीसुक्तत्वात्॥ पर्युक्षणं च मणिकोदकेन
होमकालनियममाह॥ ॥अस्तमितानुदितयोः॥ ॥अस्तमितस्य अनुदितस्य अस्तमितानुदितौ त
योः। कर्म कर्त्तव्यमिति शेषः। आवसथ्याधानानंतरं अस्तमिते च सूर्ये अनुदिते च सर्वदा होमः कार्यः॥
न सकृत्। येनैव सूत्रकार आह। ततोऽस्तमितेऽस्तमितेऽग्निं परिचर्येदेव्यपि घातमूसन्नूनसर्पेन्यो
बलिं हरेदिति बलिहरणविधिपरे वाक्ये होमस्य नित्यत्वं ज्ञापयति। अस्तमितलक्षणं कात्यायने
नोक्तं॥ यावत्सम्यङ् न भाव्यंते नभस्यृक्षाणि सर्वतः। लोहितत्वं च नोपैति तावत्सायं तु हूयते। अ
नुदितस्तु द्विविधः। अनुदितस्य समयाध्युषितः। संपूर्णादित्यमंडलदर्शनोपलक्षितानुदितः
तत्रास्माकं सूत्रे अनुदित एव परिचरणमुक्तं॥ मनुश्चैवचनेउदितग्रहणशरवांतरस्य ध्यानिप्राये
ण मुख्यकालेऽपदा होमो न नवति तदा गौणकालेऽपि कार्यः। तथा च मंडनः मुख्यकालेऽपद

राम

॥ यर॥
॥९३॥

व शं शु कर्मकर्तृत्वेन शक्यते। गौणकालेपि कर्तव्यं गौणोप्यत्र दशो न वेत्। गौणकालपरिज्ञाणमपि तेनै
वोक्तं। अग्न्यासायमाहुतेऽकालात्कालोस्ति प्रातराहुतेः॥ प्रातराहुतिकालात्प्राक् कालः स्यात्सायमाहु
तेरिति। मुख्यकालातिक्रमे प्रायश्चित्तपूर्वकं गौणकालेनुष्ठानं॥ गौणकालातिक्रमे तु लोप एव। प्रा
यश्चित्तद्वयमात्रं। एकमविज्ञातं॥ संध्योपासनहानौ च नित्यस्नाने विलोपश्च। होमं च नैत्यकं सुध्व
सावित्र्यष्टसहस्रं तु क्षितिप्रा जापत्योक्तं द्वितीयं॥ होमे कर्तास्वयं स्वस्यासंभवे पत्न्यादयः॥ प्रयोगरत्ने स्मृ
तौ॥ पत्नी कुमारी पुत्रो वा शिष्यो वापि यथाक्रमं। पूर्वस्याभावे विदध्यादुत्तरोत्तरः॥ स्मृत्यर्थसा
रेपि। यजमानः प्रधानं स्यात्पत्नी पुत्रश्च कन्यका॥ ऋत्विक् शिष्यो गुरुर्भ्राता भागिनेयः सुतापतिः॥ ए
तैरेव हुतं यत्तु तद्धुतं स्वयमेव तु॥ पत्नीकन्यावज्जुहुयाद्विना पर्युक्षणं क्रियां॥ अत्र च वचनात्पत्न्या मं
त्रपाठेधिकारः। केचित्तु पर्युक्षणेनाधिकारः॥ अग्निहोत्रे तु॥ न वा कन्या न युवती नाल्पविद्यो न बा
लिशः॥ होमे स्यादग्निहोत्रस्य नार्तो नासंस्कृतस्तथेति वचनात्स्त्र्यादीनामनधिकारः। त्यागे

दर्व६

॥१॥

…विशेषः। सन्निधौ यजमानः स्यादुद्देशत्यागकारकः। असन्निधौ तु पत्नी स्यादुद्देशत्यागकारिणी॥ अ
सन्निधौ तु पत्न्याः स्याद् ऋत्विक्पुत्रस्तेनुज्ञया। उभयोर्देः प्रवसे वेत्तेऽकृतानुज्ञया विना॥ मंडनः॥ त्यागं तु
सर्वथा कुर्यात्तत्रान्यतरस्तयोः। नुज्ञाव पासमर्थो वा न्नियुक्तः कथंन स्त्यजेत॥ इद्धार्तेऽऽलेरहूते
ती॥ ॥ गमेन द्धौ देकाव्रीहितंडुलैर्वा अहूते यवैर्वा जुहुयादित्यर्थः॥ तेषामभावे शारदातरगरूप
रिशिष्टोक्तानि द्रव्याणि ग्राह्याणि। तत्र प्रयोगरत्ने। पयो दधि सर्पिर्यवागूओदनं तंडुलाः। सोमस्तै
लमापो व्रीह यवास्तिला इति होम्यानि॥ तंडुल नीवारश्यामाकयावानलानो॥ व्रीहिशालियवा
गोधूमप्रियंगवः स्वरूपेणापि होम्यास्तिलाः स्वरूपेणैव ज्ञाते चतुःषष्टिर्वा हुतव्रीहितुल्यानां त
दर्धं तिलानां तदर्धं सर्पिः तैलपयोस्तैलं च तिलजं तिलात सीकुसुमानां येन प्रस्थमोदेव तां जुहुया
त्तेनैव द्वितीयां जुहुयाद्येन वसायं जुहुयात्तेनैव प्रातरिति॥ अत्र तेनैव प्रातरि प्रतिनिषिधं बृह
स्पतिस्वाहुतिपरिमाणमाह। प्रस्थस्याधानं चतुःषष्टिराहुतेः परिकीर्तितं। तिलानां च तदर्धं तत

२५

राम

॥ ग्रह॥
॥२४॥

डल्लाव्रीहिभिः समाः। प्रसृत्यम्न। प्रसृतिर्द्वितयं मानं प्रसृतं मानं चतुष्टयामिति॥ बौधायनसूत्र। व्रीहीणां यवा
नां वप्रातमाहुतिरिष्यते॥ अगस्त्ये ऽवमानं स्याद्धारा गोकर्णो दीर्घिका। सिंक्थौ तन्नो रवरे। अत्र ग्रासस मंत्रो नेल्ला
जामुष्टिमितामताशतिदधिपक्षे तं तु पलक्षेच नोषपग्राग्रानां। अहुतपक्षेतन्नाव ग्मानदनीयत्वादितित्र्न्य
त्र॥ ॥अग्नये स्वाहा। प्रजापतये स्वाहेति सायं। सूर्याय स्वाहा। प्रजापतये स्वाहेति प्रातः॥ ॥तत्र सायंका
ले ग्नये स्वाहेति पूर्वामाहुतिं जुहोति। प्रजापतये स्वाहेत्युत्तरां च जुहोति॥ प्रातः काले सूर्याय स्वाहेत्यनेन मंत्रे
ण सर्वामाहुतिं हुत्वा प्रजापतये स्वाहेत्युत्तरां च जुहुयात॥ ॥इमाथं सौमित्रावरुणेण पुमाइसावश्विनावुभौ॥
पुमानिंद्रश्च सूर्यश्च पुमांश्च संवर्ततां मयि स्वाहेति पूर्वां गर्भकामा॥ यदि गर्भकामा पत्नी भवति तदा सायं प्रातः
पूर्वामाहुतिं पत्न्येव पुमां ७ सौ मित्रावरुणावितिग्मनेन मंत्रेण जुहोति॥ उत्तरामाहुतिं यजमान एव जुहोति॥
सर्वत्र होमं प्रति मंत्रे नोंकारः। नोकुर्याद्धोम मंत्राणां पृथगादिषु कुत्रचित्॥ अन्येषां चाविकृष्टानां कालेनाच
[illegible]ाद्दिनाइतिवचनात्। विकृष्टानां अनंतरितानां कालेन आचमनादेतिहरिहरः। मंत्रार्थः। एषां देवानामे

ते१

…नादाय प्रक्षिपेत्॥ संस्रवभक्षणम्॥ रो ३

…मम गर्भाकृत्या मद्रत्नपापरितुष्टौ संतौ मयि विधियेऽमां सं पुंल्लक्षणं गर्भे संवर्त्तताउत्सादयेतां॥ ।इतित्रिरभि
चेत्स प्राङ्मूस्थपति श्री भाजे कवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये प्रथमकांडे नवमी कंडिका॥ ९ ॥
अथ पदार्थक्रमः॥ तत्र गर्भावस्थाया धानोत्तरकाले तस्मिन्नेवाहनि भोजनात्प्राक् यजमानो होमार्थं नानि नि
त्तेमात॰ पूजनपूर्वकं नांदीश्राद्धं कुर्यात्॥ ततः कृतसंध्यावंदनोऽग्नेरुत्तरतउपविश्य प्राणानायम्य देशकालौ नि
र्दिश्य पत्न्याः मम परमेश्वरप्रीत्यर्थं श्रोपासनहोमं करिष्ये इति संकल्प्य। वैकल्पिकद्रव्यमवधार्य उपयम नान्कुशा
नादाय समेकत्वाद्दक्षिणेन हस्तेन तिस्रः समिधोत्वाधाय मणिकोदकेन पर्युक्ष्य प्रदीप्तेऽग्नौ ज्ञातसं
ख्याकान्नस्य चतुः षष्ठितमनागमितान्वा तंडुलानादाय यां गुल्फोत्तरपार्श्वेन संमिताम्भ्रमलतो ह्यंगुल
प्रदेशे अग्नये स्वाहेति जुहोति इदमग्नये न ममेति त्यागं विधाय प्रक्षिपेत॥ संस्रवरक्षणं॥ पत्नी उप
९ सावित्र्यनेन मंत्रेण गर्भकामा चेत्स्रुवा माहुतिं जुहोति॥ इदं मित्रावरुणाभ्यामश्विभ्यामिंद्राय
रुपीय न ममेति त्यागो यजमानस्य संस्रवप्राशनं॥ पत्नीकर्तृकहोमपक्षे तु षस्य पत्न्येव

रा॰

रा म

॥ चर॥

॥९५॥

प्राशनं करोति ॥ अत्र समास्ते त्वापस्थानमितिजयरामभाष्ये । इति सायंहोमः ॥ ॥ अथ प्रातर्होमे विशेषः ॥
उदयात्पूर्वं सायंद्रव्येणैव सूर्याय स्वाहेति पूर्वाहुतिः । प्रजापतये स्वाहेत्युत्तराहुतिः । यथादैवतं त्यागो गर्गका
मावेदश्चापि पुमांश्च सावित्रि होमे ९ । अत्र विश्वाडित्यनुवाकेनोपस्थानमिति जयरामभाष्ये । इति प्रातर्होमे वि
शेषः । अन्यत्सर्वं सायंहोमवत् ॥ एवमुपयमनकुशादानादि प्रत्य[illegible]होमोपासनस्य परिचरणे
अप्यापत्काले कर्त्तव्यो होमद्वयसमासप्रयोगः । तत्र पूर्ववत्सायंकाले नामाहुतिद्वयं हुत्वा कंचित्काले
निर्माल्य पुनः कुशादानादि कृत्वा श्वः कर्त्तव्य प्रातराहुतिद्वयमपकृष्य जुहुयादिति प्रयोगरत्ने । हरि
हरमिश्रैस्त्वेतं त्रेणैव होमो लिखितः ॥ स चैवं । पर्युक्षणांतं कृत्वाग्नये स्वाहेति हुत्वा तथैव सूर्याय स्वा
हेति हुत्वा अनाहुतिद्वयपर्याप्तहोमद्रव्यमादाय प्रजापतये स्वाहेति सकृज्जुहुयात् ॥ अथ गुर्विण्यादि पक्षहो
मः ॥ तत्र च प्रतिपदि सायंकाले उपयमनादानादि पर्युक्षणांतं कृत्वा अनाहुति प्रमाणेन तंडुलान्पात्रे द्व
यप्रति पात्रे चतुर्दशवारं गृहीत्वा होमकाले प्रथमपात्रस्थान्नग्नये स्वाहेति जुहुयात् ततो द्वितीयपात्र

न्तु त्वा प्रजापतये स्वाहेति जुहोति ॥ एवं द्वितीयायां प्रातः पर्युक्षणांतं कृत्वा पूर्ववत्सायंवद्धयेतं डुल्वा न्द्र त्वा स-
याय स्वाहेति प्रथममंत्रः स्वाहुत्वा प्रजापतये स्वाहेति द्वितीयपात्रस्थान्नं डुल्वा जुहुयात् । पक्षमध्ये वा आपत्तौ
गामिनी चतुर्दशी सायंकालीन होमांतान् शेषहोमान् सायं समस्येत् ॥ पर्वप्रातर्होमांतान् अतः तं शेषहोमा-
न् समस्येत् ॥ स्वयां पर्वसायं होमः । प्रतिपत्प्रातर्होमः अग्न्यप्रयोगेव होतव्यो । तत्र पूर्ववदग्निमग्निरहोत ॥ अंतरा
पाग्नि वा नौ नु तदास्य पूर्ववत्सायं प्रातर्होमान् न्यूयाकालं कुर्यात् । इति प्रयोगरत्नो । अन्नापादि पक्षहोमे प्राय-
श्चित्तमुक्तं देवयाज्ञिकपद्धतौ ॥ अनातुरो प्रवासी च निष्क्रिंतो निरुपद्रवः । पक्षहोमं च यः कुपत्तिं चरेत्य ते
तिव्रतं ॥ ॥ इति संक्रांगदाधर विरचिते होमविधिः ॥ ॥ ग्रामांतरगमनेन हविर्मोक्षे पानविपर्यासे न्य-
स्यो वा व्यापत्तौ स्त्रियाः श्रोदह नेत मेवाग्निमुपसमाधाय यादृशं स्त्रक स्त्रेहरति जुहोति नानामंत्राभ्यां ॥ ॥
रोगः प्रजापालनकर्तुर्देशांतरे प्रस्थितस्य युद्धे वा गतस्य रथ्यां वा पवस्या ने देन हुस्य रथ्यस्य विमोक्षे आ-
कस्मिकवंधविच्छेदे वापानविपर्यासे हविरथ्यादिके वा अधोच्चावापत्तौ ॥ अन्यस्यां वाकस्यां चिद्

र्व

राम

॥घर॥

च

४८

पत्नौ अग्निमुत्सृज्य कोऽप्याते। स्त्रियाश्चोद्वहने स्त्रियाऽवृद्धाः पितृगृहाद्भर्तृगृहं प्रतिप्रयामागमने नोत्सुका राग्न्या
द्ग्न्ये दारादिनिमित्ते। नैमित्तिकमिदमुच्यते। तमेवाग्निमुपसमाधायेति वा तस्मै त्रिमित्तं तं न ह्यसेनाग्निना स्त्रिय
श्चैतदा वैवाहिकमग्निमुपसमाधाय स्वस्यपथि लोग्याज्यं संस्कृत्याज्यसंस्कारं निरूप्याऽज्यानि त्यादिना कृ
त्वा हरतिरिति नानामंत्राण्यां जुहोति॥ एष एव विधिरित्येनेवाज्यसंस्कारस्य प्राप्तत्वादत्राज्यसंस्कृत्येति गृह
णं हरतिरित्याकृत्या [illegible] घारादिश्चापि पूर्वकालत्वज्ञापनार्थं॥ नानुग्रहणं चैवेदग्न्याहुती॥ हरति त्येका॥
उपसज्य त्रिति द्वितीया। ततश्चाघारादि॥ अन्वयमुपकल्पत आपवेशायेनराजानं स्त्रियं वाप्रतिहत्वा द्व
तिपन्नांते नात्वाहार्षमिति द्वैतया॥ ॥ततस्तद्घानं तत्स्याऽन्यद्यानं वा हनं रथाद्विकं उपक ल्पत तत्र त
स्मिन्यानेवाहने राजानं स्त्रियं वर्षं उपवेशनं॥ अत्रोपवेशयेदिति एवं तत्रापि प्रत्येवमापाने उपविशत्येति॥
तत्र राज्ञो वृत्तिकर्तृकं॥ वधावरकर्तृकं। अत्र परादिनापूर्वांत इति न्यायात्त्रावात्तेषां वाक्यमितरनेन च प्रति
द्वात्रे प्रति तिष्ठामी सैतदेतमत्रप्राप्तोपपन्नं तु ग्रहणं वाक्यसमुच्चयविधानार्थं। अत्वाहार्षमिति कात्त्वाल्लं
त्वाद्ध्याऽपाठः तेषां वाक्यमिश्चत्रतच्छदेन पदं च पराम्नातं॥ ततश्च प्रपत्र केकप्रतीकग्रहणं तत्र सं

व

...र्थीः पाठः। स्वच्छत्रोऽग्रमन्दत्वादौ॥ ॥धुर्यौ दक्षिणा प्रायश्चित्तिः॥ ॥अत्र धुर्यौ वनड्वाहौ दक्षिणा नव
...मीति शेषः। दक्षिणां तरस्यां निर्दिष्टत्वात्। प्रायश्चित्तिरिति चास्य कर्मणः संज्ञा। ततो ब्राह्मणभोजनं।
॥ ॥ततः कर्मान्ते ब्राह्मणस्यैकस्य भोजनं कार्यं॥ ॥इति श्रीसंप्रा· गदाधरकृते गृह्यभाष्ये द्वादशी कण्डि
का॥ ॐ॥ ॥अथ पार्थपदार्थक्रमः। तत्राग्निमित्ते जाते पंचसंस्कारपूर्वकमग्नेः स्थापनं। राज्ञा सेनाग्नेः
स्थापनं कुर्यात्॥ वरश्च वैवाहिकाग्नेः स्थापनं कुर्यात्। ततो ब्रह्मोपवेशनादि पर्युक्षणांतं कृत्वा रह
रतिरिति प्रथमामाहुतिं जुहोति। उपसृजन्धरुणमित्यादि दीर्घायुत्वाहेत्यंतेनैव मंत्रेण द्वितीयामाहुतिं
जुहोति। इदमग्नये न ममेति त्यागः। ततः आघारादि पूर्णाहुत्यविमोकांतं कृत्वा धुर्यौ वनड्वाहौ दत्त्वा
अन्वष्टां नमानीय तत्र राजानं प्रतिक्षत्रे प्रतितिष्ठामीति आत्वाहार्षमिति मंत्राभ्यां उपावेशयेत्पद्ये
षणपूर्वमुपवेशयेत॥ वध्वामेताभ्यां मंत्राभ्यामुपवेशयेत॥ ततो ब्राह्मणभोजनं॥ इति पार्थक्रमः॥ ॥
चतुर्थ्यामपररात्रेऽभ्यंतरतोऽग्निमुपसमाधाय दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रं प्रतिष्ठाप्य स्थाली

राम

गंधर्वप्रायश्चित्ते त्वं देवानां प्राय[illegible]सि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पत्नीघ्नी तनूस्तामस्य नाश स्वाहेति

स्थालीपाकं श्रपयित्वाऽज्यभागाविष्ट्वाऽज्याहुतीर्जुहोत्यग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथ
काम उपधावामि यास्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा। वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्म
णस्त्वा नाथकाम उपधावामि यास्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा॥ सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्ति
रसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा। चंद्र प्रायश्चित्ते त्वं देवानां
प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै [illegible]घ्नी तनूस्तामस्यै नाशय स्वाहेति॥ ४ ॥
विवाहाद्यो चतुर्थीतिथिस्तस्यामपररात्रेऽग्रतिमग्रहरेऽगृहं तरतः गृहस्य मध्येऽग्निमुपसमाधाय वैवा
हिकमग्निं स्थापयित्वा दक्षिणतो ब्रह्माणमुपवेश्य अग्ने दक्षिणतो ब्रह्मण उपवेशनार्थं कुशानास्तीर्य
तत्र ब्रह्माणमुपवेश्य उत्तरत उदपात्रं प्रतिष्ठाप्य अग्नेरुत्तरतः प्रणीतास्थले सम्यक् उदकपूर्णपात्रं स्था
पयित्वा स्थालीपाकं श्रपयित्वा स्थालीपाकेचरुं श्रपयित्वाऽज्यभागाविष्ट्वाऽज्याहुतीर्जुहोति अग्ना
न अग्ने प्रायश्चित्ते त्वं त्येतैः पंचभिर्मंत्रैः पंचाहुतीर्जुहोति॥ अथापररात्रे गृहेणं पूर्वाह्ण[illegible] दास

चतुर्थीकर्मणो विवाहांगत्वाद्बहिः शालायां मा भूदित्यभ्यंतरग्रहणं। अग्निमुपसमाधायेति ग्रहणमभ्यंत
रगुणविधानार्थं। ब्रह्माणमुपवेश्येति उदपात्रस्थापनावसरविधानार्थोक्तेः। उत्तरतोर्ध्वेतो पात्रान्ते मा भूदिति
अपर्यवेक्ष्यापाते॥ आज्याहुतीर्जुहोतीति ग्रहणं आहुतिकालविधानार्थं। मंत्रार्थः। हे अग्ने। हे प्रायश्चित्ते। त्वं सर्व
दोषापकरणाय त्वं देवानामिंद्रादीनां मध्ये प्रायश्चित्तिः दोषापाकर्ता असि। अहं च ब्राह्मणः ब्रह्मणः वैदिकोऽव
न्त्वा उपधावामि आराधयामि॥ किं कृतो हं। नाथकामः उपयाचाय॥ आशीःकामः। ऐश्वर्यकामो वा। प्रार्थया
नो वा। उपधावन्प्रयोजनमाह॥ यास्यैषणार्थं चतुर्थी अस्याः वध्वाः पतिघ्नी तनूः तामस्या अपवधस्ता
अस्या इमामुपकल्पितानासाय॥ अपनयानुस्वाहा स्वाहाकृतमस्तु समुदायवाचकोपितनत्वादो वपवव
चकोन्वयः। तेनास्याः पतिनाशकं अंगलक्षणं हस्तरेखादि सामुद्रिकलक्षणोक्तं तदपाकुरु इत्यन्न
मंगविधातीति वाक्यार्थः॥ एवमुपर्यपि व्याख्येयं। तत्र विशेषणं देवता वन्निचेतेत यथा। हे वायो पवन
प्रजाघ्नी अपत्यनाशिनी एवमुत्तरत्रापि योज्यं॥ स्थालीपाकस्य जुहोति॥ प्रजापतये स्वाहेति॥ आज्या

राम

॥८२॥
॥९८॥

हुत्वानंतरं स्थालीपाकस्य चरोः। प्रजापतये स्वाहेति मंत्रेण पाण्पुपस्थितेनैकामाहुतिं जुहोति। स्थालीपाकस्ये
त्यवयवलक्षणेण षष्ठी॥ ॥हुत्वाज्यशेषतासामाहुतीनामुदपात्रे संस्रवान्समवनीय तत एनां मूर्द्धन्यभिषिं
चति। या ते पतिघ्नी प्रजाघ्नी पशुघ्नी गृहघ्नी यशोघ्नी निंदिता तनूर्जारघ्नीं तत एनां करोमि सा जीर्य त्वं मया पत्यास
हासाविति॥ ॥एतासां षण्णामाहुतीनां एकैकामाहुतीं हुत्वा उत्तरतः प्रतिष्ठापिते उदपात्रे संस्रवान्समवनी
य स्रुवलग्नाज्यशेषं यवान्प्रक्षिप्य ततस्तस्मात्संस्रवमिश्रमुदकं गृहीत्वा एनां वधूं मूर्द्धनि मस्तके अभिषिंचति
या ते पतिघ्नीति मंत्रेण॥ षण्णामाहुतीनां मंत्रसंस्रवमेलनलोपः। इतरासां तु नैव तस्य वा॥ ॐ त्वा हुत्वेति ग्रहणं
सर्वाहुत्यंते संस्रवनिनयनं मा भूदित्येतदर्थं॥ मूर्द्धन्यभिषेकस्यागंतुकत्वाद्दक्षिणेनांते भवति॥ असौ स्था
ने अस्यामंत्रणविभक्तिपुक्त्वे वध्वा नामग्रहणं कार्यं मंत्रार्थः॥ हे असौ कन्ये या ते तव पत्यादिघातिनी पंचधा
स्थिता तनूः स्मृता एवं निंदिता। ततो ऽनेनाभिषेचनेन एनां तनूं जारघ्नीं उपपत्यादिदोषघातिनीं करोमि। सा त्वं म
या पत्या जीर्य सह जीर्या निर्दुष्ट त्वं वृद्धत्वं गछ॥ ॥ अपरेणाग्निं स्थालीपाकं प्राशयति प्राणैस्ते प्राणान्संद

...स्थिनिरस्थीनिमांसैर्मांसानित्वचात्वमिति॥ ॥अथ... निषेकानंतरं एनां वधूं

स्थालीपाकं चरुं वरः प्राशयेत॥ प्राणैस्ते प्राणान्निति मंत्रेणा वधूसंस्कारोयं नतु द्रव्यप्रतिपत्तिः॥ अतो द्रव्य

नाशानं कार्यं तद्वत्तोकादिकायां वधूसंस्कार एवायं प्रतिपत्तिरियं नतु॥ अतो द्रव्यविनाशादौ द्रव्ये एणन्यो

नतन्न वेत॥ शेषद्रव्यविनाशादौ लुप्यंते प्रतिपत्तयः॥ अत्र स्त्रियासह वनोपि समाचाराद्भोजनं करोति॥ स्त्रि

यासहभोजने नदोषइत्याह॥ हेमाद्रौ प्रायश्चित्तकांडेगालवः॥ एकयानसमारोहएकपात्रे च भोज

नं॥ विवाहे पथि यात्रायां कृत्वा विप्रो न दोषभाक्॥ अ... न्यथादोषमाप्नोति पश्चाच्चांद्रायणंचरेत॥ मिता

क्षरायामप्येवं॥ मंत्रार्थः॥ हे कन्ये मम प्राणादिभिः तेतव प्राणादीन्संदधामि संयोजयामि॥ ॥तस्माद्देवैवि

श्रोत्रियस्य दारेणोपहासमिच्छेत॥ अभिगमनं नेच्छेत॥ सचैवं वित् एवं कुर्वन्परो भवति परोभवं गच्छ

ति॥ एवं विच्छ्रोत्रियस्य परः शत्रुर्भवति॥ अतत्र प्यार्थ॥ निंदार्थवादोयं॥ परदाराभिगमनमनोन का

र्यमिति मासं चतुर्थीकर्म॥ स्वभार्याभिगमनमाह॥ ॥तामुदुह्यपपर्तु प्रवेशानं॥ ॥तां वधूं पूर्वोक्त

स्य

राम

॥पुरा॥
॥९५॥

विधिनाऽऽदृष्टविवाहः पित्वा यद्यपर्त्तुस्नातावतो प्रवेशानमभिगमनं कुर्यादित्यर्थः ॥ याज्ञवल्क्यः ॥ षोडशर्त्तुनि
शास्त्रीणां तासु युग्मासु संविशेत् ॥ ब्रह्मचर्येव पर्वण्याद्याश्चतस्रस्तु वर्जयेत् ॥ स्त्रीणां षोडशनिशा ऋ
तुः गर्भाधानयोग्यकालस्तत्रोक्तविधिनागच्छन्ब्रह्मचर्येव। चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा ॥
चत्वार्येतानि पर्वाणि रविसंक्रांतिरेव च ॥ मनुः ॥ अमावास्यामष्टमीं च पौर्णमासीं चतुर्दशीं ॥ ब्रह्मचारी भ
वेन्नित्यमप्यृतौ स्नातको द्विजः ॥ तथा ॥ तासामाद्याश्चतस्रस्तु निंदितैकादशी तथा ॥ त्रयोदशी च शेषाः स्युः प्र
शस्ता दश रात्रयः ॥ अतोरेकादशी त्रयोदश्यो न पञ्चस्या। हारीतस्तु ॥ शुद्धा भर्त्तुश्चतुर्थेऽह्नि स्नानेन स्त्री
रजस्वला। दैवे कर्मणि पित्र्ये च पंचमेऽहनि शुध्यतीति ॥ ततश्चतुर्थ्यां स्त्रीगमनस्य विहितप्रतिषेधत्वा
द्विकल्पः ॥ स च व्यवस्थितः ॥ रजोनिवृत्तौ चतुर्थ्यां विधिः ॥ तदनिवृत्तौ प्रतिषेधः ॥ मनुः ॥ रजस्युपरते सा
ध्वी स्नानेन स्त्री रजस्वलेति साध्वी गर्भाधानादिविहितकर्मयोग्येत्यर्थः ॥ ज्योतिःशास्त्रे ॥ पित्र्यं पौष्णं नैर्ऋ
...चापि पिधिष्ण्यं त्यजेदिति पित्र्यं मघा ॥ पौष्णं रेवती ॥ नैर्ऋतं मूलं ॥ अत्र समासु पुत्रो विषमासु कन्येति

स्मृ ५

...मासे शेरवः। पुग्मास्तु पुत्रजाता एते स्त्रियो ग्मास्तु रात्रिषु॥ तत्रापु नरो नराः प्रशस्ताः॥ तत्र हारीतः॥ तत्रा
पि युग्नरो नराः प्रशस्ता इति॥ व्यासः॥ रात्रौ चतुर्थ्यां पुत्रः स्यादल्पायुर्धनवर्जितः॥ पंचम्यां पुत्रिणी नारी
षष्ठ्यां पुत्रस्तु मध्यमः॥ सप्तम्यामप्रजा योषिदष्टम्यामीश्वरः पुमान्॥ नवम्यां सुभगा नारी दशम्यां प्रवरः
सुतः। एकादश्यामधर्मा स्त्री द्वादश्यां पुरुषोत्तमः॥ त्रयोदश्यां सुता पापा वर्णसंकरकारिणी॥ धर्मज्ञा
श्च कृतज्ञश्च आत्मवेदी दृढव्रतः। प्रजापतेश्चतुर्दश्यां पंचदश्यां पतिव्रता। आश्रयः सर्वभूतानां षोडश्यां
जायते पुमान्॥ तत्रैकस्यां रात्रौ सकृदेव कार्यं। सुस्थ इन्दौ सकृत्पुत्रं लक्षण्यं जनयेत्पुमानिति याज्ञव
ल्क्योक्तेः। इदं च गर्भगमनमन्यकाले प्रतिबंधादिनासंभवे श्राद्धैकादश्यावपि कार्यं ब्रह्मचार्येव पर्वण्या
द्याश्चतस्रस्तु वर्जयेदिति याज्ञवल्क्योक्तेः। व्याख्यातं चैतन्मिताक्षरायां। यत्र श्राद्धादौ ब्रह्मचर्यं विहितं
तत्रापि तो गच्छतो न ब्रह्मचर्यस्खलनदोष इति॥ स्त्रीणां बहुत्वे क्रमतो योगपद्ये च गमने क्रममाह॥ देव
लः॥ योगपद्ये तु तीर्थानां विप्रादिक्रमशो व्रजेत्॥ रक्षणार्थमपुत्राणां ग्रहणं क्रमशोऽपि वेतितीर्थे

राम

गपरा॥
॥७०॥

मनुः॥ विप्रादिक्रमेवर्णक्रमः॥ गृहणक्रमो विवाहक्रमः॥ अगमने दोषमाह पराशरः॥ ऋतुस्नातां तु यो भा
र्यां सन्निधौ नोपगच्छति। घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः इति। अस्यापवादमाह मदनरत्ने। व्या
धितो बंधनस्थो वा प्रवासेष्वथ पर्वसु। ऋतुकालेपि नारीणां भ्रूणहत्या प्रमुच्यते॥ वृद्धां वंध्यामसद्वृत्तां मृ
तापत्यामपुष्पिणीं॥ कन्यां च बहुपुत्रां च वर्जयन्मुच्यते भयात्॥ कौतीस्नाने। उन्मावपुष्पवीस्यातां दंप
ती न्यायनंगतौ॥ न्याय नाडुष्यिता नारीमशुचिस्यात् पषशुचिः पुमानिति वृद्धशातातपवचनात्॥ अत्र प्रसंगा
द्रजस्वलोपयोगि किंचिन्निरूप्यते। तत्र स्मृत्यर्थसारे॥ दिवा रजःस्रावे तद्दिनमशुचित्वं स्यात्। रात्रौ रजः
स्रावे सति अर्द्धरात्रात् पूर्वं चेत् पूर्वदिनमित्येकः पक्षः॥ रात्रिं त्रिधा विभज्य पूर्वभागद्वये चेत् पूर्वदिनमित्य
न्यः पक्षः॥ उदयात् पूर्वं चेत् पूर्वदिनमित्यपरः पक्षः॥ एषां पक्षाणां देशाचारतो व्यवस्था। अज्ञाते रजःस्रावे तु
दिनेषु जातेषु रजःस्रा वादिकमशुचित्वं स्यात्॥ चतुर्थेह्नि स्नाता शुद्धा भवति॥ ऋतुः स्यात् षष्पादेवापि
त्रेव कार्ये रजोनिवृत्तौ शुचिः॥ रजस्वला चतुर्थेह्नि मृत्तिकादिभिः शौचं कृत्वा दंतधावनादिस्नापादपादन्मू

१६
गौ॰स॰

[illegible]तिकान्निर्विघवाद्विगुणमृत्तिकाभिः शौचं कृत्वा दंतधावनपूर्वकं संगवे सचैलं स्नायात्॥ रजस्वलायाः स्ना-
तायाः पुनरपि रजोदृष्टौ अष्टादशादिनादर्वागशुचित्वं नास्ति॥ अष्टादशादिने रजोदृष्टावेकरात्रमशुचित्व-
नवदशादिने द्विरात्रं विंशतितिदिने त्रिरात्रमेव॥ प्रायो विंशतिदिनादूर्ध्वं रजस्त्राविणी नामेवं भवति॥ वि-
शतिदिनादर्वाक् प्रायः शोणितजो दृशो भवती नो॥ सप्तदशादिने पि त्रिरात्रमशुचित्वं॥ किं वा त्रयोदशादिनादू-
र्ध्वं प्रायो रजस्त्राविणी नामेकादशादिनादर्वाक् अशुचित्वं नास्ति॥ एकादशादिने रजोदृष्टौ एकदि-
नमशुचित्वं॥ द्वादशादिने द्विरात्रं॥ त्रयोदशादिने त्रिरात्रमेव॥ प्रयोगपारिजाते प्येवं॥ रोगजे तु तत्रैवो-
क्तो रोगेण पद्मजः॥ स्त्रीणांमन्वहं हि प्रवर्त्तते॥ नाशुचिस्तु नवेत्तेन यस्माद्वैकारिकं मतमिति॥ तत्रा-
पि स्वकाशुचिरेवातदुक्तो॥ रोगजेवर्त्तमानेपि काले निर्पाति फाल्गुने॥ तस्माद्दृष्टमतास्या दन्य प्रासंक-
रो भवेत॥॥ रजस्वलास्पर्शे अकामतः स्नानेकाम ननुपवास॥ पंचगव्याशनंच॥ असवर्णास्तु
ब्राह्मण्याः क्षत्रियादिस्पर्शे क्रमेण कृच्छ्रार्द्धपादोनकृच्छ्रकृच्छ्राः॥ क्षत्रियादीनां तु कृच्छ्रपाद एव॥ क्ष-
त्रियादीनां हीनवर्णस्पर्शे त्रिरात्रमुपवासः॥ एतच्च कामतः॥ अकामतस्तु प्राकृच्छुद्धेरनशनं॥ अ

राम

गौधर॥
११०१॥

कामतश्चांडालादिस्पर्शे त्र्यहमज्ञानमेव प्राकृच्छ्रद्वं कामतस्त्वाद्यमेकस्मिन्नहः ॥ द्वितीये त्र्यहः ॥
तृतीयएकाहः ॥ स्वस्य वर्णेतु त्र्यहएकाहो वा ॥ चेज्जानायचांडालादिस्पर्शे त्र्यहषड्रात्रं उच्छिष्टयोस्पर्शेतिकृच्छ्र इत्या
दिमिताक्षरायां ॥ पं । स्मृत्यर्थसारेतु सर्वत्र बालापत्यास्पर्शे स्नानेकृतं तत्शुद्धिः ॥ पश्चाद् नस्नानप्रत्याम्ना
यइतिस्नानविधिर्व्यवहपराशरः ॥ स्नानेनैमित्तिके प्राप्ते नारी यदि रजस्वला पात्रांतरिततोयेन स्नानं
कृत्वा व्रतं चरेत् ॥ सिक्तगात्रा भवेदद्भिः सांगोपांगा कथंचन । न वस्त्रपीडनं कार्यं नान्यद्वासश्च धा
रयेत् ॥ व्रतान्यहमदनपारिजाते वसिष्ठः । सा नांजयीत नाभ्यंज्यान्नाप्सु स्नायादधः शयीत न दिवा
स्वपेन्न रज्जुं सृजेत् ॥ न मांसमश्नीयान्न ग्रहान्निरीक्षेत न हसेन्न किंचिदाचरेदखर्वेण पात्रेण पिबेदंजलि
ना वा पात्रेण लोहितायसेन वेति ॥ खर्वी वा महस्तः ॥ ॥ यथाकामी वा काममाविजनितोः संभवा
मेति वचनात् ॥ ॥ स्त्रिणः काममनतिक्रम्य यथाकामं तदस्यास्तीति यथाकामी वा भवेत् ॥ न नियम
ऋतावेवेति ॥ कुत एतत् ॥ काममाविजनितोः संभवामेति वचनात् कामं स्वेच्छया आविजनितोः आ

२

॥पादे॥

त्संवात्संनवामनन्तु सहसं गतान्नवामेत्यर्थः॥ तथा तैत्तिरीयश्रुतौ संदद्धः स्त्रीषंससादमुपासीदत्त्र
स्यै ब्रह्महत्यायै तृतीयं प्रतिगृह्णीतेति ता अब्रुवन्वरं वृणीमहे ऋत्वियात्प्रजां विंदामहै काममाविज
नितोः संभवामेति तस्मादृत्वियात् स्त्रियाः प्रजां विंदते इति॥ अस्यार्थः॥ स इंद्रः स्त्रीणां षंसभादं सम
हं नु पासीदन्नु उपससादं॥ षं त्वं छांदसं॥ अस्यै अस्याः ब्रह्महत्यायाः तृतीयांशं प्रतिगृह्णीतेति ता अब्रुवन्
वरं वृणामहे ऋतुसंबंधिगमने ऋत्वियं तस्मात्॥ आविजनमाविजनितुस्तस्मादाविजनितोः॥ आ
गर्भप्रसवकालात्॥ संभवाम पुरुषेण संयुक्ता भवाम एवं च सति विकल्पो यं॥ तथा च स्मृतिः॥
ऋताबुपेयात्सर्वत्र वा प्रतिषिद्धमिति॥ ॥ अथास्यै दक्षिणांसमधि हृदयमालभते यत्ते सुसी
मे हृदयं दिवि चंद्रमसि श्रितं॥ वेदाहं तन्मां तद्विद्यात् पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम
शरदः शतमिति॥ अथ मेषु नोत्तरं अस्याः जायायाः दक्षिणं स्कंधं अधि उपरि हस्तं नी
त्वा तेन हस्तेन हृदयमालभते स्पृशति॥ यत्ते सुसीमे इति मंत्रेण॥ अत्र कर्कव्याख्या॥ हृदया

राम

त्वं च अथाग्निगमनोत्तरकालीनः ॥ प्राक्कालीनं तु तत्परो अप्रयतत्वादिति नैतदिति जयरामः ॥ यतो गर्भसं
स्त्रावनार्थं तदुपपद्यते ॥ अप्रयतत्वं च शौचादिनापि स्यादेव ॥ यथाह याज्ञवल्क्यः ॥ ऋतौ तु गर्भशंकित्वात्स्ना
नं मैथुनिनः स्मृतं ॥ अनृतौ तु सदा गच्छेच्छौचं मूत्रपुरीषवत् इति ॥ अग्निगमनोत्तरमनाचांत एव दक्षि
णेन समधिहृदयमालभेतेति तत्रैव पक्षः ॥ मंत्रार्थः ॥ शोभना सीमा मर्द्दनिक्षेत्रपद्धतिर्यस्याः सा ॥ तस्याः
संबोधनं हे सुसीमे ॥ शोभनसीमं ॥ तनिापजेतव हृदयमतः दिविस्वर्गे वर्त्तमाने चंद्रमसि स्थितं ॥ तद
धीनतया स्थितं तदहं वेद जानामीमां ॥ त्वत मां विद्यात् ॥ जानातु एवं प स्यरानुगुणितहृदयाः अपत्यादि
सहितावयं शरद मितायुक्कार्याः ॥ एवमतऊर्द्ध्वं अपमन्त्रौपप्याहृदयालंभः ॥ कृत एवमनेन प्रकारेण
अग्रेतोनंतरं ऊर्द्ध्वं ऋतावृतौ हृदयालंभः कार्यः ॥ हरिहरव्याख्या चैवं ॥ एवमनेन प्रकारेण ऋतावृतौ प्रवे
शनं यथाकाममेवेति ॥ ॥ इति संस्का० गदाधरकृते एकादशी ॥११॥ ॥ अथ पपदार्थक्रमः ॥ त
[illegible]तुर्थ्यामपररात्रे स्नानपूर्वं गृह्याग्नेरंतरतः कर्म कार्यं ॥ देशकालौ स्मृत्वा विवाहांगं चतुर्थीक

स्नां

...करिष्ये इति संकल्प्य। ततो वैवाहिकमग्निं स्थापयेत्। ब्रह्मोपवेशनं। अग्नेरुत्तरत उदपात्रनिधानं।
ततः प्रणीताप्रणयनादि आज्यभागांतमाधानवत्॥ आज्यभागांते आज्येन पंचाहुतयो होतव्याः॥ अग्ने
प्रायश्चित्ते इति प्रथमा। इदमग्नये०। वायो प्रायश्चित्ते इति द्वितीया। इदं वायवे०। सूर्य प्रायश्चित्ते इति तृती
या॥ इदं सूर्याय०। चंद्र प्रायश्चित्ते इति चतुर्थ्। इदं चंद्राय०। गंधर्व प्रायश्चित्ते इति पंचमी॥ इदं गंधर्वा
ततश्चरुस्रुवेन। हेय प्रजापतये स्वाहेति होमः। इदं प्रजापतये। अग्न इत्यादिपञ्चमाहुतीनां सं
स्रवानामुदपात्रे प्रक्षेपो हुत्वा हुत्वैव। अन्यासामन्यत्र। ततः स्विष्टकृदादि दक्षिणादानांतं॥ तत उद
पात्रजलेन वधूमूर्ध्नि यातेपतिघ्नीत्यभिषेकः॥ असौ स्थाने नामग्रहणं। हे प्रिये इति। ततो वरः प्राणै
स्त इति व्रतशेषं वधूं प्राशयति सकृत्। अत्र समाचाराद्वरोपि केनापि हस्तेन भोजनं करोति। अपगर्भ
मते विशेषः॥ ब्रह्मोपवेशनाद्याज्यभागांतं पूर्ववत्। प्रत्यक्षं ब्रह्मणा उपवेशनं। गृहणे प्रजापतये
दं न मम। आज्यभागांते पंचाहुतयः॥ ततः स्थालीपाकेन प्रजापतये स्वाहेति। मूर्ध्ना अभिषेकः॥

राम

॥५२॥

॥१०३॥

ततः स्थालीपाकं श्रपयति। प्राणैस्त्व इति चतुर्भिः प्रतिमंत्रं। महाव्याहृत्यादि स्विष्टकृदंतं॥ आज्येन स्विष्टकृ
दिति गर्गमतं मितिपद्धतौ। प्राशनादि पूर्णपात्रदानांतं॥ ॥ इति गर्गमते पदार्थक्रमः समाप्तः॥ ॥ अथ
गर्भाधाने पदार्थक्रमः। अथ प्रयोगे मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं। संकल्पः। देशकालौ स्मृत्वास्य
स्याः मम भार्यायाः प्रतिगर्भसंस्कारातिश [illegible] पद्वाराऽस्यां जनिष्यमाण सर्वगर्भाणां बीजगर्भसमुद्भ
वैनो निबर्हण द्वारा च श्रीपरमेश्वरप्रीत्यर्थं गर्भाधानाख्यं कर्माहं करिष्ये इति॥ ततो राजावर्जि गम
नो। ब्रह्मस्थापनं उपरि षड्वक्तार्पे। स्त्रेनांस्ततो दक्षिणं समधि हृदयमालभते स्नसीम इति। नूक्ताभ्य
दत्र विशेषो गर्गमते। इति गर्भाधानेक्रमः॥ ॥ अथ प्रथमरजोदर्शने विशेषः॥ तत्र प्रथमरजोद
र्शने मासादिदोषे सति गर्भाधानस्य शांति पूर्वकं कर्तव्यत्वाच्छांतिं वक्तुंऽभीसाधुच्यते। प्रथमे रजसि चैत्र
ज्येष्ठाषाढभाद्रपदकार्त्तिकपौषा अप्रशस्ताः॥ अश्विनी मध्यमः। शेषाः प्रशस्ताः। केचिद्वैशाखफाल्गु
नयोर्वीर्धयोरधमत्वमुक्तं। तिथिषु॥ प्रतिपच्चतुर्थी षष्ठ्यष्टमी द्वादशी चतुर्दशी पौर्णमास्यमावास्या

८२

॥ गौदा ॥

॰शुभाः ॥ शेषाः शुभाः ॥ केचित्सप्तमेकादशगा अपि शुभं मीनादित्रयोपि शुभे ॥ इत्यर्कः ॥ वारेषु रविशनिमंग
लवाराः अशुभाः ॥ अन्ये तु शुभाः ॥ केचित्सोमोप्यशुभ इत्याहुः ॥ नक्षत्रेषु भरण्यार्द्रा पुष्याश्लेषा पूर्वात्रयम
ल पूर्वाषाढा पूर्वाभाद्रपदा रेवत्योप्यशुभा इत्यन्ये ॥ एवं च तासां मध्यमत्वं एवमन्यत्रापि योगेषु व्याघातस्य
घा नव नाड्यो गंडांतिगंडयोः षट् षट् शूलस्य पंच दश परिघपूर्वार्धं वैधृतिव्यतीपातौ सर्वावशुभाः ॥ व
ज्रं मध्यमं अन्ये शुभाः ॥ करणानि विष्टिं विना सर्वाणि शुभानि ॥ अह्नि त्रेधा विभक्ते आद्यो भागः शु
भः ॥ द्वितीयो मध्यमः तृतीयोऽशुभः ॥ एवं रात्रौ ॥ सूर्योदयास्तमयावप्यशुभौ ॥ रविसंक्रमादघोना
डीच तुषपम् र्धूचातत्रशुभं ॥ संक्रांत्यादिदग्धादि ते षशुभं ॥ रविचंद्रोपरागयोरप्यशुभं ॥ सीधापद्म
वशावारौ वेश्मनेर्दृशात्मनस्त्वत्र तुष्यापम ह्यदैस्त्रेचं द्रेजीर्णरक्तनीलमलिनकषवस्त्रेषु परिहि
तेष्वशुभं ॥ संमार्जनीकाष्ठमन्नरणाग्नि स्पर्शतुषशुष्कास्थितलोहपाषाणअस्त्रादिधारिणा एते दुर्नि
दर्शाश्चाशुभं ॥ देहलीद्वारस्थ्यादि मातृपितृ ॥ हे षशुभं ॥ ॐ घस्थिताचानि द्विता याश्वाशुभं ॥

राम

॥ घर ॥
२०४ ॥

शायां दौ प्लुते ॥ पित्रादिसपिंडस्य स्वस्त्ययनं निर्दिष्टं मप्लुतं ॥ शय्यादौ प्लुतमित्यादि द्वितीयां कुर्म मासादौ प्रथमर
जोदर्शने तां बलचन्द्राणादि मंगलाचारं न कुर्यात् ॥ द्वितीये तु प्लुते तत्र कुर्यादिति ॥ प्रथमे तु रजोदर्श
ने द्वितीयं प्रतीक्ष्य तस्मिन्नप्यप्लुते वक्ष्यमाणेन विस्तरेण शांतिं कुर्यादिति केचित् ॥ प्रथम एव यथा त्रा
क्षि शांतिं चरेदित्यपरे ॥ अत्रैकस्मिन्नप्यप्लुते वक्ष्यमाणा शांतिः कार्या ॥ द्वित्र्यादिप्लुतसंनिपाते तु न तस्मि
न्नवकप्लुतं निरासार्थं वक्ष्यमाणेत्युति संख्यादि विवक्षा कार्या यथा शक्तीत्यादि ज्ञेयं ॥ इति प्लुताप्लुत
विचारः ॥ ॥ अथ शांतिरुच्यते ॥ प्रयोगपारिजाते शौनकः ॥ पंचमे ह्नि चतुर्थे वा ग्रहातिथ्यपुरः
सरीं शोणप्रमाणधान्येन व्रीहिराशित्रयं न्यवेत ॥ कुंभत्रयं न्यसेत्तेषु तन्तु वस्त्रादिवेष्टितं ॥ सूत्रेणा
पूर्ण वचैन प्रसुवर्णापद्दलप्पा ॥ स्त्राचार्यः पूर्वकलशे त्र्यादु पश्चाच्च ततः क्रमात् ॥ मध्यकुंभे त्रिपेत्पाना
मोबधानि चहे मचा ॥ उडुंबरः कुशाः दूर्वाः राजीवे चेपविल्वकाः ॥ विष्णुक्रांतापतुलसी बर्हिषः शो
पुष्पिकाः ॥ शातावर्यश्वगंधा च निर्गुंडी सर्षपद्वयं ॥ अपामार्गः पलाशाश्वत्थपनसाः जीवकस्तथा ॥

॥ गो.दी. ॥

च

॥ प्रियंगवश्च गोधूमा व्रीहयो यवास्त एव च ॥ क्षीरं दधि च सर्पिश्च पयःपत्रं तथोत्पलं । कुरंटकत्रयं गुंजा वच
त्रक मुस्तकाः ॥ द्वात्रिंशदौषधानीय पासं चैव माहरेत् ॥ मृत्तिकाश्चौषधादीनि तन्मंत्रेणाक्षिपेत् क्रमा
त् ॥ कुंभोपरि न्यसेत्पात्रं कांस्यमस्वेणताम्रजं । भुवनेश्वरीं न्यसेत्तत्र इन्द्राणीं च पुरंदरं ॥ जपेत्सूक्तं च श्रीम
द्धमे श्रीसूक्तं च जपेत्ततः । स्थालीं वा लेद्दक्षिणे कुंभमस्तिगे कोजपेदथा । चत्वारि शृंगसूक्तानि चतुर्मैत्री
त्त्रारायणि च ॥ संस्पृशेच्चोत्तरं कुंभं श्रीसूक्तं पुरुषसूक्तं त्रिरथापि । वाग्न्यं इन्द्राग्निसूक्तं च तथैव संस्पृश्य जपेत् ॥
कुंभस्य पश्चिमे देशे शांतिहोमं समाचरेत् ॥ दूर्वास्तिस्तिलगोधूमैः पायसेन घृतेन च ॥ तिसृभिश्चैव
दूर्वाभिरेकावाप्याहुतिं चैव तु ॥ अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा । गायत्र्यैव तु होतव्यं हविरच
चतुष्टयं ॥ ततः स्विष्टकृतं कृत्वा समुद्राद्दूर्मिसूक्तेन तः ॥ संततामाज्यधारां तां पूर्णाहुतिमथाचरे
त् । अथाभिषेकं कुर्वीत प्रतिकुंभस्थितोदकैः ॥ आपो हि ष्ठेति नवभिः सूक्तेन च ततः परं ॥ इंद्रोग्नं
तवेनैव पावमानैः क्रमेण तु ॥ उत्तरेषु एव चवनस्य स्तिर्विश्नारूपा ॥ त्र्यंबकेति मंत्रेण जातवेद

वि
राम

॥ ५२म
॥१०५॥

सएकया॥ समुद्रज्येष्ठा इत्यादि ऋचायंतांचत्रिभिः क्रमात॥ कृमाग्नाप श्चेवैवैवदेवस्यत्वेति मंत्रतः॥ मंत्रेण
पतमीशानं त्वमग्ने रुद्र इत्यपि॥ तमुष्टुहीतिमंत्रेण न्नुवनस्पतिरं पपि॥ यातेरुद्रेतिमंत्रेण त्रिवसंक
ल्पमंत्रतः इंद्रत्वा वषभं पंचमेत्रैश्चैवाभिषेचयेत॥ धेनुं पयस्विनीं दद्या दाचार्याय चक्षणे॥ सदक्षिण
मनडुहं प्रदद्याद्रुद्रजापिने॥ महाशांतिं प्रजाप्याप्य ब्राह्मणान् भोजयेत्ततः॥ नारदः॥ तत्र शांतिं प्रकु
र्वत घृतदूर्वातिलाक्षतैः॥ प्रत्येकाष्टशतं चैव गायत्र्या जुहुयात्ततः॥ स्वर्णं गोभूतिलाः दद्यात्सर्वदोषा
पनुत्तये॥ ॥ अथप्रयोगः॥ ॥ एकं विनायकं पूज्य ग्रहांश्चैव विधानतः॥ कर्मणः फलमाप्नोति
ति याज्ञवल्क्येन कर्मफलसिद्धावविघ्नार्थत्वेन ग्रहयज्ञस्यावश्यकोक्तेरिह च शौनकेन ग्राजेवानां तु
नारीणां शांतिं वक्ष्यामि शौनक इत्युपक्रम्य ग्रहातिथ्यपुरःसरामिति प्रकरणोक्तेरावश्यकत्वादेकदे
शाकाल्पकर्तकाणं चविशेषवचनाभावतंत्रेणकर्तव्यत्वा क्रूहमखसंत्रेण शांतिकप्रयोग उच्यते॥
रजोदर्शनानंतरं पंचमादिदिने चंद्रताराद्यनुकूल्ये शुचिदेशे सुस्नातया पत्न्या युतः पतिः प्राङ्मुख उ

पवित्रपाणिर्नाचम्य देशकालौ संकीर्त्य मम पत्न्याः प्रथमरजोदर्शने दुष्टमासादिसूचित सकला-
रिष्टनिरासार्थं श्रीपरमेश्वरप्रीत्यर्थं च गृह्य मखशौनकोक्तां शांतिं करिष्ये इति संकल्प्य गणेशपूजन
पुण्याहवाचन षोडशमातृकापूजन ब्राह्म्यादिसप्तमातृकापूजनं नांदीश्राद्धानि कृत्वा शांतेदंते कुंडं
विनं मंडपं तत्र समाचार्यं ब्रह्माणं च ऋत्विग्वहोमार्थमष्टौ षट् चतुरो वा ऋत्विजो पिवस्त्रागंधादिना पूजये-
त्॥ तत्र आचार्यो गृहे शान्देशोपचौमनी घोरिति भूमिं स्पृष्ट्वा तद्दक्षिणे त्ररत्नस्मृतेपुव मंत्रावृत्त्या च भू-
मिं स्पृष्ट्वा॥ ॐ षधयः संवदंतेति द्रोणप्रमाणव्रीहिभिर्मध्ये तद्दक्षिणे त्ररतत्स्पृष्ट्वे देशे मंत्रावृत्त्या रा-
शित्रयं कृत्वा तेनैव क्रमेण राशित्रयेन वमकालकमञ्चानैं कुंभत्रयं आजिघ्र कलशामिति मंत्रावृत्त्या
स्थापयेत्॥ एवं सर्वत्र मंत्रावृत्तिः॥ ततः प्रसुव आप इति न वर्चेन कलशेषूदकपू[रणं]। गंधद्वारामिति
त्रिषु पिगंधं प्रक्षिप्य या ॐ षधीरिति सर्वौषधीः॥ श्रोषधयः सम स्थिपवाक्षिपेत्॥ ततो मध्यं कुंभेषु पवश्री-
हितिलमाषकंगुश्यामाकमकुन्त्रत्नि न्यग्रोधोदुंबरकुशाश्वत्थवीरकोत्पलचंपकविल्वविष्णुक्रांता

ग० स०

राम

ग० प० स०॥
॥१०६॥

तरलपीतकुरंडककुंजावचा... [illegible] ...दौषधानि सर्वाणि यथासंभवं चाक्षिपेत् । ततोऽस्मि पुष्कलशेषु

कु

ठाम

तुलसीबर्हिचूडाशंखपुष्पीशतावर्यश्वगंधानिर्गुंडीपीतसर्षपापामार्गपलाशापनसजीवकप्रियंगुगोधूमव्रीहिअ-
श्वत्थदधिदुग्धघृतपद्मपत्रनीलोत्पलानि सिक्कांडादितिकृत्वा । अश्वत्थैव इति पंचपल्लवान् । गजाश्वस्थान-
रथ्यावल्मीकसंगमह्रदगोष्ठस्थानमृदः सप्तनाम्नपृथिवीतिद्विसप्ताः फलिनीतितिरि पूगीफलानि सहिरण्य-
रत्नानि कनककलिशानीलपद्मरागमौक्तिकानि पंचरत्नानि । हिरण्यरूपइति हिरण्यं क्षिपेत् । युवासुवासा इति
सूत्रेणवाससा च कल[illegible]शांकां वेष्टयित्वा । गंधाक्षतपुष्पमालादिभिः कलशमभ्यर्षयेत् । ततः कलशपात्रयोपरि
तेनैव क्रमेण सौवर्णराजतकांस्यमयं वैणवं मन्मयं वा यवादिपूरितं पात्रं न्यसेत् पूर्णादर्विक्षतानि धाय रुद्रपरिश्वे-
तवस्त्र[illegible]त्रयं न्यस्य तत्र चंदनादिना अष्टदलानि कुर्यात् ॥ तत्र मध्ये गाय आत्मभुवनेश्वरीमावाहयामीति यथा शक्ति
सुवर्णनिर्मितां भुवनेश्वरीप्रतिमामग्न्युत्तारणपूर्वकं संस्थापयेत् । तद्दक्षिणकुंभोपरि [illegible] वस्त्रो इंद्राणीमासु
इति इंद्राणीमावाहयामीति तस्यैव सौवर्णमिंद्रप्रतिमां संस्थाप्योत्तरकलशोपरि इंद्रत्वा इति इंद्रमावाहया-
मीति सौवर्णमिंद्रप्रतिमां स्थापयेत् ततः उक्तमंत्रैरुक्तक्रमेण देवतात्रयस्य कांडानुसमयेन षोडशोपचारपू-

॥१॥
॥ग्र॥दा॥

ज्या कुर्यात्॥ ततो मध्यकुंभे आचार्येण सहस्रमष्टोत्तरं वा गायत्री श्रीसूक्तं जपेत्॥ हिरण्यवर्णामिति पंचदश
र्चं श्रीसूक्तं॥ तेन एक ऋत्विग् दक्षिणकुंभे रुद्रसूक्तानि जपेत॥ कद्रुद्रायेति नवर्चं इमा रुद्राय तवसे इति एकाद
शर्चं॥ आ ते पितरिति पंचदशर्चं इमा रुद्राय स्थिरधन्वन इति चतस्रः॥ आ वो राजानं १ भुवनस्य पितरं १ गंभीर्यं
आपाना ऋत्विग् उत्तरकुंभे एकादशावृत्ती मारुतं जपेत्॥ रुद्रसूक्तानि इंद्रं मरुत्व इति सूक्तं पंचदशर्चं जपेत्॥
ततः कुंभपश्चिमदेशे स्थंडिले अग्निं प्रणीय तदीशान्यां वेद्यां देवग्रहादींस्तन्मंत्रैरावाह्य षोडशोपचा
रैः संपूज्य तदीशान्यां ग्रहकुंभं संस्थाप्य तत्र वरुणमावाह्य अग्निसमीपमेत्य ब्रह्मोपवेशनांतां ताज्यभागांते
विशेषः। प्रणीताप्रणयनं पयसः प्रणयनं। आसादने॥ आज्यानंतरं गृहसमिधः तिलाः दूर्वाः तिलमि
श्रगोधूमाः॥ तं कृत्वा चरोः पयसि श्रपणं। आज्यभागांते यजमानो दक्षिणे उपविश्य होमार्थं वरयेदृ
त्विजो बहून्॥ आचार्यो द्विजैः सहेति चोक्तेराचार्यर्त्विजां होमावगमात् तेषां चास्वत्वेन तु स्वामायोगाच्चेत्प्र
क्षिप्यमाणे होमे यजमानेन न प्रत्याहुति त्यागस्याशक्यत्वात्तदानीं वाग्प्रधानदेवताउद्दिश्य एत

राम

॥१२॥
॥१०७॥

त्यइदं न ममेति त्यजेत्॥ ततश्चाचार्यः सर्त्विक्कुलनवग्रहेभ्योष्टाशताष्टाविंशत्यष्टान्यतमसंख्याकाघृताक्ताश्चार्क-
दिसमिधस्तिलाज्याहुतीश्च हुत्वाधिदैवताप्रत्यधिदेवताविनायकादिपंचलोकपालेभ्यस्तन्न्यूनसंख्यया जुहु-
यात्॥ एभ्यस्तत्पा लाश्चः समिधः॥ ग्रहाणांपदाष्टौ तदाद्येभ्यश्चतस्र इति संप्रदायः॥ ततोनुवश्यै गायत्र्या
दधिमधुघृताक्तास्तिस्त्रिर्दूर्वाग्निरेकाहुतिरित्येवमष्टसहस्रमष्टशतं वा दूर्वाहुतीर्घृताक्तास्तिलमिश्रा
गोधूमाहुतीः पायसाहुतीर्घृताहुतीश्च जुहुयात्। एवमिंद्राणींद्रयोः प्रागुक्तमंत्राभ्यां क्रमेण हविस्त्रितु-
ष्टयं प्रत्येकमष्टशतसंख्यं भुवनेश्वर्याश्चाष्टसहस्रपद्मैर्जुहुयात्॥ तस्याश्चाष्टशतपद्मेनुतवोरष्टाविंश-
तिरिति संप्रदायः। अन्येतु गायत्र्यैव तु हव्यं हविरत्र चतुष्टयं। ततः स्विष्टकृतं हुत्वेति शौनकेनेंद्राणींद्रयो-
र्होमानभिधानात्पोहोमो नास्तीत्याहुः॥ ततः स्विष्टकृदादिप्रणीताविमोकांतं कृत्वा इंद्रादिदिक्पा-
लेभ्यो नवग्रहेभ्यो भुवनेश्वरींद्राणींद्रेभ्यः क्षेत्रपालाय च सदीपान्माषभक्तबलींस्तत्तन्मंत्रैर्दत्वा पूर्णा-
हुतिं समुद्रादूर्मिरिति ऋचेन जुहुयात्॥ ततो भुवनेश्वर्यादिकलशोदकं ग्रहकलशोदकं च पात्रांतरे

त्वीतेन तस्य पंचपल्लवैः सकुशाद्दूर्वैर्घृतेन वस्त्रैर्यजमानं घृतेन वस्त्रकं चुकी च तथा मस्थां अनुमती
सर्वांश्चविगुप्तसुखमाचार्योभिषिंचेदेतैर्मंत्रैः॥ आपोहिष्ठेति नवभिः प्रणकऋद्धिदयतइत्येकया॥ त्रिभिर्दूर्वे दे
वेति समर्चेन॥ उत्तमेनश्रणवच्चनेत्येकयास्ति शाविन्नाइतिच॥ त्र्यंबकमिति॥ जातवेदस इति एकया स
मुद्रज्येष्ठा इति च तस्रभिः आयंतामिति तिसृभिः इमा आपइति तिसृभिः देवस्य त्वेति त्रिभिः॥ तमी
शानमित्येकया त्वमग्ने रुद्रेत्यापस्तंबशाखागतेनैकेनातं मुष्ठुहोतिमंत्रेण नुवनस्पतिरमिति चाया
ते रुद्रेति॥ पञ्चागतइति षण्मंत्रैः॥ इंद्रत्वावृषभं वयमिति पंचमंत्रैः॥ ततः सुरारत्नामभिषिंचेदिति नवभिः
पौराणैर्मंत्रैरभिषिंचेत्॥ ततकलशोदकेनान्यैर्नवोदकेन स्नात्वा तौ दंपती शुक्लवाससौ गंधमाल्यादिधृतौ
पवित्रौ तौ॥ तत्र पत्नी दक्षिणतः ततो यजमानोग्निं संपूज्य विप्रतिं घृतवाचार्यादीनं गंधपुष्पवस्त्रालंकारा
दिभिर्यथाशक्ति प्रपूज्य पित्वान्वा पीपघेनुं दक्षिणां दद्यात्॥ दक्षिणा त्वेनवास्य नदक्षिणांतरं अनवस्थो
प्रसंगात॥ ततो ब्राह्मणेभ्यो यथाशक्ति दक्षिणां दत्वा रुद्रजापिभ्यः सदक्षिणमनड्वाहं दक्षिणां प्रदद्यात्॥ अत्र

राम

॥ ५२ ॥
॥ १०० ॥

धेनुन्यायेनादक्षिणत्वे प्राप्ते स दक्षिणमनड्वाहं प्रदद्यादुक्षाण्यपि नेइति प्रतिप्रसवकरणा[illegible]सदक्षि
णत्वात् ततोऽन्येभ्य ऋत्विग्भ्योऽन्येभ्यश्च ब्राह्मणेभ्योऽप्यसीददक्षिणां दद्यात्॥ ततो ग्रहपीठदेवतानां त्र्यवने स्वयीदानां
चैव नरपूजां पंचोपचारैः कृत्वा ॥ समाप्य यांतु देवगणाः इति विसृज्याचार्यहस्ते प्रतिपाद्याग्निं संसृज्य गच्छ गच्छ सु
रश्रेष्ठेति विसर्जयेत्॥ ततो ब्राह्मणा महाशांतिं पठेयुः॥ तद्यथा॥ अग्निनोऽस्य इति दश॥ स्वस्ति नो मिमीतामिति
पंच॥ शान्न इंद्राग्नी इति पंचदश॥ आप्तमस्मिन्निति तिस्रः॥ तस्यैपोदितेषु का॥ ततो यजमानो नवग्रहप्रीतये त्रीन्मुवनेभ्य
रीक्ताणां इद्रप्रीतये ब्रह्मणे के चीन्के चीन्ब्राह्मणान्भोजयित्वा संकल्पो विप्राशिषो गृहीत्वा स्वहृष्टो तां नीत॥
एवं कृते सर्वारिष्टशांतिर्भवति॥ ततः शुभकाले गर्भाधानं कुर्यात्॥ ॥ इति पुष्परजोदर्शनशांतिः॥ ॥
अथ चंद्रसूर्योपरागकाले प्रथमरजोदर्शने शांतिर्विशेष उच्यते॥ शौनकः॥ ग्रहणे चंद्रसूर्यस्य प्रसूतिर्यदि जा
यते॥ व्याधिपीडा तदा स्त्रीणां मासैर्दुर्दर्शनात्॥ इत्थं संजायते तस्य तस्य मृत्युर्न संशयः॥ शांतिस्तत्र॥ तद्ग्रहणा
[illegible]दते रूपं स्वर्वर्णेन प्रकल्पयेत्॥ सूर्यग्रहे सूर्यरूपं हैमं चंद्रं तु राजतं॥ राहुरूपं प्रकुर्वीत नागेनैव विच

॥ ॥ [illegible]नागः सीसं त्रपाणां चैव रूपाणां स्थापनं तत्र कारयेत् । आकृष्णेनाप्यायस्वस्वर्भानो नोदितिमूर्जामंत्राउ
॥ ॥दीपि॥ क्ताः । नक्षत्रदेवतापास्तत्र न्मंत्रेण [illegible] मंत्रेण वा ॥ संप्रजप्तु पजेत् सूर्यं समिद्भिस्त्वार्कसंभवैः । एवं ग्रहेभ्यो पाला
शैर्हवी चीनाहुमेव च ॥ समिद्भिर्ब्रह्मवृक्षस्य नेत्रापं जुहुयाद्बुधः ॥ आज्येन चरुणा चैव तिलैश्च जुहुयात्ततः । पं
चगव्यैः पंचरत्नैः पंचकूपैश्च पल्लवैः । जलैरौषधिकल्कैश्च अभिषेकं समाचरेत् ॥ मंत्रैर्वारुणसंज्ञैस्तैरापो हिष्ठा
दिभिस्त्रिभिः ॥ इमं मे गंगेपरतस्तत्वा यामीति मंत्रकैः । पजमानस्ततो दद्याद्धृत्या प्रतिकृतिं च यो ॥ अथ प्रयोग
उपरागस्य पौर्णमास्यमावास्यस्यासंभवि ना न्यावात्तद्दतिरिक्तवारादौ दृष्टे प्रागुक्तं शांत्यासमुच्चीयं ते निमित्त
नैदात् ॥ अदृष्टार्थत्वाच्च [illegible] देवविध्य न्यावेतत्कार्यं कारिकायां रित्वा नवगमे नाम न होमे नारिष्टहोमाना मि
नानयातं निवृत्तयोगात् ॥ ग्रहणमात्रे लिपमेव ॥ अत्र च मनः अवगन्त्वा वातां नवग्रहमखः कृताकृत इति
विवेकः ॥ तत्र केवलापाः प्रयोगः ॥ पूर्वोक्तकाले सस्त्रीकः शुचिः प्राङ्मुखउपविश्य प्राणानायम्य देशका
लौ स्मृत्वा मम पत्न्या अमुकोपरागे प्रमरजोद्दीनस्सूचितारिष्टनिरासद्वारा परमेश्वरप्रीत्यर्थं शांतिं करि

राम

॥५२॥
॥१०७॥

ब्येइति संकल्प्यः प्राग्वत् कलशं विकृ पूजां कुर्यात्॥ नवग्रहपक्षेसनग्रहामिति॥ सूर्योपरागेतु सूर्योपरागे प्रथमे त्वादित्यं पूर्व
वत्॥ ततश्चाचार्यः शुचिदेशे गोमयेनोपलिप्य तत्र पंचवर्णरजोभिरष्टदलं पद्मं कृत्वा तदुपरि नवं श्वेतं वस्त्रं उदग्दे
शासे स्थाप्य यथाशक्ति रजतनिर्मितां चंद्रप्रतिमां आप्यायस्वेति मंत्रेण चंद्रमावाहयामि। इति स्थापयेत्॥ ततो
यथाशक्ति सीसानिर्मितां राहुप्रतिमां स्वर्भानो इति राहुमावाहयामीति तदुत्तरतः स्थापयेत्॥ ततो यस्मिन्न
क्षत्रे ग्रहणं तन्नक्षत्रदेवतां प्रतिमां यथाशक्ति सुवर्णनिर्मितां तत्तन्मंत्रैर्नाममंत्रैर्वाऽ ग्रस्मनावावाहयामि
न इति प्रणवादिनमोंते स्थापयेत्॥ मंत्राश्चाप्रसंवा नामपेटोवा कानीति प्रसिद्धाः॥ नामानि तु॥ अश्विनौ॥
यमः॥ अग्निः॥ प्रजापतिः॥ सोमः॥ रुद्रः॥ अदितिः॥ बृहस्पतिः॥ सर्पाः॥ पितरः॥ भगः॥ अर्यमा॥ सविता॥ त्वष्टा॥
वायुः॥ इंद्राग्नी॥ मित्रः॥ इंद्रः॥ निर्ऋतिः॥ आपः॥ विश्वेदेवाः॥ विष्णुः॥ वसवः॥ वरुणः॥ अजैकपात्। अहि
र्बुध्न्यः॥ पूषेति॥ एवं देवतात्रयमावाह्यैभिरेवमंत्रैः॥ कांडानुसमयेन षोडशोपचारैः पूजयेत्॥ तत्र चंद्र
[illegible]देवं स्नापयेत्॥ तानि वस्त्रगंधाक्षतमाल्यानि देयानि॥ सूर्यग्रहे तु सूर्यापरक्तं वस्त्रं रक्तं चंदनं रक्तां स्रक्कस्वी

।।१

।।गदा।।

...णदियानि। राहवेकृष्णानि। नक्षत्रदेवताभ्यः श्वेतानि। ततः पश्चिमतोऽग्निं प्रतिष्ठाप्य नवग्रहपद्धेन नवग्र
हनिष्पा वाद्यं हनन सर्वकर्मसु प्रत्यूहलोपवेशनादि चरुश्रपयित्वाज्यभागांतं। ततः पद्धेन नवग्रहहोमः।। ततश्चंद्रमु
दिश्योक्त संख्यया पलाशसमिदाज्य चरुतिलैर्होमः।। राहुमुद्दिश्योक्त संख्यया दूर्वाज्य चरुतिलैर्होमः।। न
क्षत्र देवतामुद्दिश्योक्त संख्याया पलाशसमिदाज्य चरुतिलैर्होमः।। + सूर्यग्रहे तु चंद्रस्थाने सूर्यमुद्दिश्यो
क्तसंख्ययाऽर्कसमिदाज्य चरुतिलैर्होमः + त्रिसृणं हवीणामेकैकाहुतिः। समिधश्चाष्टविंशतिमध्वक्ताः कार्या
ततः स्विष्टकृदादि पूर्णाहुत्यंतं प्रागवत्। ततः आचार्य एकस्मिन् कलशे जलं पूर्णं पंचगव्यानि पंचरत्नानि
वटाश्वत्थोदुंबराम्र बिल्वानां त्वचः पंचपल्लवानि सर्वौषधिकल्कं दूर्वाः कुशांश्च निक्षिप्य सर्विकुंदंप
तीः सर्वैव दर्भाभिषिंचेद् देतैर्मंत्रैः।। आपोहिष्ठेति इमं मे गंगेति तत्वायामीति।। ज्यन्यापि समुद्रज्येष्ठा इत्यादय
यः। सुरास्त्वामित्यादयः पौराणाश्च। ततः स्नानं दक्षिणादानं प्रतिमाप्रतिपादनादि पूर्ववत्। पदानं तु पूर्वं शां
तिसमुच्चयस्तदा कालैक्या लक्षैकादाग्नेयादिवत्तंत्र प्रयोगः। तत्र प्रजमानो देशकालौ स्मृत्वा मम मास्याः

राम

।।५ग२।।
।।१७।।

पत्न्याः प्रथमरजोदर्शने अमुकगोत्रमासतिथ्यादि अमुकग्रहणप्रभवितेत्यादिसंकल्प्यर्त्विक् प्रजांते विदध्यात्। ततश्चा
चार्यानुमनेश्वर्यादिप्रजांतः प्राक् पश्चाद्वा ततउदीच्यां चंद्रादीन्संपूज्य पयोपक्रमं होमाभिषेकौ कुर्यादिति विशे
षः। अन्यत्समानं॥ ॥इति ग्रहणे रजोदर्शने शांतिः प्रसूतिकाले च। ॥इति श्रीसमाद्ध्वा० गदाधरकृते
प्रयोगरत्ने कादशीकंडिका॥ २ ॥पक्षादिषु स्थालीपाकं श्रपयित्वा दर्शपूर्णमासदेवताभ्यो हुत्वा जुहोति ब्र
ह्मणे प्रजापतये विश्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यामिति॥ ॥पक्षाः पूर्णमादयः पक्षादयः तासु पक्षादि
षु प्रतिपत्सु बहुवचनोपदेशात्सर्वपक्षादिष्वेतत्कर्म भवति। उक्तेन विधिना स्थालीपाकं श्रपयित्वा नेने
वस्थालीपाकेन दर्शपूर्णदेवताभ्यो विभागेन होमः॥ पौर्णमासे पक्षादौ पौर्णमासदेवताभ्यो हुत्वा दर्शकाल प
क्षादौ दर्शदेवताभ्यो हुत्वा। ब्रह्मण इत्येवमादिभ्यश्चतुर्भ्यो जुहोति स्थालीपाके नैव दर्शे व पौर्णमासे त्रविधि
समानि इति कृत्वा ग्रंथगौरवभयात् वार्ये ए समस्ता न देवाः कृताः। अतो पादश्चास्ताभ्यो होमो विनाभेन सह
दशाए वेहापीति॥ एवं चस्मत्संतरैः सहानुगतार्थो भवति॥ केचित्तु समस्तोपदेशात्सर्वेभ्यो होमानिच्छंति

मास ४

वचेरोरुपादानं मान्नूदितिश्रवयितेत्याच्यते। यद्यप्यत्र पक्षादिछितिसामान्ये नोक्तं तथाप्यस्मत्पंतरोक्तो यागकालो
ग्राह्यः॥ वक्ष्यमाणेनातप॥ पर्वणोप्यस्तु तुर्यांशो ग्राह्यः प्रतिपदस्त्रयः॥ यागकालः स विज्ञेयः प्रातरुक्तो मनीषिभिः
कारिकायां॥ आवर्तनेऽपवाततः मार्गपादिपर्वसमाप्यते। तत्र पूर्वाह्ण एव स्यात् लंघेरुर्ध्वं द्विजातीनां। आहिताग्ने
र्नियम इष्टेरुर्ध्वं विधानतः॥ ऊर्ध्वमावर्तनात्स्वेतस्या छ्योच्यते प्रातरेव हि। प्रतिपदि वृद्धिगामिन्यां ह्रीणायां
वा संधिज्ञानोपायमाह ल्लौगाक्षिः॥ तिथ्योपरस्या घटिका अपास्तु न्यूनास्त्वेवाभ्यधिकाश्चतासां॥ अर्द्धं द्वि
योऽपेव तथा प्रयोऽप्यकोसैवेष्टी प्रथमेदिनेस्यादिति। प्रतिपद्वृद्धिनाडिका अर्द्धद्वधा विभज्याद्यं पर्वणि संये
ज्य संधिः कल्पनीयः॥ तथैव प्रतिपत्क्षयनाडिका अर्द्धद्वधा विभज्याद्यं पूर्वणि वियोज्य संधिः कल्पनीयः॥
तदुक्तं कारिकायां। अन्वाधानानंतरं तमेवाकर्म प्रचक्षते॥ पौर्णमासादिदर्शांतमेकमेव विदुर्बुधा इति वचनात्।
कृष्णपक्षे यद्याधानं तदा दर्शमनिष्ट्वैव पौर्णमास्यां प्रक्रमादिकर्मारंभः॥ यत्तु छंदोगपरिशिष्टवचनं॥ ऊर्ध्व
पूर्णाहुते दर्शः पौर्णमासोपि चाग्रिमः॥ यः आयाति स होतव्यः स एवादिरिति श्रुतेरेतदन्वाधानवि

८

राम

ग.ग.दा.
१९२१

षर्यंतछास्त्रिविषयमित्युक्तं। अत्रैकेवदंति। आधानस्यमुख्यपक्षे वीहितत्वात्तदुत्तरंपौर्णमासस्थालीपाक
कालस्याविद्यमानत्वात्तौमानत्वासौमासस्थालीपाकारंभोयुक्तः। तच्चिंत्यं। अस्माकंसूत्रेदर्शकालेदाया
घकालेवैत्यावसथ्याधानस्यकालउक्तः। तत्रपदर्शयाघकालेआधानंकृतेतदुत्तरंयाप्रतिपद्भवतितस्या
मारंभोयुक्तः। ननुदर्शनपनंआप्रथमाल्पदेपुण्याहइत्युक्तत्वाद्विभागोपिमुख्यपक्षेस्यात्तदाकस्यायांप्र
तिपद्यारंभः स्विष्टौदेवसत्वाविभागस्तववगतः प्रामस्तत्रकालापेक्षाभावात्प्रथमाल्पदितिदमोनस्या द
तोपदैवविभागस्तदेवाधानंततःप्रतिपद्यारंभइतियुक्तं॥ नन्वस्तुकेमपक्षेमुख्येकालेसेवाविभागआधानेतुमु
ख्यपक्षेएवकार्यानैवं॥ कालविलंबेप्रमाणाभावाद्विभागोनत्तरंकार्यमेव॥ ततोयाप्रतिपद्यातितस्यामारंभइति
अत्रवक्तकमस्तिग्रंथगौरवभियानोच्यते॥ यद्यारंभकालेसूतकमलमासगुरुशुक्रास्तवाद्यल्पवार्धकग्र
हणादिभवतितदाप्रारंभः कार्यः॥ यानितुतत्रारंभेनानिषेधकानितुपरागोधिमासस्थपदिप्रथमपर्वणि
तथामलिम्लुचेपौषेनारंभस्तत्प्रतिषिध्यते। नगुरुभार्गवयोर्मौढ्येचंद्रसूर्यग्रहेतथेत्यादीनिसंग्रहकारा

नि
प

दिवचनानि तानि आलस्यादिना स्वकाराऽनुपक्रांतस्याल्पीपाकादिपारंभाविषयाणीति प्रयोगपारिजातकारः
प्रयोगरत्नकारस्तु तथा चापरार्कः स्पर्शगंगेव च नंउक्ताहारान्नामवामिचदेर्शेष्विं यथाकालं समाचरेत् । आपति
पाते सति तयोः प्रशस्ते मासि पुण्येऽहनि इति देवयाज्ञिके स्मृत्यर्थसारे पूर्णमासानीनानि इति सूत्रव्याख्याने स्मृतेक
स्युक्तागहणादिनिमित्तं नवशाद्धेत्वा पूर्णमासारंभोत्कर्षे सति आग्रयणकाले आगते तदिति कामशंकायामयं प्रका
र इत्यलं ॥ स्मृतौ याज्ञिकानाम नन्ची पृः स्युक्तास्ता दावीरंभ इत्याच्चाति ॥ याचत्रिकांडमंडनः ॥ आधानो
नंतरं पौर्णमासी चेन्मलमासगा ॥ तस्यामारंभणीयादी न कुर्वीत कदाचनेति ॥ आचारोप्येवं ॥ ॥वि
श्वेभ्यो देवेभ्यो बलिहरणं चेतरं तु होमाग्निकार्यं च ॥ इष्टीतरानुपदेशात्स्याल्पीपाकादेवा विश्वेदेवा
दिभ्यो बलित्रयमग्नेरुदक्प्राक्संस्थं कुर्यात् ॥ बलिहरणवाक्ये च नमः शब्दांते कार्यः उक्तं चैतत्कर्को
पाध्यायैर्बलिहरणे च नमस्कार इति ॥ पितृभ्यः स्वधा नम इति दक्षिणत इति सूत्रव्याख्यानावसरे च नमस्का
रस्यात्र प्रदर्शितत्वाच्चाचार्यैः सर्वबलिहरणेषु प्रतीतेत्यलं ॥ ॥ वैश्वदेवस्याग्नौ जुहोत्यग्नेप

राम

गा॰चर ॥
२११२॥

॥ वैश्वदेवस्येसर्वयवलक्षणावश्यो [illegible] लादेवपितृमनुष्यादयः अस्येति वैश्वदेवः सर्वार्थः प्रत्यहं क्रियमाणः पाकस्तस्य १

स्वाहा प्रजापतये स्वाहा विश्वेभ्यो देवेभ्यः स्वाहाग्नये स्विष्टकृते स्वाहेति ॥ ४ ॥ वैश्वदेवस्याग्नये स्वाहेत्या
दि भिर्मत्रैर्जुहोति वैश्वदेवस्येति सिद्धवदुपदेशात् द्वितीयस्थालीपाको वैश्वदेवः समानतंत्रः पक्षादिषु
भवतीति चरुर्यपक्षत्राणो । कर्कोपाध्यायैस्तो वैश्वदेवे केचित्स्पष्टकृच्चरुं कुर्वंति यथापौर्णमास्य जुहोती
ति पौर्णं । ततु न रुषुक्तो । वैश्वदेवशब्देनावि श्वेदेवादेवता अस्येति सर्वार्थो पाको ग्निद्यापतेतेनजुहोतीत्युक्त
क्तं भवति । पक्षुपौषवदिति नहि पौषस्य शाहवाक्यो न्यः कश्चित्सुरुर्भवति ॥ तेनास्य स्पष्टकृत्क्रिया । वैश्वदेव
स्तु पुनः पाको विघृतए वेति । तथा चवक्ष्यंति वैश्वदेवादन्नात्सर्पुष्पस्वाहाकारैर्जुहुयादिती त्युक्तो । अग्ने
होमः प्राप्त एव पुनराग्नौ जुहोतीति । अग्निगृहणं बलिकर्माग्नौ माभूदिति । अग्नये स्विष्टकृते स्वाहेति
प्रयोगोपदेशो नार्थो । प्रजापत्यपरस्विकत्वेति प्रदेशांतरेउक्तो इह प्रयोग उपदश्यते । अपि च स्थालीपा
के नदर्शपूर्णमासदेवतादीनांहोमविधानस्यावसरा विधित्स येतत ॥ तत्कोपं । प्राग्मयभ्याहुतिहोमाद्याज्य
भागोत्तरकाले चावसरोगम्यत इति । स्विष्टकृद्धोमस्य शेषादेव भवति । स्विष्टकृद्गृहणं वक्ष्यमाणस्य

॥गो॰ दा॰॥

बलिहरणस्य श्राद्धान्वाघातनार्थ्यं इति सूत्रार्थः। परिशिष्य ततः प्राङ्मुखस्त्वालोकारग्रहणं बलिनिवृत्त्यर्थं।
प्रदानार्थौ पित्र्याहाकारेण बलिहरणे भवति॥ ॥ वाह्यतस्त्रीबलिंहृत्वा इति नमः श्रियै नमः पुंसे वय
सेवयसेन नमः स्नायकृष्णदंताय वापीनां पतये नमो ये मे प्रजामुपलोभयंति ग्रामे वसंत उत वारण्ये तेभ्यो
नमोस्तु बलिमेभ्यो हरामि स्वस्ति मेस्तु प्रजां मे ददात्विति॥ ॥ ततो बाह्यतः शाखायाः बहिर्देशे नमः श्रि
यै इत्यादिमंत्रैः प्रतिमंत्रं स्थालीपाकाहुतिवद्बलिं त्यागादि भवति बलिं शस्त्रीबलिः। तं हरति स्रुवेण मंत्रेते च
मो प्रक्षिपति। एतच्चागंतुकबालत्सर्वतीति भवति। मंत्रार्थः। श्रियै संतानसुखदायिन्यै नमः नमस्कारो
स्तु। अतः संतानसुखेच्छयात्र बाह्येव कारिण इति जयपरामः। तथा पुंसे ऊर्ध्वस्वरूपायैव। किंभूतय पय
सेवय इत्यादयपवाल्पाप्रवाक्षुस्नाय बहिः कृष्णदंताय असितं तातरं गावयवाय। अतिमालिननमसेत्यर्थः। अ
तएव पापीनां पतये। अग्रेपापादिसंघो भ्यां दसः। अत्र बलिं त्वयेषु मानेन विभीष्यते ये च मे मम प्रजां सं
तानमुपलोभयंति मोहयंति। ग्रामे वसंतः। उत अपि वा अरण्ये वनेवापि तिष्ठन्तो नम

राम

॥धर॥
॥११३॥

नमस्कारोऽस्तु। एभ्यो बलिं प्रजां हरामि। मम नमस्कार बलिं त्यां पूर्वं संतुष्टाः भवत। ततो भवतां प्रसादान्म
म स्वस्ति कल्याणमस्तु। भवंत स्वमे मद्धेयं प्रजापुत्रादि सुखजातं ददन्तु पूर्वछं तु।। शेषमद्भिः प्रक्षाल्य ततो ब्रा
ह्मणेभ्यो जनं।। ।।बलिहरणानंतरं शेषं स्थालीस्थितमवशिष्टं चरुणान्नादिर्ल्लौकिकोऽद्यकेन प्रक्षाल्य मद्भि
पिबाघ्रा हरणेभ्यो जनं कुर्यात।। प्रणीतोदके प्रक्षाल्य नमितिवासुदेवादयः।। नैतिकादिकायां।। ।।इति
श्रीमहायाज्ञिकसंप्रा॰गदाधरकृते गृह्यसूत्रभाष्ये प्रपं॰ दादशी।।१२।। ।।अथ पदार्थक्रमः।। आधा
नानंतरं प्रथमप्रतिपदि प्रातः स्नात्वा कृतनित्यक्रियो निर्णेजनांते वैश्वदेवं कृत्वा मातृपूजापूर्वकमाभ्युद
यिकं कुर्यात। ततः संकल्प।। देशकालौ स्मृत्वा मम पाप्मदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं स्थालीपा
कं करिष्ये इति।। अत्रात्मनो ब्रह्मणः प्रणीतानां चासनं स्वतुष्टये कुशैः कुर्यादिति हरिहरः।। तत्र प्रणीता
र्थं द्वयं। ततो ब्रह्मोपवेशनादि आज्यभागांतं चरुसहितं कुर्यात। तत्र विशेषस्तंडुलानां तरं वैश्वदेवान्नस्य
नं प्रोक्षणं।। ततः आज्यभागांते स्थालीपाकमभिघार्य स्रुवेण चरोर्होमः।। ॐ अग्नये स्वाहा। इदमग्न

॥ग॥ पारदा॥

...य मेध्यो नमम। ॐ नमोऽस्तु वल्लिमेध्योह ॥ मिस्वस्ति मे स्तु प्रजां मे ददतु स्वदं मेध्य इति त्यागः इति हरिहरः ५
य नमम। ॐ प्रजापतये स्वाहा। इदं प्र०। ॐ विश्वेभ्यो देवेभ्यः स्वाहा। इदं० स्वचरो वैश्वदेवान्नस्य च होमः। ॐ अग्न
ये स्विष्टकृते स्वाहा। इदमग्न०। तत आज्येनानुराघा नवाहुतयः। प्राशनं। मार्जनं। पवित्रप्रतिपत्तिः। प्रणीता
विमोकः। दक्षिणादानं। ततः स्थालीपाकेनाभ्युक्ष्याग्नेर्बहिः॥ स्रुवेण बलिहरणं। ॐ नमः स्त्रियै इ
दं नमः स्त्रियै नमम। ॐ नमः पुंसे वयसे। पुं रसे वयसे। ॐ नमः शुक्लाय कृष्णदंताय पापीनां प
तये। इदं शु०। ॐ नमो ये मे प्रजामुपलोभयंति ग्रामे वसंत उत वारण्ये तेभ्यः। इदं स्त्रियै पुंसे वयसे वयसे
शुक्लाय कृष्णदंताय पापीनां पतये ये मे प्रजामुपलोभयंति ग्रामे वसंत उत वारण्ये तेभ्यश्च न ममेति गा
धरकारिकाकारो। शेषमग्निः प्रक्षाल्य एकब्राह्मणभोजनं कुर्यात्। इति पौर्णमासस्थालीपाकः। अपरदर्शे
विशेषः। तत्राधानानंतरयामावास्याप्राप्तितस्यां त्रेधा विभक्तदिनतृतीयांशे परमसंबंधे पिंडपितृयज्ञ
कापः॥ तस्मिन्दर्शेदशातीति स्मृतेः। चेऽन्हः पंचदशपघटिकास्पर्शप्रत्यहं न वाति तथापि परमह्यायोऽत्र
विवर्जितः॥ स चामंते शास्त्रोक्त इति। दिनद्वयेप्यपराह्णिकदेशप्राप्तो सत्या परदिने धघटिका मा

राम

॥स्म रा॥
१९१५॥

त्रपरिमितामस्त्वान्नेपि तत्रैव पिंडपितृयज्ञानुष्ठानमुचितं। एकस्मिन्नेवदिने पराह्णव्याप्तौतु यस्मिन्नेव
दिने ऽपराह्णव्याप्तिस्तत्रैव तदनुष्ठानं एवं चपिंडपितृयज्ञकालस्यवाजसनेयिनां शाखापामुपदेशा
गकालस्यानुपदेशात्पिंडपितृयज्ञादिनात्पूर्वदिनेयागः कार्यः॥ पूर्वेद्युः पितृभ्यो निष्क्रीय प्रातर्देवेभ्यः
प्रतनुत इति कर्कोदाहृत शाखांतरीयश्रुतेः॥ पूर्वांगत्वात्पिंडपितृयज्ञ इति सूत्राच्च। यद्यपि चंद्र
दर्शने यागनिषेधः स्मर्यते॥ द्वितीयात्रिमुहूर्त्ता चेत्प्रतिपद्यापराह्णिकी। अन्वाधानं चतुर्दश्यां पक्ष
तः सोमदर्शनादित्यादि तातत्पायुक्तन्यायेन वाजसनेयिनां पिंडपितृयज्ञपरदिन एवं चंद्रदर्श
नवत्यपियागानुष्ठानस्योचितत्वाद्वाजसनेयिव्यतिरिक्तविषयत्वेन पूर्वाह्णमध्याह्नसंधिविष
यत्वेवानिषेधो नेतव्यः नचास्य दर्शांगत्वाद् नाहिताग्नेरेव न भवतीति वाच्यं॥ अनाहिताग्नेर
प्यष्टकत्वात्॥ अपरं मृतपितृकस्यैवभवति। अत्र मातृपूजनपूर्वकमभ्युदयिकं कार्यमिति
कंगंगाधरे॥ अत्र सर्वकर्मापसव्येन दक्षिणामुखेन कार्यं॥ अत्रैवं पदार्थक्रमः॥ ॥प्राचीना

घ

१४
।।१।

...चाराद्यस्तोपि मदनश्चवेपाविशातेततोग्नेर्दक्षिणतःसंस्थमपसव्यंपरिस्तरणं।अग्नेःपश्चादुत्तरतोवादक्षि॰
णीकरणं।नीवीबंधनं।।तच्चकुशातिलसंयुक्तानांवस्त्रदशानांसव्यभागपरिहितवस्त्रेणसंवेष्टनावगू
हनमितिदेवयाज्ञिकाः।ननीवीकुरुतइत्येतद्व्याख्याने नीविःपरिधानदशाग्रंथिःप्रदेशांतरेप्रदेशांत
रोवगूहनामित्याचार्यः ग्रंथेतैःनीविकुरुतेसोमस्यनीविरित्यत्रचनीविरपवर्त्तिकेतिकर्कोद्रपः।।स
र्वसूत्रव्याख्यावलोकनेप्रदेशांतरेप्रदेशांतरावगूहनमेवापातिनीवीवासोदशांतेनरत्वरज्ञार्ग्रं
प्रबंधयोदितिग्राश्वलायनः।।वेदिःसंग्राहिसंग्रहनावछादनवाक्यत्रोषोदक्षिणतइवकार्य
नीविरितिदक्षिणेकटिदेशोनुतिस्त्रेःसहकुशात्रयमितिवद्धयाज्ञवल्क्यः।।नीविःकार्यादशाग्रु
प्तिरित्यवोकुदेशोकुशैःसहतिर्यक्त्वात्यापनवचनतं।हिवेस्प्राद्दे।।पितृणांदक्षिणपार्श्वविपरीतान्तवेष्ट
कइतिस्मृत्यंतरान्तर।।वामेदक्षिणेसंस्पंदक्षिणेग्राणेपात्राणामेकैकेनासोयं।नद्धिन्नाः।।स्रुक्
उलूखलं।मुसलं।शूर्पं।चरुस्थाली।उदकं।ग्रासंमेक्षणं।वज्रं।उदपात्रं।सकृदाछिन्नानि।
व्रीहयः।।स्त्रुचाणिचा।। ऊर्णावा।।वस्त्रदशाका।स्थाल्यांग्रहणपदोपूर्वतस्याग्नासादनं।।नस्त्रु

तु
म४

देवि
राम
८३

।।५२।।
।।११५।।

चः ॥ अपरेणाग्निं चरुमपूर्णं स्रुवे । एवाग्न्याति । ततो ग्नेरुत्तरत उलूखले व्रीहीनोप्यातिष्ठतोऽवहननं ॥
शूर्पेणनुप्य । निष्पवनं । सकृत्फलीकरणं । अपूर्णस्य चरोः सारतंडुलस्य श्रपणं । अभिघारणं । दक्षिणे
नोद्वासनं । अपसव्येनाहरणं । ततो दक्षिणामुखस्य एवाहुतिद्वयं जुहोति । अग्नये कव्यवाहनाय स्वाहा ।
इदमग्नये न मम । ॐ सोमाय पितृमते स्वाहा ॥ इदं सोमाय पितृमते न मम । अग्नेर्नोमेक्षणप्रासनं ॥
६ स्फेनध
अग्निमपरेण दक्षिणेन वा अपहता इति दक्षिणसंस्थां लेखां कुर्यात् । ये रूपाणीति परस्तादुल्मु
ककरणं । लेखायां पितृप्रभृतित्रिष्वोऽवनेजनं । पितः अमुक अवनेनिक्ष्व इति रेखामूले । पिताम
ह अवनेनिक्ष्वेति ॥ रेखामध्ये । अमुक पितामह अवनेनिक्ष्वेति रेखांते । रेसकृदाच्छिन्नानि लेखा
यां कृत्वा यथावनिक्तं पिंडदानं । पितः अमुक एतत्ते अन्नमिति मंत्रेण रेखामूले पिंडदानं । पिताम
ह एतत्ते अन्नमिति रेखामध्ये । प्रपितामह अमुक एतत्ते अन्नमिति रेखांते । अत्र पितर इति जप ॥
अपसव्येनोदङ्मुखावर्त्तनं ॥ आतमनात्तिष्ठेत ॥ पुनरसव्येनेवाऽमीमदंतेतिजपः ॥ पूर्ववदवनेजनं ॥

विस्रंसनं॥

।११।
आदा॥

।पिंडानामुपरि नीविं विस्रंसनेन । नमो वः इत्यंजलिकरणं । षड्भिः प्रतिमंत्रं । गृहान्नः इति जपः । सूत्रादीनामन्न
तमस्य प्रदानमेतद्व इति प्रतिपिंडं । ऊर्जमिति पिंडानामुपरि उदकनिषेकः ॥ उद्वासनं पिंडावघ्राणं ॥
अवघ्राणं ॥ स कदाचिन्नावधानमग्नौ । उल्मुकस्य च । पुत्रकामा पत्न्या मध्यमपिंड
प्राशनेन । तस्मिन्नाद्ये अवघ्राणं यजमानस्य उक्तोद्दपस्य श्रीनेन । ततः पार्वणं श्राद्धं इति क्रमः ॥ ततः
श्वः प्रतिपदि वृद्धोपवेशनादि अन्वाधानांते कृत्वा स्थालीपाकेन अग्नये स्वाहा । विश्वेभ्यो देवेभ्यः
इंद्राग्निभ्यां स्वाहेति द्वौ देवतान्तौ हुत्वा ब्रह्मणे स्वाहेत्यादि ब्राह्मणतर्पणांतं पूर्ववत् कुर्यात् । सर्व
त्र पूर्वं स्थालीपाकः । पश्चाद्वैश्वदेवः ॥ तदुक्तं कारिकायां ॥ अकृते वैश्वदेवे तु स्थालीपाकाः प्रकी
र्त्तिताः ॥ अन्यत्रापि तत्पत्न्यानुसारेण विधीयते । प्रथमायां प्रतिपदि तु आज्यभुवः पिकात्पूर्वं कार्यः ॥
इति तत्रैवोक्तं ॥ ॥ गार्ग्यमते तु पिंडपितृयज्ञे वरीरूषासनं । तेति सूक्तेन समिधाग्नौ होमः ॥ ए
तते अन्नमिति नाध्याहार इति विशेषः ॥ ॥ अथ गार्ग्यमते स्थालीपाके विशेषः । प्रथम

गार्ह

राम
॥४२॥
।११६॥

२

प्रयोगे पौर्णमास्यां मातृपूजाभ्युदयपूर्विकान्वारंभणीया ब्रह्मासनाद्याज्यभागांतं पूर्ववत्॥ ग्रहणे अग्न
विष्णुभ्यां सरस्वत्यै सरस्वते जुष्टं गृह्णामीति ग्रहणं। प्रोक्षणे त्वाधिकः॥ आज्यभागांते च तद्धोमः॥ अग्ना
विष्णुभ्यां स्वाहा॥ सरस्वत्यै स्वाहा। सरस्वते। अग्नये स्विष्टकृते स्वाहा। महाव्याहृत्यादि ब्राह्मणभोजनां
तं। ततो वैश्वदेवः॥ ततः स्थालीपाकतंत्रेणाज्यभागांते विशेषः॥ चरुस्थालीद्वयं। ग्रहणे अ
ग्नये अग्नीषोमाभ्यामग्नीषोमाभ्यां ब्रह्मणे प्रजापतये विश्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यां जुष्टं॥
अग्नये प्रजापतये विश्वेभ्यो देवेभ्यो जुष्टमिति द्वितीयचरुग्रहणं। प्रोक्षणे त्वाधिकः। आज्यभागां
ते पूर्वेण चरुणा अग्न्यादिभ्यो हुत्वा तेनैव बलिहरणं पंचमं त्रैं। द्वितीयचरुशेषेण बलिहरणं। शेष म
द्भिः प्रक्षाल्य महाव्याहृत्यादि प्राजापत्यांतं संस्रवप्राशनब्राह्मणभोजनांतं। तदनंतरं चरुशेषेण
वैश्वदेवः॥ अमावास्यायां पक्षादिषु कर्मविशेषः। तत्र ग्रहणे प्रोक्षणे होमे चाग्नेरनंतरं विष्णुः इंद्रा
ग्नी च शेषं पौर्णमासवत्। कृतसोमस्य यजमानस्याग्नेरनंतरं अग्नीषोमौ इंद्रस्थाने भवति। इति ग

॥ ग८ ॥

मतविशेषः ॥ स्वकाले स्थालीपाकपिंडपितृयज्ञयोरकरणे विशेष उच्यते ॥ प्रमादिः पिंडयज्ञादि प्रमा
दात् कृतं यदि । प्रायश्चित्तं ततो हुत्वा कर्तव्यं तद्दिनांतरे । पिंडपितृयज्ञस्य प्रमादिने एव भवति नादिनांतरे
। पितृयज्ञात्यये चैव वैश्वदेवद्वयस्य च ॥ अनिर्वर्त्य नवयज्ञे न नवान्नप्राशनं तथा । भोजने पतिता
न्नस्य चरुं वैश्वानरो भवेत् ॥ अनाहिताग्नेस्तु ॥ आहिताग्निस्तु इष्टिरेव कार्या । मुख्यकालेपदानु
स्थाप्तो पौर्णमासः कर्पं चवन । कृत्वा नादिष्टमादर्शाकार्नं त्रयोपत्रकुत्रचित् । न चेत् मार्गशीर्षः स्याद् दर्शे
न सुहृतं क्रिया ॥ यदि दर्शो प्रतिक्रांतस्तदा पथिकृती भवेत् । अत्रापि चरुरेवा नाहिताग्नेः ॥ य एवाहि
ताग्नेः पुरोडाशस्त एवानाहिताग्नेश्चरुरेव इत्यर्कावृत्तः । एवं दर्शेतिपन्नः प्राक् पौर्णमासान्न चेत्कृ
तः ॥ पितृयज्ञं विनासौ पि कर्तव्योपत्रकुत्रचित् । न पौर्णमासनं त्रैस्याद् दर्शेऽस्मिन् प्रयोगः । पौर्ण
मासे प्रतिक्रांते पतिपत्तिः पथिकृत्तदा ॥ १२ ॥ सायं प्रातर्ग्नेर्नं दधीतसिरं प्योः श्वेत उष्णानुयोष्ण
पुष्पेण मूलमुत्पाद्य चतुर्थ्येहनि स्नातायां निशायां पृदये षष्ठं पिष्ट्वा । दक्षिणस्यां नासिकायां मासि

राम

॥ चर ॥

॥ ११७ ॥

वतीयमोषधीत्रायमाणासहमानासरस्वती॥ अस्याअहं बृहत्याः पुत्रः पितुरिव नाम जग्रभमिति॥ ॥सा
खूदास्त्री गर्भकामा यदि गर्भं न दधीत न धारयति तदा गर्भासिंहं श्वेतपुष्पाः सिंहा तिरिंगणिका कंटरिका
पर्यायाः श्वेतानि पुष्पाणि यस्याः सा श्वेतपुष्पी तस्याः उपोष्य पुष्यनक्षत्रदिनात्पूर्वदिने स्वयमुपवासं कृ
त्वा पुष्येण मूलमुत्पाट्य पुष्यनक्षत्रदिने पूर्वोक्तायाः कंटरिकाया मूलमुत्पाट्य पतेन स्थापयित्वाम
तुयुक्ता नार्यायदा न भवति तदा चतुर्थेऽहनि स्नातायां रात्रौ तन्मूलमुदकेन पेषयित्वा दक्षिणनासापुटे आ
सिंचति इयमोषधीत्रायमाणे सनेन मंत्रेण नैवाततो नतीचोजनं कार्यमिति गर्गपद्धतौ॥ मंत्रार्थः
ओषति दहति दोषान्दुर्गुणानित्योषधी इयं। त्रायमाणा पापोत्पुकारदंती॥ सहमाना दोषवेगासे
ढापि नाशयतीत्यर्थः सरतिकारणतया नुगच्छतीति सरः समुद्रः तद्वती तत्संबोधने आतः अस्य बृहत्याः म
हत्याः बृहति पुत्रादि नामेन वातस्याः प्रभावा बालं पुत्रपितुरिव पैमित्यहं नाम जग्रभ आगतोयोल्लभेयं॥
पत्रस्य पितेति लोकाः कथयंति॥ सुगमत्वादत्र पदार्थक्रमो नोच्यते॥ ॥ इति श्रीसंग्रादूं गद्य

पंचादुत्तीयेवायदापुन्नक्षत्रेण चंद्रेण चंद्रमा ... हाप्रतिगप

कंडि २

प्रसादग

कृतेग्न्याधानस्य च नाद्यभिप्रायोदर्शिका ॥१२॥ ॥अथ पुंसवनं पुरा स्पंदत इति मासे द्वितीये तृतीये वा ॥ ॥
पुंसवनमिति गर्भसंस्कारकर्मणो नामधेयं ॥ तच्च स्पंदते पुरा स्पंदिष्यते चलिष्यति ॥ यावत्पुरानिपातयो
र्लट् इति भविष्यदर्थे वर्त्तमानप्रयोगः ॥ पुरा गर्भस्पंदनाद्भवतीति हेतोः ॥ पुष्ये द्वितीये वा मासे तृ
तीये वा मासे तौ गर्भाधानाद्भवति ॥ प्रथममासे वा पूर्णे भवति द्वितीये वा तृतीये वेति च तत्प्रथमः ॥ तथाहि
मावर्त्तनीयमेतत् ॥ तथा कारिकायां ॥ गर्भसंस्कार एवायमिति कर्कस्य संमतिः ॥ अतस्तस्य गर्भसंस्कारा
र्थं गर्भे प्रयुज्यत इति ॥ वह्वृचकारिकायामप्येवं ॥ कालातिक्रमे स्पंदितेपि कार्यमेव ॥ तदुक्तं कारिका
यां ॥ एतदेव पुरा गर्भचलनाद्दृष्टं तेपदि ॥ सीमंतात्प्राग्विधातव्यं स्पंदितेपि बृहस्पतिरिति ॥ यदहः पुं
सा नक्षत्रेण चंद्रमा युज्येत तदहरुपवास्याप्लाव्याहतेवाससी परिधाप्य न्यग्रोधावरोहान् शुंगांश्च नि
शायामुदपेषं पिष्ट्वा पूर्ववदासेचनं हिरण्यगर्भो ऽद्भ्यः संभृत इत्येताभ्यां ॥ ॥मासे द्वितीये तृतीये
वा यस्मिन्नहनि पुंसा पुंनाम्ना नक्षत्रेण पुष्यादिना नक्षत्रेण चंद्रमा युक्तो भवति तदहस्तस्मिन्दि

राम

॥५२॥

११०७

॥ आणिचरलका ॥ दर्शितानि। हस्ता [illegible] पुनर्वसुमृगशिरः पुष्याणीति। अनुराधापि पुंनक्षत्र ४

नेगर्भिणीमुपवासस्य ग्रन्नाशयित्वाग्नास्नातामस्नापयित्वा अहतेवाससी परिधाप्य च न्यग्रोधावरोहस्त
स्यावरोहान् अग्रवग्रधः रोहतीति तथा तान् ऊर्ध्वांकुरान् संनिधाना दृष्टस्येवचकारः समुच्चयेहिरण्य
गर्भो अग्रः समवर्तत इत्येताभ्यामृग्भ्यां॥ हिरण्यगर्भो अग्रः समवर्तत इत्येताभ्यामासिंचमाने समुच्चिताभ्यामासि
चनं प्राघ्रोति तन्मान्नदिति पत्नीः इक्ष्यते एताभ्याप पान्त ताभ्यां प्रत्युच मासे च नमिति चर्त पत्नाः पुन्नक्ष
त्रं। अत्र राधान्क विषावर्द्धयंत इति श्रुतेः। ज्योतिःशास्त्र एवं॥ ॥कुशाकंटकरं सोमारं मंचैवके॥ ॥
कुशाकंटकं कुशामूलं सोमलतारवं उच पिष्टमाणे पुन्न न्यग्रोधावरोहमंगेषु प्राह्य पंत्येके आचार्याः। अत्र
स्मिन्पक्षे ऽन्यच्च नुष्टुपस्य पेषणं एकग्रहणाद्विकल्पः कामपमाह॥ ॥कूर्मपित्तं चोपस्थे कृत्वा सप
दिकामयेत वीर्यवान्स्यादिति विकृसै नमन्त्रिमंत्र्यते सुपर्णोसीति प्राग्विष्णुक्रमेभ्यः॥ ॥सच्चत्र्या
दिकामयेत अयं गर्भो वीर्यवान्स्यादिति मान्भक्तुतेदरा पस्यात्रिया उपस्थे उत्संगे मंके उदकपूर्णे शरा
वे निधाय मृत्स्नाविकृताविकृति ... या ऋचा एनं गर्भिण्या अभिमंत्र्यते र्चि एणाउदरं विकृत्वा

ग

॥ गर्भा॥

नामिकयाग्रेणस्पृशति॥ लोकपि त्वा वाम त्रं पृष्ठ तीलपर्यंतमुलं कामायनेनस्पृशत्स्वनामिकाग्रेणद्वाविंश
लोकप अपि॥ अनुमंत्रणीयं सर्वेत्र सदैवमनुमंत्रयेदिति॥ आचिमंत्रणानुमंत्रणयोर्नकश्चिद्दोषः॥ वि
कृते रूपमसि सुचादा हस्तु पर्णोसीति प्राग्विंशुक्रमेण्वः सुपर्णोसि गरुत्मानिति सानस्मा विष्णुक्रममंत्रेण्वः॥ प्रा
क् पूर्वे विक्रुतेः परिमाणमित्यर्थः॥ ॥ इति संस्कारहृं॰ गदाधरकृते गृह्यसूत्रभाष्ये चतुर्दशी कंडिका॥१४॥
॥ अथ पुंसवनक्रमः॥ गर्भमासप्रभृति द्वितीये तृतीये वा मासि अरिक्तादितिथौ पुष्यादिपुंनक्षत्रे सोमबु
धगुरुवासरेषु घिष्ण्यादि दोषरहिते दैवज्ञोक्तकाले पुंसवनं कुर्यात्॥ अत्र निपतकाले त्वतो गुरुशुक्रा
स्तबाल्यवार्धकमलमासादि दोषापि न दोषा दोषरहितकालालाभे। तदुक्तविहितकालालाभेनतु शु
क्रास्तादौ न कार्यं कालातिक्रमे तु सीमंतदिने कार्यं तन्मे दिवसे स्वस्तिवाचनगृह्यप्रज्ञान्दुदपिका
निकत्वादेवाकालेस्मृत्वा ऽस्यां चापायामुत्पत्तस्मान्नस्य गर्भस्य बैजिकगार्भिकदोषपरि॥

ल

राम

॥ धर॥
॥११४॥

रक्षूपतां ज्ञानोदयप्रातरोधिपरिहारद्वारा परमेश्वरप्रीत्यर्थं पुंसवनं करिष्य इति संकल्पः ॥ ततस्मिन्न
हनि गर्भिणीमुपवासं कारयित्वा तां स्नापयित्वाहते वाससी परिधाप्य रात्रौ न्यग्रोधावरोहं गानांउदके
न सह पेषणं ॥ ततो गर्भिणीमुपवेश्य तदुदकं स्वपाविकं दक्षिणस्यां नासिकायामासिंचति ॥ हिरण्यगर्भः
समवर्त्तताग्रे ऋक्ष्य: संच्वत इति ऋच्चा ॥ पद्धिकामप्येतमेवान्स्पार्थं पंगर्भस्तदस्याउत्संगेउदरे चाराबंनि
धाय सुपर्णोसीत्यनेन द्विंगछः स्वःपते स्पते नतं गर्भमभिमंत्रयते ॥ इति पदार्थक्रमो गर्गमतेनात्र वि
शेषः ॥ १४ ॥ अथ सीमंतोन्नयनं ॥ ॥ व्याख्यास्यत इति सूत्रशेषः ॥ सीमंतोन्नयनमिति वक्ष्यमाण
संस्कारकर्मणो नामधेयं ॥ गर्भसंस्कारविकीपमाणत्वात्तदन्वाचेर्थो र्भसंस्कारमिति केचिदाचार्या पाध्यायपक्ष भा का ऋ
॥ अतस्तेषां मते प्रतिगर्भं क्रिया ॥ तथा च हेमाद्रौ कारिकायां च विष्णुवचनं ॥ सीमंतोन्नयनं कर्म गर्भ
संस्कार इष्यते ॥ केचित्तु गर्भसंस्काराः ॥ हन्नैगर्भं प्रपुजन इति स्त्री संस्कार एवायमित्यन्ये ॥ तथा च देवलः ॥
सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृतेति ॥ हारीतोपि ॥ सकृत्संस्कृतसंस्काराः सीमंतेन द्विजस्त्रियः

न्यगर्भे प्रसूयंते स सर्वः संस्कृतो भवेदिति॥ ॥पुंसवनवत्॥ ॥अनेन पदद्वयेन पुंसा नक्षत्रे एव चेदस
सौ योगस्तदैकरूप्यवाच्या म्लाय्या कृते वा समीपपरिधाप्येति लभ्यते न तु सर्वमिति कर्कः॥ पुंसवनमिति पदद्वयं
पुंसा नक्षत्रे एवं इमायुक्तेन त्वदहरित्यपि इति गर्भोपज्ञा॥ ॥प्रथमगर्भे॥ एतत्सीमंतोन्नयनं प्रथमगर्भे एवमन्य
द्यगर्भे न भवति॥ आपस्तंबः॥ सीमंतोन्नयनं प्रथमगर्भे चतुर्थे मासीति॥ सांख्यायनगृह्ये। सप्तमे मासि
प्रथमगर्भे सीमंतोन्नयनमिति॥ आश्वलायनगृह्यपरिशिष्टे॥ प्रथमगर्भे सीमंतोन्नयनसंस्कारो
गर्भमात्रसंस्कार इति। कर्कोपाध्यायैस्तु प्रथमगर्भे मासे षष्ठेऽष्टमे वेति सूत्रे षोडशादि त्वादि
ष्वनियमः स्मृतः॥ ननु प्रथमगर्भ एव सीमंतोन्नयने क्रियमाणे द्वितीयादिगर्भाणां तत्संस्कारलोपः
स्यादिति चेत् मैवं यं यं गर्भं प्रसूयंते स सर्वः संस्कृतो भवेदिति हारीतवचनात् घर्मगर्भे संस्कारे कृते स
र्वगर्भाणां संस्कार इति। न संस्कारलोपः॥ अकृतसीमंतावाः प्रसवे सत्यवृतो को विशेषः त्रीपदा अकृत
सीमंता प्रसवे तु कथं वचनात् गृहीतपुत्राविधिवत्पुनः संस्कारमर्हतीति॥ मासे षष्ठेऽष्टमे वा॥ ॥ सी

राम

१४५२॥
१२०॥

मंतो न्नयनं गर्भधारणात्सप्ते मासि ग्रष्टमे वा नवति॥ ॥तिलमु[illegible]द्गमिश्रः स्थालीपाकः सूर्पवि
त्वा प्रजापते हुत्वा पश्चादग्नेर्भद्रपीठउपविष्टायां युग्मेन सटालुग्रप्सेनौदुंबरेण त्रिभिश्च दर्भपिंजूलैस्त्रेण्या
शलल्या वीरतरशंकुना पूर्णचात्रेण च सीमंतमूर्ध्वं विनयति भूर्भुवः स्वरिति॥ ॥तिलमुद्गानां स्थाली
पाके मिश्रणमात्रं न तत्र धान्यमिश्रणपदे ज्ञातः॥ प्रयोजनं चोन्नयने उपेत्येव त्वा गोपितं इति रिक्त
सोवति लैमुद्गैस्व मिश्रस्तिलमुद्गमिश्रस्तं चरुं श्रपयित्वा ग्न्यायागानंतरं प्रजापतये स्थालीपाके
नैकामाहुतिं हुत्वा स्थालीपाके नैव स्विष्टकृदाहुतिं हुत्वा दक्षिणादानांतेकृत्वा पश्चादग्नेर्भद्रपी
ठउपविष्टायां ग्नेः पश्चिमतः चतुर्दक्षिणतः भद्रपीठे ग्नासीनायां गर्भिण्यां सत्यां युग्मेनौदुंबर
वृक्षोद्भवाद्युग्मकालवता सटालुग्रप्सेन ग्रपक्वापल्लस्तक निबद्धेन सटालु मिति ग्रपक्वफल
नामाख्या॥ ग्रप्रसस्तबकसंघातः युग्मानि एकस्तबकानि। ग्रौदुंबरफलानि तेन त्रिभिर्दर्भपिंजूलैः
त्रेण्या शलल्या त्रिषु स्थानेषु श्वेतया शलल्या पद्मकंटकेन वीरतरशंकुना ग्राम्यस्त्येन शंकुना

॥ ८६ ॥

पूर्णचात्रेणचसूत्रकर्त्तनसाधनकृतो लोहकीलकस्तर्कुरपरपर्यायस्तत्रंतेनसूत्रपूर्णेनचावकारस्त्रौ
दुंबरफलस्तबकादिरत्रयंबकसमुच्चयार्थः ॥ अतोत्रयंपंचकेनाशिखायाः सीमंते मूर्ध्वं विनयतिकेशाल्लला
टयोः संधिमारभ्य ऊर्ध्वं केशान् पृथक् करोति द्वि [illegible]
धा करोति मंत्रैर्भूर्भुवः स्वरिति मंत्रेण सीमंतनाद्यासाख्यातोऽभिधानगृह्ये ॥ सीमंतकल्प्यते ॥ त्रीणि के
शा मध्ये तु पृष्ठ्ठतिरितिसाकांक्षत्वाद्विनयामीत्यध्याहारः ॥ पश्चादग्नेर्मंडपीठस्थस्यैव मादिकमंतिच
बतिग्राग्रागंतुकत्वात् ॥ मंडपीठत्राद्यो गोमयपीठं वनुरस्रं प्रसिद्ध इति चेत् यस्रः वीरतर शंकुः शर
इति जयरामः ॥ अश्वत्थस्य शंकुः शरेषीका वेति हरिहरकारिकाकारो ॥ अश्वत्थस्य शंकुरिति कर्कः ॥ खादि
रः शंकुरित्यपर इति गर्गपद्धतौ ॥ ॥ प्रतिमहाव्याहृतिभिर्वा ॥ ॥ विनयेत् सीमंतस्य कार्थमि
त्यर्थः ॥ वात्रा वेति विकल्पार्थः ॥ अत्रापि विनयामीत्यध्याहारः ॥ तेषां वां भूः विनयामि ॥ भुवः विनयामि ॥ स्वः विन
यामि ॥ त्रिवृतमावध्नात्ययमूर्जावतो वृक्ष ऊर्जीव फलिनी भवेति ॥ ॥ त्रिभिर्वर्त्यते ग्रथ्यते

राम

॥ ग ॥
॥ ३२ ॥

प्य

इति त्रिवृद्धेणीतो प्रतितत्त्वैव गौरुंबरादि पुंजमावध्नाति। नर्त्ता। अयमजीवत इति मंत्रेण मंत्रार्थः। हे सो
मेति निपातो ऽयमजीवात्र इत्येतदिति शेषः॥ अस्य चो जीवतो वत्सस्य ऊर्ज्जीवः सफल त्वार्वे फलिनी भवतु
॥ ॥ अथाह वीणागाथिनो राजानं संगायेतां यो वान्यो वीरतर इति॥ ॥ अथ वेणाबंधनानं
तरं वीणां गृहीत्वा गाथा गाथिनौ प्रति कर्त्ता वीणागाथिनौ राजानं संगायेतामिति प्रैषमाह। तत अतो ब्रा
ह्मणो वेव वीणागाथिनौ राजसंबंधि सोत्साहे गायतः अन्यो वा पः कश्चिद्वीरतरः अतिशूरः तल्ला

प्य

दितं स संगायेतामिति। आत्मनेपदमार्षं एकैव गेयेति विकल्पः॥ नियुक्तमप्येके गाथ्यामपोद्धरंति सोम

४ नो

एव राजेमा मानुषीः प्रजाः। अविमुक्तं आसीरं स्तीरे तुभ्यमसाविति॥ ॥ एके आचार्या नियुक्ता गानेविधि
नां गाथानां मंत्रे सोम एव नो राजेति उद्धरंति॥ समीप गायंति॥ एके नेति अत्रास्य विकल्पः॥ आपिसमु
च्चयार्थः। ततश्च गाथानामानपक्षे राजसंबंधि वीरतरसंबंधि वा गा नगाथा गानेऽवद्ध पंचभवति। केषांचि
न्मते राज वीरतरयोरन्यतर गानं गाथा गाने वा पद्धतिकारमते राज वीरतर गाथा नाम न्यतमस्यज्ञा

चकै४

गृ०
१३१

॥ अत्र सावित्र च नामादेशः॥ गाथागानमाह वीणागाथिनौ कुरुतः॥ मंत्रार्थः सोम एव नोऽस्माकं प्र
जानां राजा प्रभुः॥ अत इमाः प्रजा मानुषीर्मानुष्यः सोम्याः॥ हे गंगादिनदि तुभ्यं तव सोमरूपायास्तीरे
आसीरन् त्वामाश्रित्यास्थिताः॥ किंभूते तीरे अविमुक्तप्रतिचक्रे। अनुभ्रु तस्मात्त्वं। अतीतेनैव दृष्टोपातव्या
इत्यर्थः॥ यां नदीमुपावसिता भवति तस्या नाम गृह्णाति॥ ॥ अत्र सावित्रस्य चर्चासिमंतिनी यां नदीमुपसमी
पे आवसिता स्थिता भवति तस्या नद्यः गाथागानकर्त्री गंगे यमुने इत्येवं नाम गृह्णाति॥ ॥ ततो ब्राह्म
णभोजनं॥ ॥ व्याख्यातान्येव तत्र। अत्र भोजने प्रायश्चित्तमुक्तं पाराशरमाधवीये षोमयेन। ब्राह्मणो
द्वेनैव सोमे च सीमंतोन्नयने तथा॥ जातकर्मनवश्राद्धे भुक्त्वा चांद्रायणं चरेत॥ इदं च कर्म गर्भसंस्कारत्वा
त्प्रतिगर्भं न विषयं न वित्रि कुर्वादितो न विषयमिति मुरारिमिश्राः॥ ॥ इति सं० गदाधरकृते गृह्य
सूत्रभाष्ये प्रथमकांडे पंचदशी कंडिका॥ १५॥ सीमंतोन्नयनेऽपर्याप्तक्रमः॥ तत्र गर्भमासापेक्षयाप
कृष्णे मेवा मासि अत्र संभवे यावत्समवे उत्तरपदे पुनर्वसुपुष्याश्विनी जिते हस्तप्रोष्ठपदानुराधाश्विनी

शुभ

राम

१४५
११३

श्री

मूलश्रवणरेवतीरोहिणीमृगशिरसंज्ञकानां पुंनक्षत्राणां चतुर्थीविक्तकानां मध्यमपादद्वये षष्ठ्यष्टमी
द्वादशी चतुर्दशी नवमी चतुर्दशी अमावास्या व्यतिरिक्ततिथौ सोमबुधबृहस्पतिशुक्रवारेषु चंद्रानुकूल्ये
विष्ट्यादिदोषाभावे शुभलग्नादौ कार्यं। अत्राप्यधिकमासगुरुशुक्रास्तादीनां न दोषः कालातिरासंनेवमू
र्द्धवन्निपतकालत्वात्॥ पुण्याहवाचनग्रहयज्ञान्युदपिकानि कृत्वा मंगलस्नातां परिहितप्रावृतां हतवामे
पुगलामलंकृतां पत्नीं स्वदक्षिणत उपवेश्य देशकालौ स्मृत्वा तनुरुधिरप्रियाचृतवाक्ये सीगणेद्दूर
लक्ष्मीसनक्षमसूकलसौभाग्यनिधानकृतमहालक्ष्मीसमावेशानद्वाराप्रतिगर्भबीजगर्भसमुद्भ
वैनोनिबर्हणेनं कृतिद्वारा च श्रीपरमेश्वरप्रीत्यर्थं स्त्रीसंस्काररूपं सीमंतोन्नयनाख्यं कर्मकरि
ष्य इति संकल्प्य कुर्यात्॥ ततो बहिःशालायां पंचभूसंस्कारान्कृत्वाग्नेः स्थापनं॥ वैकल्पिकावधारणं।
प्रतिमहाव्याहृतिभिर्विनयनां वीरतरस्यागानं। ततो ब्रह्मासनाद्याज्यभागांते विशेषः उपकल्पनीया
[illegible]तिलामुञ्जाः॥ मृदुपात्रे। उग्मान्यौदुंबरफलान्येकस्तबकनिषन्नानि। त्रीणि कुशापिंजूलानि

ए:।

॥१॥
॥गदा॥

श्रोणी शलली । वीरतरश्चांकुः । पूर्णं चात्रं । वीणागाथिनौ ॥ त्रैवर्णिकौ चेति । ब्राह्मणौ वीणागाथिनावित्ये-
गस्त्वे । पुंस्कगाथागानस्य विहितत्वाच्छूद्रस्य च तत्रानधिकारात् त्रैवर्णिकाविति वयं । अथ श्रपणकाले
स्थाल्यां मुद्गान्व्रीहीन्वाधिश्रित्य साईषच्छृते तेषु मुद्गेषु तिलतंडुलप्रक्षेपं कृत्वा पर्यग्निकरणादिकार्यं । आ-
ज्यभागांते स्थालीपाकेन प्रजापतये स्वाहेति होमः । ओं इदं प्रजापतये न ममेति त्यागः ॥ ततः स्थालीपा-
केन स्विष्टकृद्धोमः । ततो व्याहृतयः ॥ ततः प्राशनादिदक्षिणांतं ॥ ततोग्नेः पश्चात्प्राङ्मुखपीठोप-
विष्टायाः गर्भिण्याः औदुंबरादिभिः पूर्णं चात्रांतैः एकीकृतैः सीमंतमूर्ध्वं विनयति ॥ भूर्भुवः स्ववि-
नयामीति ॥ प्रतिमहाव्याहृति त्रिर्वा विनयनं ॥ भूः विनयामि । भुवः विनयामि । स्वः विनयामि । ततो न-
६ ग्नोऽयमूर्जावत इति औदुंबरादिपंचकं तस्याः वेण्यां बध्नाति । वीणागाथिनौ राजानं संगायेतामिति
ति प्रैषः । ततस्त्रैवर्णिकौ वीणागाथिनौ राजसंवर्णनं वीणागानं कुरुतः ॥ अपवान्नान लीदिस्तस्यागा-
नं तस्मिन्नदे तेनलादिकं संगायेतामिति प्रोषक्षति गर्गपद्धतौ ॥ निपुणकगाथा न वा तत्र सामगान

राम
ज्ञा२
॥धर॥
॥१२३॥

पश्चान्मद्रपीठनिधानं ततः [illegible] स्नापयित्वाऽहतेन वाससी परिधाप्य मद्रपीठ उपवेशयेत् । ततः औदुंबरा
दिपंचद्रव्यैर्गन्धि धूपाः सोमं ५

परिज्ञाने मंत्रमात्रे पठेतामिति प्रयोगरत्ने । तस्मिन्नद्वे प्रयोगात्माव इति गर्गपद्धतौ ॥ नियुक्तगाथागानेपि प्रैषं ॥
सोमं राजानं संगायेतामिति हरिहरः । नद्यानाम गृहणं गर्भिणी कर्तृकमिति तत्पद्धतौ ॥ ततो ब्राह्मण
भोजनं ॥ इति पद्धत्युपक्रमः ॥ ॥ अथ गर्गमते विशेषः ॥ अथासादने तंडुलानंतरं । तिलाः । मुक्ता ॥ मद्रपीठं
औदुंबरादि पंचकं । वीणागाथिनौ चेति । ग्रहणं स्थालीकृतं तंडुलानीति लमुकञ्चांमि स्रवणं । ग्रहणे प्रजाप
तये जुष्टं गृह्णामि ॥ प्रोक्षणे वा ॥ अथ जपना गाते प्रजापतये स्वाहेति स्थालीपाकस्य होमः । ततोग्नेः पश्चा
त्पिनयनं । विनुयामीत्यध्याहारः । ततः पादांगुष्ठेन सव्यमाक्रम्य मस्तकं यावत्सूत्र मीवा तेन वगुणे
कृत्वा तस्मिन्सूत्रे औदुंबरादि पंचकं बध्वा तस्यास्तनान्मे रूपदि यथा भवति तथा कंठे प्रतिमुंचते ॥ अ
यमूर्जावतो वृक्ष इत्यनेन मंत्रेण गानप्रैषः । राजेनागानं । नलादेवीगानं ॥ नलादिकं संगायेतामिति प्र
षः ॥ नियुक्तगाथागानं वा । नास्मिन्नद्वे प्रैषः ॥ अथासावित्यत्र गंगे [illegible] इत्येवं नाम गृह्णाति स्त्रवः ॥ ततः स्थि
रकरादि ब्राह्मणभोजनांतं । दक्षिणादानांते मद्रपीठं पुनरुपवेशनादिकार्यमिति वासुदेवः ॥ एतदुक्त

॥ ग॰ दा ॥

स्मूलमनो यथा कन्यानुष्ठेयमिति गर्गपद्धतौ ॥ इति गर्गमते विशेषः ॥ ॥ अथ गर्भिणीधर्माः ॥ कारिका
यां ॥ अंगारभस्मास्थिकपालचुल्लीमुसलादिके सूपविशेन्न नारी ॥ सोलूखलाद्येषु दृषदादिके वा यंत्रेषु धाय पे
नतपोपविष्टा ॥ नो मार्जनीगोमयपींडकादौ मूत्रं पुरीषं शयने च कुर्यात् ॥ नो मुक्तकेशी विवशा प्रवा
सा ह्युत्तेन संध्यावसरे न शेते ॥ नामंगलं वाक्यमुदीरयेत्सा मूत्रालये वृक्षतलेन यायात् ॥ प्रयोग पारिजा
ते ॥ गर्भिणी कुंजराश्वादि शैलहर्म्यादिरोहणं ॥ व्यायामं शीघ्रगमनं शकटारोहणं त्यजेत् ॥ शोकं रक्तावि
मोक्षं च साध्वसं कुक्कुटासनं ॥ व्यवायं च दिवास्वापं रात्रौ जागरणं त्यजेत् ॥ वराहः ॥ सामिषमद्यान्नं फलानाम्रमदाप
रि वर्जयेत् ॥ अतः प्रवृत्तिः ॥ याज्ञवल्क्यः ॥ दौहृदस्याप्रदानेन गर्भो दोषमवाप्नुयात् ॥ वैरूप्यं मरणं वापि तस्मा
त्कार्यं प्रियं पत्वाल्समदादि वर्जयेत् ॥ अत्र प्रवृत्तिः याज्ञवस्त्रियाः दोहदं गर्भिणीप्रियं ॥ मदनरत्ने ॥ हरि
द्रां कुंकुमं चैव सिंदूरं कज्जलं तथा ॥ कूर्पासकं च तांबूलं मंगल्याभरणं शुभं ॥ केशसंस्कारकबरीकंठकर्णवि
भूषणं ॥ भर्तुरायुष्यमिच्छंती दूरयेद्गर्भिणी नहि ॥ बृहस्पतिः ॥ चतुर्थे मासि षष्ठे वाप्यष्टमे गर्भिणीप

राम

॥ ५२ ॥

॥ १२४ ॥

प

दा॥ या आनित्तं विवर्ज्यास्याद्दाषादेतु विशेषतः॥ ॥ अथ गर्भिणीपतिधर्माः॥ ॥ अथ लापनः॥ ॥ वप
नं मैथुनं तीर्थं वर्ज्यं गर्भिणीपतिः॥ श्राद्धं च सप्तमान्मासादूर्ध्वं वान्यत्र वेदवित्॥ श्राद्धं कृतं भोजनमिति प्रयोगपा
रिजाते॥ र[illegible]लसंग्रहे॥ दहनं वप[illegible]नं [illegible] ये वै चौलं वै गिरिदो
हणं॥ नावमारोहणं चैव वर्जयेद्गर्भिणीपतिः॥ प्रथमे गर्भे पतिरधियाने मृतस्य वाहं दूरकर्मसंगमिति तत्त्वे
वा कुं[illegible] नकुर्यात्पादलेखनं राईनान्वपः॥ मुहूर्त्तदीपिकायां॥ क्षौरं शवानुगमनं नखकृंतनं च युद्धादि वास्तुक
रणं त्वतिदूरयानमिति॥ नौ नवे दिति शेषः॥ इति गर्भिणीपतिधर्माः॥ ॥ इति श्रीसंस्कारगदाधरकृते
सीमंतोन्नयनपद्धतिक्रमः॥ ॥ सोष्यंतीमद्भिरभ्युक्षेत्येजतु दशमास्य इति प्राग्यस्येत इति॥ ॥ सूत्र प्रा
णे गर्भविमोचने॥ गर्भविमुंचनीं विजननयंतीं प्रसवकाले मलादि प्रसववेदनान्वितां स्त्रियं मंत्रेणाएजतु
दशमास्य इति मंत्रेण स्त्रजरायुणा सहेत्यंतेनाद्भिरभ्युक्षति॥ उदके न प्रसिंचति॥ जरायुणा सहेत्यत्र प
रिसमाप्तत्वाद्वाक्यस्य प्राग्यस्येत इत्यस्यु चाते॥ नह्यत्र पादेनापूर्वीतत्त्वापः करणं तरे पारात्॥ अत्र श्रौतो

री

॥मा०॥

वशेषः॥सोष्यंती नृश्चिरन्सुञ्चतियथावातःपुष्करिणींरंसमाजमयतिसर्वतइत्यादि॥अथावरापतनमवेतु
एष्किः शैवलरंस्नुनेजराय्य वक्त्रवेनेवमारंसेनपीवरीनकस्मिंश्चनापतेमवज्जरायुपद्यतामिति॥ ॥अ
पास्नुद्दरणंनेतरंअवरावपतनसंज्ञकंमंत्रंजपतीत्यध्याहारः॥अवरोजरायुविशेषः।तस्यअवअधः
पतनंपतनहेतुंअवेत्विनितिमंत्रंजपतिपिता।मंत्रार्थः।हेसोष्यंतितवजरायुअवअधः।एतुगच्छतु।यथापततिवि
सर्पः।किंभूतं।एष्किनानारूपं।शैवलंपिचुलंजालेपचितेवा॥किमपि॥स्नुनेस्थानमुपकर्तुं।यद्वा
स्नुनेइतिषष्ठ्यर्थेचतुर्थी।स्नुनः।अस्तेवाचक्त्रयणपाहेपीवरिपुत्रादिगर्भधारणेनसुपुष्टयणानितिजरा
युमासेनगर्भेपयकावयवेनसहआयातंसंबद्धंविस्तृतंवा॥अधः।नैवपद्यतांपततु।नचकस्मिंश्चनम
र्मणिपिपद्यतांनिमित्रेसत्यंपाति॥ ॥जातस्यकुमारस्याच्छिन्नायांनाड्यांमेधाजननायुष्ये करोति॥ ॥
जातस्योत्पन्नस्यकुमारस्यवालस्याछिन्नायांनाड्यांअछिन्नेनोभिनालेपितामेधाजननायुष्येमे
धाजननेचआयुष्यंचमेधाजननायुष्येतेकरोति।कुमारग्रहणंस्त्रियाः।अतःप्रवृतिनक्रियतइ

राम

॥ख २॥
॥१२५॥

तिच्छाश्री। अत्र वसिष्ठः। श्रुत्वा जातं पिता पुत्रं सचैलं स्नानमाचरेत्॥ हेमाद्रौ। जन्मनोनंतरं कार्यं जातकर्म यथा
विधि। दैवादतीतकालं चेदतीते सूतके भवेत्। अत्र जातकर्म नाम कर्म। द्वादशकालातिक्रमेण त्र्यादिकं त्र
यं तत्प्रायश्चित्तं स्मृतिः॥ मुख्यकाले चेद्विधिस्तेन विधिष्वित्सः प्रमादतः। नक्षत्रतिथिलग्नानां विचार्यैवं पुनः पुनः॥
कार्यं जैमिनिः॥ प्राक्छेदाद्वै पुत्रपुण्यो ग्रहणे चैव द्रूस्थपयोः॥ स्नात्वानंतरमात्मीया [illegible] नित्तु स्नाध्ये
नतर्पयेत्॥ श्राद्धं चाचाभ्युदयिकमेव न स्वतंत्रं॥ अत्र श्राद्धमामेन हेम्ना वा कार्यमित्युक्तं॥ पृथ्वीचंद्रोदये जा
तश्राद्धे न दद्यात्पक्वान्नं ब्राह्मणेष्वपीति। हेमाद्रौ तु। पुत्रजन्मनि कुर्वीत श्राद्धं हेम्नैव बुद्धिमान्। न पक्वेन न
चामेन कल्याणं तत्रिकामयपात्रीति संवर्तोक्तेर्हेम्नैवेत्युक्तं। संवर्तः॥ जाते पुत्रे पितुः स्नानं सचैलं तु विधीय
ते इति॥ एतच्च स्नानं रात्रावपि भवति। नैमित्तिकत्वात्॥ यदाह व्यासः॥ रात्रौ स्नानं न कुर्वीत दानं चैव विशे
षतः। नैमित्तिकं तु कुर्वीत स्नानं दानं च रात्रिषु॥ इति। नैमित्तिकदानान्यपि स एवाह॥ ग्रहणोद्वाहसंक्रांतियात्
र्त्तिप्रसवेषु च॥ दानं नैमित्तिकं ज्ञेयं रात्रावपि न दुष्यतीति। जैमिनिः॥ यावन्न छिद्यते नालं तावन्नाप्नोति

॥८८॥

तकच्छिन्नेनाले ततः पश्चात्सूतकं तु विधीयते॥ हेमाद्रौ दानकांडे॥ यावत्कालं सुते जाते तेन नाडी छिद्यते नृपा
चंद्रसूर्योपरागे एतमाहुः समयं समं॥ विष्णुधर्मोत्तरे॥ अछिन्ननाड्यां यद्दत्तं पुत्रे जाते द्विजोत्तमाः॥ संस्कारे
षु च पुत्रस्य तदक्षय्यमुदाहृतं॥ प्रतिग्रहश्च नाभिवर्धनात्पूर्वं तद्दहवैविति मदनपारिजाते॥ [illegible]
नयाच शंखः॥ कुमारप्रसवे नाभ्यामछिन्नायां गुडतिलहिरण्यवस्त्रगोधान्यप्रतिगृह्य दोषस्तदहस्त्वेके
कुर्वत इति॥ एतच्चजनना शौचे चेच्च कार्यमित्याह प्रजापतिः॥ आशौचे च समुत्पन्ने पुत्रजन्म यदा भवेत्॥
कर्तुस्तात्कालिकी शुद्धिः पूर्वाशौचेन शुध्यति॥ मदनपारिजातेप्येवं॥ केचित्तु मृताशौचस्य मध्ये तु पुत्र
जन्म यदा भवेत॥ आशौचापगमे कार्यं जातकर्म यथाविधीति स्मृतिसंग्रहोक्तेराशौचांते कार्यमित्याहुः॥

राम

स्मृत्यर्थसारे विकल्प उक्तः कारिकायां॥ जाते पुत्रे सचैलं स्यात्स्नानं नैमित्तिकं पितुः॥ तच्च शीतेन रात्राव
प्येवं नाबालिरब्रवीत॥ दिवाहृतेन तोयेन स्नापयेत्स्वर्णयुतेन तु॥ इति सांख्यायनः प्राह रात्रावनलसं
निधौ॥ अछिन्ननौं कर्त्तव्यं श्राद्धं स्नानादनंतरं॥ आमद्रव्येण तत्कार्यं वचनात्तु प्रजापतेः॥ हिरण्येनन्न

ल्यां

॥५२॥
॥१२६॥

वेधश्रीदं श्रामद्रव्यं गृहेन चेत् ॥ इति व्यासवचः प्रोक्तं पञ्चानां संनिषिद्धमिति ॥ अत्रामं हि गुणं नो उक्तं हिरण्येन च
तुर्गुणमिति ॥ व्यासः ॥ पुत्रजन्मनि यात्रायां शर्वर्यां दत्तमक्षयमिति । मेधाजननमाह ॥ ॥ अनामि
कया सुवर्णान्तर्हितया मधुघृते प्राशयति घृतं वा भूस्त्वयि दधामि भुवस्त्वयि दधामि स्वस्त्वयि दधामि ॥ भू
र्भुवः स्वस्त्वयि दधामीति । सुवर्णेनान्तर्हितया सुवर्णेनाच्छादितया अनामिकया गुल्या मधु च घृतं च मधुघृ
ते एकीकृते कुमारं प्राशयति ॥ घृतं वा अत्र भूस्त्वयि दधामीत्यादि सर्वं त्वयि दधामीत्येतेन मंत्रेण प्रति
वाक्यं प्राशयतीति कौरवित ॥ माध्यंदिनश्रुतौ विशेषो जातोग्निमुपसमाधायांक आधाय कंसे पृ
षदाज्यस्योपघातं जुहोतीत्युपक्रम्य अथास्यायुष्यं करोति दक्षिणं कर्णमभिनिधाय वाग्वागिति त्रिर
थास्य नाम दध्यौ करोति वेदोसीति तदस्य तद्गुह्यमेव नाम स्यादथ दधि मधु घृतं संसृज्य ज्ञानेन तर्हि तेन जात
श्रा२ रूपेण प्राशयतीत्यन्ताः । जातरूपेण हिरण्येन प्राशयेत्तैर्मंत्रैः प्रत्येकमिति वासुदेवप्रकाशिकायां ॥
यदि च मेधाजननं स्वकाले दैवान्मानुषापराधाद्वा न जातं तदा कालातीते न भवति ॥ नियतकालत्वात् ॥

पुष्मतं करोमि ब्रह्म आयुष्मत्तद्ब्राह्मणै...

॥मदा॥

तथा त्र्यायुषं ते। तस्मात्कुमारं जातं घृतं वै वाग्रे प्रतिलेहयंति स्तनं वानुधापयंतीति॥ अथ सर्पिः कृतेः तस्मा
त्कुमारं तं जातं बालं घृतं चैव वर्णिकाजातकर्मणि जातरूपसहितं प्रतिलेहयंति प्राशयंति स्तनं वानुधापयं
ति॥ पश्चात्पाययंतीति॥ अपीतस्तु नस्येत् तदिति गम्यते॥ आयुष्यकरणमाह॥ अथायुष्यं करोति नाभ्यां
दक्षिणे वा कर्णे जपत्यग्निरायुष्मान्स वनस्पतिभिरायुष्मांस्तेन त्वायुषायुष्मंतं करोमि सोम आयुष्मा
स्ते मृते नायुष्मंतस्तेन त्वायुषायुष्मंतं करोमि ऋषय आयुष्मंतस्ते व्रतैरायुष्मंतस्तेन त्वायुषायुष्मंतं करोमि
पितर आयुष्मंतस्ते स्वधाभिरायुष्मंतस्तेन त्वायुषायुष्मंतं करोमि यज्ञ आयुष्मान्स दक्षिणाभिरायुष्मां
स्तेन त्वायुषायुष्मंतं करोमि समुद्र आयुष्मान्स स्रवंतीभिरायुष्मांस्तेन त्वायुषायुष्मंतं करोमि त्रिः॥ ॥
अथ मेधाजननोऽनंतरस्य शिशोः आयुष्यनामकं कर्म आयुषे हितं आयुष्यं कर्मेति॥ नाभ्यामिति
अधिकरणसप्तम्यंता वा त्समीपसप्तमी यं पापागंगायां घोषस्तेन पिता बालकनाभेः कर्णस्य वा समी
पेस्थित्वा अग्निरायुष्मांनित्याद्येमंत्रान् [illegible] मंत्राष्टौ॥ अग्निः कारणात्मना

राम

क ३

॥ध२॥
॥१२॥

अपुष्पा नास्ति। स च वनस्पतीभिः। ६ ध्मसमिद्भिः॥ ६ए अपु [illegible] ष्पत्वहेतुर्भवति। वनस्पतीभिः कल्पावा। ते
न अपुष्पा तासां अपुष्पत्वं तं [illegible] निर्देष्टदीर्घापुष्पं करोमि इति वाक्यार्थ उत्तरत्रापि संबध्यते। एवं सो
मोपि व्याख्येयः। स च ओषधीभिः॥ संघिरार्ष॥ २॥ वृक्षैर्वेदः॥ वृक्षैरोरण्येत्यभिः किं वा गम्यते न सुधया॥ ४ अक्
षयो वृते: कृष्णादिभिः॥ ५ पितरः स्वधाभिः। पितृपयस्वधोच्यते। ६ पक्षी दक्षिणाभिः परिक्रमपक्षैः॥ ७॥ समुद्रः
स्रवंतीभिः नदीभिरित्येतावान् विशेषः॥ ॥ अपुष्पमिति च॥ अपुष्पं जमदग्नेरिति मंत्रं चैकरात्रिं जपति
ना न्यां दक्षिणा वा कर्णपदि देवान्यानुषाद्वापेवा रात्मे घाजनने स्वकालेन कृतं तपापा पुष्पक रणे का
लांतरे त्वेव त्वेव॥ ॥ स यदि कामयेत सर्वमायुरियादिति वात्सप्रेणैनमभिमृशेत्। संस्कारकर्मोपदि का
मयेत ग्रसंर्वसंपूर्णे ज्ञातं वर्षमायुज्जीवितमिया त्त्र दावात्सप्रेणैतमभिमृशेत्। वात्सप्रेन दात्से रायः किं दिव
स्परीत्येतेन वात्सप्रेणा किमुपपन्नं तो ग्रे ध्वरमिति एतेनेति संज्ञापनिबंधनमाह॥ ॥ दिवस्परीत्येतस्यानु
वाकस्योत्तमामृचं परिशिनष्टि। दिवस्परि प्रथमं जज्ञे इत्येतस्यानुवाकस्योत्तमामृचं अस्ता वाग्निरित्येतां

९ प्या
यं

॥गद॥

पारे शोषयित्वावर्जयित्वाऽवशिष्टं वात्सप्रमुच्यते ॥ यत एकादशास्तु मन्त्रं वात्सप्रशब्दः प्रसिद्धः ॥ अपवात्सप्रेणाभि
मृशतु इति प्रकृत्य नवति वात्सप्रशाखोपयत्निगुपूर्वदेकाशीतेनेति ॥ वात्सप्रद्वयस ञ्ज्ञावोपश्चाग्निप्रकरणस्य
ण्वात्सप्रग्रह एवं वाक्यशेषात् ॥ तस्माद्यं जातं कामयेत सर्वमायुरियादिति वात्सप्रेणैनमभिमृशेदिति ॥ ॥
प्रतिदिशं पंच ब्राह्मणान् अवस्थाप्य ब्रूयादिममनुप्राणितेति पूर्वो ब्रूयात्प्राणेति व्यानेति दक्षिणोऽपानेत्यपर उदा
नेत्युत्तरः समानेति पंचम उपरिष्टादवेक्षमाणो ब्रूयात् ॥ ततः संस्कारकर्ता कुमारस्य प्रतिदिशं प्राच्या
दिषु चतसृषु दिक्षु मध्ये च एवं पंच ब्राह्मणान् अवस्थाप्य स्थापयित्वा तान्ब्रूति इममनुप्राणितेति प्रेषं ब्रूया
त् ॥ ततस्ते प्रेषिताः पूर्वादिक्रमेण कुमारं लक्षीकृत्य प्राणेति पूर्वो ब्रूयात् ॥ व्यानेति दक्षिणः ॥ अपानेति
पश्चिमः ॥ उदानेत्युत्तरः ॥ समानेति पंचम उपरिष्टाद्बालकं अवेक्षमाणो ब्रूयात् ॥ तस्मात्तु त्वं जातमकं
तेनाग्निं पंचब्राह्मणान् ब्रूयादित्येनमनुप्राणितेति श्रुतत्वात् ॥ मंत्रार्थः ॥ इमं कुमारं अनुलक्षीकृत्य हे ब्रा
ह्मणा अनुप्राणित यूयं पंच सर्वे प्राणादिपंचवायुकं कृत्वा दीर्घायुष्येनायुष्मंतं कुरुत । कोष्ठस्थितो वायुर्मुखे

राम

॥पं२॥
॥१२८॥

स

नासिकाभ्यां निःसरन् प्राणः पुनस्तेनैव मार्गेणान्तः प्रविशन्नपानः। प्राणो रेचकः। अपानः पूरकः तयोर्वि
ष्टंभः संधिसंधानं व्यानः। कुंभकरूपः। उन्नमनादिरूढ्वगतिरुदानं देहस्थितस्याशितपीतस्यान्नरसस्य
सर्वांगेषु समनयनात्समानः॥ ॥ स्वयं वा कुर्यादनुपरिक्राममविद्यमानेष्वविद्यमानेषु ब्राह्मणेषु स्व
यमेव पिता अनुप्राणने कुर्यादनुपरिक्रामं पूर्वादिकां दिशां परिक्रम्य। एतां न विंदेदपि स्वयमेवावपरिक्राम
मनुप्राणयादिति स्मृतत्वात्॥ अस्मिन्पक्षे हेरममनुप्राणितेति प्रैषनिवृत्तिः॥ स्यात्मनि स्वकर्तृके प्रेरणाभावा
त्॥ ॥ स यदि कन्ये जातो भवति तमभिमंत्रयते वेद ते भूमिं हृदयं दिवि चंद्रमसि श्रितं॥ वेदाहं तन्मां त
द्विद्यात् पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतमिति॥ ॥ स बालो यस्मिन्देशे
भागे जातो भवति॥ उत्पन्नो भवति तं देशमभिमंत्रयते वेद ते भूमिं हृदयमिति मंत्रेण हस्तेन स्पृशति। मं
त्रार्थः॥ हे भूमे। कुमारजन्मप्रदेशाः। ते तव हृदयं अंतःकरणं। भूमिर्वेदपत्र विषते गुप्तं। विसर्गाभावः। छां
दसः॥ किंभूतं। दिवि द्युलोके वर्तमाने चंद्रमसि श्रितं॥ कुमाराभावेन देवपत्नीरूपस्थानं॥ अस्मत्स्वजपांपगो

गो॰ ...
॥ नाद॥

पितं। तस्य देवशोपलक्षितं। तद्देतच्चंद्रमसि [illegible] कृष्णामावैश्यो वेन। तत्कर्मकृतमहं वेद ज्ञानामितत्कर्लेच्कृतं ए
वं पुनरूपकर्तृमाविद्याज्ञानात्। अतस्त्वद्दत्तपुत्रेण सह वयं प्रकृष्टमेमाणुकार्ये॥ ॥ अथैनमभिमृश्यात्य
श्माचव परशुर्भव हिरण्मयस्मातेनवा। आत्मा वै पुत्रनामासि सजीव शरदः शतमिति॥ अथैनं कुमारं पिता
ऽभिमृश्याति हस्तेन स्पृशन् समाच्यवेति मंत्रेण। हृदि स्पृशातीति जयरामः॥ मस्तकेरति कारिकायां। सर्व
शरीरेऽति हरिहरः। स्मृतिः। अथैनमभिमृश्यात्य श्मान्वपरशुर्भव हिरण्मयस्तृतं भवं ता॰ वात्स
प्राधेतदभिमंत्रो नोंतेकालातिक्रमेपिकर्मभवति संस्कार वातामेत्यर्थः। हे कुमार त्वं अश्मा पाषाण इ
वदृढः स्थिरश्च। परशुरिव वज्रइवापकर्तेनाशको भव। किंच। अश्रुतं अनभिभूतं॥ अप्रत्युतस्वरूप
मितिपावत॥ हिरण्यं हिरण्यवत्तेजोयुक्तस्त्वं गृहणीप्रश्न भव॥ यथा धात्वंतराभिश्रितं सुवर्णं शुद्धं भ
वति तथा त्वमपि रोगा॰ पद्रवेणहीनो भवेत्यर्थः॥ एतस्त्वं पुत्रनामाआत्मासि॥ देहः सन्नैवेनिश्चयेपुत्रे
ति संज्ञामात्रेणाभिन्नोसि॥ सत्वं शतं शरदो जीव॥ ॥ अथास्यमातरमभिमंत्रयते इडासि मैत्रावरुणी वी
त्र

राम

॥ घर॥
१९२५॥

रे वीरमजीजनथाः ॥ सा त्वं वीरवती भव यास्मान्वीरवतोऽकरदिति ॥ ॥ अथास्य कुमारस्य मातरं जननीमभि
मुखेन त्वामे त्यपते मंत्रस्यावर्तनेन संस्करोति इडासीति मंत्रेण । अथास्य मातरमभिमंत्रयते इडासि मैत्राव
रुणी तिश्रुतेः ॥ मंत्रार्थः ॥ हे वीरे वीरवति । पुत्रवती तियावत् ॥ त्वं इडा मानवी यज्ञपात्नीत द्वत त्वं वासि । मैत्रा
वरुणी मित्रावरुणयोरंशोत्पन्ना । यथा इडायां पुरूरवा उत्पन्ना ॥ यथा च यज्ञपात्नीतः तद्वेवा पुत्रोडा
वो भवति । तथा त्वमपि ताद्दृशाः स्वर्गादि साधनपराः ॥ पुत्रान्संवितन्निप्राय ॥ यतस्त्वं वीरं पुत्रं अजीजनथा अ
सोषीः ॥ अतः सा त्वं वीरवती पुत्रवती भव ॥ या त्वं मस्मान्वीरवतः पुत्रवतः पुत्रपुत्रो नु अकरत ॥ अकरोः ॥ कृतव
त्यसि ॥ ॥ अथास्यै दक्षिणं स्तनं प्रक्षाल्य प्रयच्छती मं स्तनमिति । ॥ अथास्यै अस्याः मातुर्दक्षिणं स्त
नं प्रक्षाल्य उदकेन क्षाल्य पिता वा पिता कुमाराय पानाय प्रयच्छति दद्याति ॥ इमं स्तनमिति मंत्रेण । अथ येन मात्रे
व्रपस्तनं प्रयच्छतीति श्रवणात् ॥ स्तनसमर्पणं चापी तस्तनस्य भवति ॥ यस्ते स्तन इत्युत्तरमंत्रस्य ॥ ॥
ततः पिता उत्तरं वामं स्तनं इमं स्तनं यस्ते स्तन इत्येताभ्यां मंत्राभ्यां प्रयच्छति कुमाराय स्तन्यं ॥ अत्र द्विवचनो

सा॰ ...नः द्विरस्तोनिदधासापोदेवेषु जागृय ... रस्तातकोयाः
१ १

...मंत्रो अग्नेर्देवता वैजयरामाचार्यावदंति। तथा कारिकायां। अत्र पोर्देवताग्निः स्यात् मंत्रोक्तः केचिदीरिता इति। प

॥१३०॥ पदेशादिमरं सपुत्रिकायाजागृयेति॥ एवं तथास्यां। सूतिकायां सूतिकापा हितेना गृपजागृतेतत्पर्यः॥ पुरुषव्रत

॥गृ॰ द॥ यम्छांदसः॥ किंपूतायां पुत्रादि संहितायां॥ ॥द्वारदेशे सूतिकाग्निमुपसमाधायोत्थानात्संधिवेलयोः फ

लीकरणमिश्रान्सर्षपानावाय पति शंडामर्का उपवीरः शौंडिकेय उलूखलः॥ मलिम्लुचो द्रोणश्च्यव

नो नश्यतादितः स्वाहा। आलिखन्निमिषः किंवदंत उपश्रुतिर्हर्यक्षः कुंभीशत्रुः पात्रपाणिर्नृमणिर्हंत्री

मुख सर्षपारुण श्च्यवनो नश्यतादितः स्वाहेति॥ ॥सूतिकागृहस्य द्वारदेशे पंचमसंस्कारान्तं यावत्सू

तिकाग्निमुपसमाधाय स्यापपितोत्थानात् आ उत्थानात् उत्थानं यावत् संधिवेलयोः सायंप्रातः फली

करणैः तंदुलकणैर्मिश्रान् पुंस्त्वान् सर्षपान् तस्मिन्नग्नौ आवपति प्रक्षिपति। शंडामर्का इति द्वाभ्यां मंत्राभ्यां॥

सूतिकाग्नेर्ग्रहणं आर सथ्याग्नि निवृत्यर्थमिति नन्दपत्ना॥ अत्र आवपनोपदेशात् होमानिकर्तव्यता न

भवति। एतच्च स्वकाले एव भवति। निपतकाले तोत्। मंत्रार्थः। शंडाः शौण्ड मर्काः मर्काः। तत्र ..णोतीति शं

डा बालग्रहाः स्वस्थानान्नश्यतात्॥ अपगच्छतु॥ अपंच वाक्यार्थ उत्तर ॥ आपि योद्रयः॥ मारयतीति म

राम

॥गृ॰ र॥

॥१३०॥

२ त्तिखनन्नयनः। आस्ते स आलिखन्। पराञ्चवितुमच्छित्रदृष्टिरनिमिषः॥ उपसमीक्ष्य आत्वा आपकर्णो। उपक्षतिर्हि यद्द्रो २
र्कः॥ उपघ्नो वीरः समर्थ्य उपवीरः विघ्नकुन्तालः। शौण्डिकेयः आश्रितपाक उल्खलः॥ अप्रतीकार्यो मलिनचा
आतिमलिना वायइत्सर्पः॥ दीर्घनासो ऽङ्गुणसः॥ ध्यावयंसंगानीतिच्यवनः॥ एते सर्वे मकृतावपनोपकृताः नीताग
पसर्वे वित्सर्थः॥ एवं आसमतौ चावेनौ॥ पिंगलेनयनः॥ कुंजपाते स्तेन प्रतीसेवं ज्ञालः कुंची। ज्ञातपतीति शत्रुः॥
पात्रहस्तः। पात्रपाणिः। नृम्निनो निहिनस्मातिनमणिः॥ हं त्रीहिंसा हननं मुखेयस्या सौ हंत्री मुखः। स
र्वपवदरुणः उग्रोघ्नसरोवासर्वपारुणः। व्यवपत्सने तिच्यवनः॥ येनोपकृतस्य भवति प्रकृतेः परिचं नृपती
त्सर्पः॥ [illegible]स्थानात्॥ न नृपतादिति सर्वपादानामेवमेवान्वयः॥ गणमन्त्रिप्रेत्याह किं वदंत इति एतेस
र्वे किं वदंतः किं वदरुणोपमित्सर्पः। यदि कुमार उपद्रवे ज्वालेन प्रष्टा घोत्तरीपे पवापितो कन्ना घाप
जयति॥ कुर्कुरः सुकूर्कुरः कूर्कुरो बालबंधनः। चेच्चेच्छुनकस्तजमज्जनमस्ते आस्तासी सरोल्पेतोप
करेतत्ससौंपत्ते सरमामातासीसरः पिताश्यामसबलौ च्रातरौ। चेच्चेच्छुनकस्तजनमस्ते आस्तसीस
सरोल्पेतापकरेत्स [illegible] निमज्ञातिननामपतिनरुदतिनहृष्यतिनालापतिपत्रवयं वहामो पत्रवाचि

जसेदेवा २

॥५२॥
॥गदी॥

अश्चाग्नसीति॥ कुमारश्चादे बालग्रहो ऽभिधीयते॥ सयदि एनं बालं उपश्रवेदिग्नयेत् ॥ तदा एनं बालं पिता जनको
जालेन प्रच्छाद्य प्रच्छाद्य पिता वा सोत्तरीयेण वा प्रच्छाद्य अंके उत्संगे निधाय कूर्कुर इति मंत्र त्रयं जपति॥ जपतेएनं
पिता निमन्त्रातिननामयतीति मंत्रेण॥ मंत्रार्थः॥ कूर्कुरो नीषण्णा रखो बालग्रहः॥ तथा कूर्कुरस्थाति नीषएः बा
लान्बध्नातीति बालबंधनः॥ कूर्कुरः कर्करा रखो बालग्रहः सीसरो गसानकेहे श्वुनका॥ तं ऊ एणं सृखा ल
पेतल्लापनरो धकेतिपावत॥ अपह्नर॥ गा आपहरका॥ दकौटि स्पे॥ तेतुभ्यं नमोस्तु॥ ततस्तृप्ते एनं कुमारंस्य
ज॥ मुंचा॥ किं कुर्वन्॥ चेच्चेता॥ छुछुः शब्दं कुर्वन्॥१॥ हे श्वुनक तल्लसत्वं॥ पत्तेतुभ्यं देवदत्तापेदेवावरमदन्दुः द
न्नवेतः सवत्वं हिंसाविहारः कुमारमेववावएणीयाः॥ वृतवानसीति॥ वोषउत्कार्षि॥२॥ हे श्वुनका॥ तल्ल
सं॥ पत्तेतेवसरमादेवश्वुनीमाता॥ सीसरदेवश्वपिता॥ अपामत्ता बल्लोवतवत्सातराविति॥ शिवुमुन्तार्थ
र ननामयतीसस्यार्थः॥ पत्रासित्कुमारेवयंवदामोमन्मः॥ साकोऽन्तत्वान्कंत्रांयत्रै ग्रानिमस्त्राम सिञ्च
च

सु

राम

॥५२॥
॥१२१॥

न्नितः स्यच्चोनं कुर्मः। सकुमारो न न्नामय त्वेगानि। गार्द्स्यर्य॥ इति श्रीसंस्कारहं गदाधरकृते प्रस्नवनाध्ये १६। अथ
पदार्थक्रमः॥ सोष्यंतीमद्भिरभ्युक्षत्येजतु दशमास्य इति॥ ततो वरीवपतनमंत्रजपः। अवैतु पृश्निरिति। ततो जा
तमात्रे पुत्रे पिता तस्य मुखं निरीक्ष्य नद्यादावुदङ्मुखः स्नात्वा अग्नेः संनवे दिवा हस्ताभ्यां शीताभिरद्भिः सुवर्णयुताभि
र्हण एव स्नात्वा वा मासितत्वे चंदनमाल्यादिनिरलंकृतो नालच्छेदात्पूर्वं सूतिकादिव्यतिरिक्तो रस्पृष्टमकृतस्नानपानं
प्रक्षालितमलं कुमारं मातुरुत्संगे प्राङ्मुखमुपस्थाप्य ब्राह्मणैः सह पुण्याहवाचनं कृत्वा देशकालौ संकीर्त्य ममा
स्य कुमारस्य गर्भांबुपानजनितसकलदोषनिबर्हणायुर्मेधाभिवृद्धिबीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्री
परमेश्वरप्रीत्यर्थं जातकर्म करिष्ये इति संकल्प्यान्युदयिकं श्राद्धं हिरण्येन कार्यं॥ तत एकस्मिन्पात्रे मधुघृ
ते मिश्रित्वा अनामिकया सुवर्णांतर्हितया प्राशयति कुमारं भूस्त्वयि दधामि भुवस्त्वयि दधामि स्वस्त्वयि दधा
मि भूर्भुवः स्वः सर्वं त्वयि दधामीति मंत्रेण॥ अथवा केवलं घृतं प्राशयति। इदमेधाजननं॥ ॥अथायुष्यक
रणं॥ तत्र बालकस्य नाभिसमीपे दक्षिणकर्णसमीपे वा अग्निरायुष्मानित्याद्यष्टौ मंत्राञ्जपेत॥

॥ग०६॥
॥गदो॥

अग्निरायुष्मान् ... नोमि। सोम आयुष्मान्। स ब्रह्मायुष्मत्। २ देवा आयु
... आयुष्मंतः। पितरः आयुष्मंतः। ५ यज्ञ आयुष्मान्। ६ समुद्र आयुष्मान्। ८
तस्मादायुषमितिच त्रिर्जपेत्। इत्यायुष्यकरणं। पिता यदि कामयेत अयं कुमारः सर्वमायुरियादिति दैर्घ्यकस्य
रीत्येकादशानि त्र्यगस्त्य जिमशेत॥ ततो बालस्य पूर्वादिदिक्ष्वत सृषु चतुरो ब्राह्मणाननेकं मध्ये वा वस्था
प्य इममनुप्राणितेति प्रैषः॥ ततः पूर्वदिक्स्थितः प्राणेति ब्रूयात्॥ व्यानेति दक्षिणः॥ अपानेत्यपरः॥ अनु
दानेत्युत्तरः॥ समानेति पंचम उपरिष्टादवेक्षमाणो ब्रूयात्॥ अविद्यमानेषु विप्रेषु स्वयमेवानुपरिक्रम्य
परिक्रम्य प्राणेत्यादि ब्रूयात्॥ नात्र प्रैषः॥ ततो जन्मभूमिमभिमंत्रयते वेद ते भूमीति॥ ततो बालमभिमंत्रयते अश्मेति
ततः कुमारमातरमभिमंत्रयते इडासि मैत्रावरुणीति॥ ततो मातुर्दक्षिणं स्तनं प्रक्षाल्य कुमाराय प्रयच्छति इमं
स्तनमिति॥ ततो यस्ते स्तन इति मंत्रावृत्त्या सव्यं स्तनं प्रयच्छति॥ कालातिक्रमे स्तनप्रदानात्प्राग्वा॥ अत्र कारि
का पीविशेषः॥ अत्रोदधात्सु वर्णवा ... मिं गां तं रंगरयं॥ ... त्रं छागं वस्त्रमाल्यं रायनं चासनं गृहं॥

राम

॥ग०प२॥
॥ग०१६२॥

धान्यं गुडतिलान्सर्पिरन्यद्वा स्तोम गृहे वसु ॥ आयांति पितरो देवा जाते पुत्रे गृहं प्रति। तस्मात्पुण्यतमः प्रोक्तोत्नार
तेत्यादि पर्वणि। अष्टांगुलं परित्यज्य नालच्छिदं धात्र्युरादिनेति॥ ततः सूतिकायाः स्वद्वाधस्तात्छिरप्रदेशे उदकपू
र्णपात्रं निधाय मापो देवेषु इति॥ ततः सूतिकागृहद्वारे पंचभूसंस्कारादनंतरं लौकिकाग्नेः स्थापनं॥ तस्मि
न्नग्नौ सायं प्रातः संध्ययोर्दयेत्पुत्रं हस्तेन वत्स सूतिकास्नानं करोति तावद्धस्तेन तंडुलकणमिश्रान्सर्षपान्जु
होति॥ तत्रैनं शंडामर्को इति प्रथमं। आलिखन्ननिमिष इति द्वितीयं॥ ॐ इदमग्नय इदं स्वाहा॥ ॥
यदि बालं क्रूरग्रह उपद्रवति तं जालेन उत्तरीयेण वा छादयित्वा पिता स्वोत्संगे स्थापयित्वा कूर्कुर इति जपति॥ ततः
कुमाराभिमर्शनं नामयतीति॥ अत्र सूतिका संबंधि सर्वं लौकिकाग्नेर्भवति॥ तदुक्तं कारिकायां। सूति
संबंधि पत्न्यादिकर्म तन्त्रौ लौकिके नले। पर्वणि पिचतत्पर्धर्मस्त्रीयान्नेर्दोषभागिति॥ इति जातकर्मणि
प्रयोगक्रमः॥ ॥ अथ गर्गमते विशेषः॥ तत्र सोष्यंतीमि त्यासन्न ननामयती त्यभिमर्शनांते विशे
षः॥ हिरण्यस्याधो तेवा ॥ जितित्रि रुच्चार्य वेदोसीति गुह्यनामकृत्वा मेधाजननं करोति॥ अस्य पिदं

॥गं॰दी॰॥

घामीत्येवमादिभिः प्रतिमंत्रं प्राशनं। कुमारस्य शिरःप्रदेशे उदपात्रं निधानं। संवेष्टते बालं जनन्यै प्रदद्य पिता

स्थानं करोति॥ इति विशेषः। अन्यत्समानं। कुमार्यामप्येतत्कर्म्म मंत्रकं कार्यमिति प्रयोगरत्ने॥ रात्रौ संध्यायां

ग्रहणे जाताशौचांते रेपीदं कार्यम् मृताशौचमध्ये जाते तदाशौचांते वा तत्कार्यं पितरि ग्रामांतरे गते पित

व्यादिर्गोत्रजो ज्येष्ठक्रमेणेदं कुर्यात्॥ इति जातकर्म॥ अथ षष्ठीपूजा॥ पंचमे षष्ठे वा दिवसे षष्ठ एव वा पूर्वरा

त्रे पित्रादिराचम्य प्राणानायम्य देशकालौ संकीर्त्यास्य शिशोरायुरारोग्य सकलारिष्ट शांति द्वारा श्री परमे

श्वर प्रीत्यर्थं। विघ्नेशस्य जन्मदानां षष्ठ्यादेव्या जीवंतिकायाश्च यथा मिलितोपचारैः पूजनं करिष्य इति

संकल्प्य षोडशोपचारैः स्तंत्रे [illegible] पूजयेत्॥ षष्ठ्यां संकल्प्य। [illegible] गणेश पूजा कार्या॥ एतत्स्वतिमास्वल्लेप

नादि कुड्ये लेखनीयाः पीठादौ वा तंदुलैः रूपेण निवेश्याथ पुरुषाः शास्त्रहस्ताः। स्त्रियश्च नृत्यगीतका

रिण्योऽस्यां रात्रौ जागरणं कुर्युः। सूतिकागृहं च सधूमाग्निदीप शस्त्र मुसलांबु विचरति पुत्रं कार्यं सर्षपा

श्च सर्वतो विकिरेत्॥ अन्यदपि षष्ठ्यावारसर्वं कार्यं जन्मदात्र्योदशाहादिना बलिर्देयः। विप्रेभ्यश्च तांबू

राम

॥पत्र॥ ॥१३३॥

न खाद्य दक्षिणां दद्यात्॥ जननाशौचमध्ये प्रथमषष्ठदशमादिनेषु दाने प्रतिग्रहे च न दोषः॥ अन्नं तु निषि
द्धं॥ षष्ठी प्रार्थना॥ गौरीपुत्रो यथा स्कंदः शिशुत्वे रक्षितः पुरा। तथा ममाप्ययं बालः षष्ठिके रक्ष्यतां नमः॥ इ
ति षष्ठीपूजा॥ मिताक्षरायां मार्कंडेयः॥ रक्षणीया तथा षष्ठी निशा तत्र विशेषतः॥ रात्रौ जागरणं कार्यं जन्म
दानां तथा बलिः॥ पुरुषाः शस्त्रहस्ताश्च नृत्यगीतैश्च योषितः। रात्रौ जागरणं कुर्युर्दशम्यां चैव सूतके॥
व्यासः॥ सूतिकावासनिलया जन्मदा नाम देवताः। तासां यागनिमित्तं तु शुद्धिर्जन्मनि कीर्तिता॥ प्र
थमे दिवसे षष्ठे दशमे चैव सर्वदा॥ त्रिष्वेतेषु न कुर्वीत सूतकं पुत्रजन्मनि॥ अपरार्के। कन्याश्च तस्या
राकाद्या वा तथा चैव पंचमी॥ क्रीडनाय च बालानां षष्ठी च शिशुरक्षिणी। खड्गे तथा जननी या वै
ब्राह्मणैर्हि ज्ञातिभिः। राकानुमतिः सिनीवाली कुहूरिति चतस्रः कन्याः॥ अथ यमयोर्ज्येष्ठकनिष्ठ
त्वं॥ संस्कारादि लिख्यते॥ तत्र मनुः॥ जन्मज्येष्ठेन वा कार्यं स्वब्राह्मणायाश्चपि स्मृतं॥ यमयोश्चैव गर्भे
षु जन्मतो ज्येष्ठता स्मृता॥ देवलः॥ यस्य जातस्य यमयोः पश्यंति प्रथमं मुखं। संतानः पितरश्चैव तस्मि

२७

॥ग॰८॥

ज्योपष्ठयं प्रतिष्ठितं ॥ कश्चित्पश्चादुत्पन्नस्याज्येपष्ठपमुक्तं तत्रैदेशाचारतो व्यवस्थाज्ञेया ॥ अपयमलजनन शांति
॥ तत्र पारित्रकाः पठंति ॥ अथातो यमलजनने प्रायश्चित्तं व्याख्यास्यामो यस्य नार्या गौर्दासी महिषी वडवा
वा विकृतं प्रसूते प्रायश्चित्ती भवेत्तं पूर्णे दशाहे चतुर्णां क्षीरवृक्षाणां कषायमुपसंहरेत् प्लक्षवटोदुंबराश्व
त्थ शमीदेवदारुगौरसर्षपास्तेषामपोहिरण्यं दूर्वांकुराम्रपल्लवैः प्रकल्प्य तैः रत्नैः कलशान्पूरयित्वा सर्वौ
षधीनिर्दिष्टतीर्थस्नापयेदापो हि ष्ठेति तिसृभिः कया नश्चित्र इति द्वाभ्यां पंचवरुणैः पंचवारुणेनेदमापो
ज्योग्जीवेति द्वाभ्यां स्नापयित्वाऽलंकृत्य तेषां देवेश्मन् उपवेश्य तत्र माकतयः स्थालीपाकं श्रपयित्वाऽग्ना
गाविष्वाज्याहुतीर्जुहोति ॥ पूर्वोक्तैः स्नपनमंत्रैः स्थालीपाकस्य जुहोत्यग्नये स्वाहा सोमाय स्वाहा पव
मानाय स्वाहा पावकाय स्वाहा मरुताय स्वाहा मारुताय स्वाहा मरुद्भ्यः स्वाहा यमाय स्वाहा अंतकाय स्वाहा अम
त्यवे स्वाहा ब्रह्मणे स्वाहा अग्नये स्विष्टकृते स्वाहेत्येतद्व गृहोत्पातानि भिन्ने उलूक कंक कपोत गृध्राः श्ये
नो वा गृहं प्रविशेत्सीच्च प्ररोहेद्वाल्मीकं मधुजालं वा भवेद्धुर्कुरः प्रज्वलनात् सकृत्स्थापनया नंगे

राम

॥ग॰५२॥
॥१३४॥

शुगृहगोधिकाकृकलासशरीरसर्पणे छत्रध्वजविनाशे सोपाने कृते गंडयोगे ष्वन्येष्वप्युत्पातेषु भूकंपोल्कापात
काकसर्पसंगमप्रेक्षणादिषु तद्देवप्राप्यश्चित्तं गृहशांत्या कुर्यात्। तेन विधिना कृत्वाचार्याय परं दत्वा ब्राह्मणेभ्यो जपि
त्वा स्वस्तिवाच्याशिषः प्रतिगृह्य शांतिर्भवति शांतिर्भवतीति॥ अथ पस्मरत्क्का शांतिः॥ विधानमालायां
काशीखंडे। त्रिविधापमृत्योरुत्पत्तिर्जायते योषितामिह। सुतो वसुतकन्ये चकन्ये एवत पापुनः॥ एकालिं
गो विनाशाय द्विजिंगो मध्यमो स्मृतो। पित्रोर्विघ्नकरो ज्ञेयो न तत्र शांतिर्विधीयते। हेममूर्तिं विधातव्ये
दसंयोऽप्रद्विजोत्तमा पल्लेन वा तदर्द्धेन तदर्धार्धेन वा पुनः॥ ब्रह्म व ज्ञस्य च पदे स्थापयेद्रक्तवाससी॥
स्वस्तिके तंडुलानां च न्यस्ते पीठे द्विजोत्तम स्नापयेत्पंचगव्येन चंदनेनानुलेपयेत्॥ दर्शांगनैवेद्यपेन
धूपयेत्पूजयेत् उमाम्॥ दीपेन राजयेच्चैव नैवेद्यं परिकल्पयेत्॥ यस्मै त्वं सुकृते जातवेद इति मंत्रेणाहु
तेस्सर्वयेत्॥ अनेनैव तु मंत्रेण होमं कुर्याद्यतंद्रितः॥ अष्टोत्तरसहस्रं वा पायसेन समर्पिषा॥ अ॥ शांतिपा
ठं न पद्विप्रा सूर्यसूक्तं जपेत्ततः॥ विष्णुसूक्तं तथा गायत्री वेष्व देवी जपेद्बुधः॥ अस्य दानं तैत्तोद्या दाचार्याय

॥अ... यमावे धावित्तु स्त्रसावित्र्यान्नगाः॥ दस्य मूलप्र...

॥१२॥
॥गं.दा॥

कुंडे विने॥ तयो मृत्युः प्रदातव्योपजन्मानि नधीमता॥ तत्र दान मंत्रः॥ अश्वरूपो महाबाहु अश्विनौ दिव्यचक्षु
षौ॥ अनेन वाजिदानेन प्रीयेतामश्विनौ नगाः॥ ततोभिषेचनं कार्यं दंपत्योर्विधिवद्बुधैः॥ ब्राह्मणान्भोजयेत्स
म्यग्दक्षिणाभिस्तोषयेत्॥ सालंकारैश्च वस्त्रैश्च पार्थयेद्वचनैः शुभैः। एवं कृते विधानेनानुपमलो सम्यक्
शांतिकं जायते नात्र संदेहो सत्यमेतद्ब्रवीमिते॥ ॥अथ जन्मनि दुष्टकालाः॥ तत्र मूलफलं। लल्लः॥
अभुक्तमूलसंजनं परित्यजेत्तु बालकं। समाष्टकं पिता पश्यन्न तन्मुखं विलोकयेत्॥ तदाद्यपादके
पिता विपद्यते जनन्यपा। तृतीयके धनक्षयश्चतुर्थके शुभावहः॥ प्रतीपमंत्यपादतः फलं तदेव सर्प
भे। अभुक्तमूलं बाह वशिष्ठः॥ ज्येष्ठांते घटिकामूलादौ घटिकाद्वयं॥ अभुक्तमूलमित्याहुर्जा
तं तत्र विवर्जयेत्॥ क्वचित् ज्येष्ठाच मूलायां च पादं अभुक्तमूलमित्याहुः॥ कश्यपेन त्वन्यथोक्तं। मू
लाद्यपादजो हंति पितरं तु द्वितीयजः॥ मातरं च तृतीयोऽर्थान्नाशं यद्धं तु तुरीयजः॥ फलं तदेव सार्प
र्क्षे प्रतीपत्वं त्यपादतः॥ अथ मूलवृक्षफलं॥ जयार्णवे॥ मूलं स्तंभे त्वचा शाखा पत्रं पुष्पं फलं

राम

॥धर्म॥
॥१२५॥

तं

शिखा। वेदा८ष्टमुनय७श्चैव दिशा१० श्चवसव८ स्तथाः। नंदा९ बाण५ रसा६ रुद्रा११ मूलन्नेदः प्रकीर्तितः। म
लं मूल विना शाप संज्ञे हानिर्धनक्षयः। त्वचि भ्रातविना शापश्शाखा मातुर्विनाशकृत्। पत्रे स परिवारः स्या
त्पुष्पे पुनः पवल्लभः। फलेषु लभ्नेतेराज्यं शिखायामल्पजीवितं। अन्यत्र त्वन्यथा प्रोक्ता। मूलेस्य घटीषु मूल
हवनंत्तं नेष्ट स्वरवशात्पेत्र वृद्धिबंधुविनाशनं च विटपे रतैर्हतो मात्रलः। पत्रैर्वेर्के। स्तुकृतौतु वाण कुसु
मे मंत्री फले सागरैः राजा वृक्षशिखाल्प मायुरिति संमूलो घ्रिये स्यात्फलं। नृपाल वल्लभः। वृषालिसिं
हेषु घटे च मूलंदिवि स्वर्गे पुण्यतुलांगनांते। पाताल गेमेषधनुः कुलीरनक्रेषु मर्त्येस्थितिस्सम्मरं ति
स्वर्गे मूलं च वेश्याज्यं पाताले च धनागमं। मर्त्यलोके पुत्रनाशं ततद्वापूर्णं समादिशेत्। प्रयोग पारिजा
ते। मूलजाश्वशुरं हंति व्यालजा वतदंगनां। माहेंद्रजा येहंजेति देवरं तु द्विदेवता। नृसिंह प्रसादे च
वाग्रजं हंति सुरेंद्रजाता तथैव पत्न्या भगिनीं पुमांश्च। द्विदेवजा देवरमाशु हन्या ज्ज्यायीनुजा माशुहि
हंतिसनुः। पल्यग्रजामग्रजं वा हंति ज्येष्ठद्विजः पुमान्। तथान्या पीस्स सारं वा त्वाष्ट्रके वा द्विजेवजः।

।कन्यका देवरं हंति विशाखांत्यसमुद्भवा। आद्यपादत्रये नैव आद्ये नैतु पुमान्भवेत्। न हन्यादेवरं कन्या
तुला मिश्रद्वि दैवजा। तदंत्ये पादे द्भवा वर्ज्या दुष्टा वृश्चिकपुच्छवत्। पित्राद्याद्यं पुष्य मध्ये द्वि पादे पूर्वाषाढ
धिष्ण्य पादे तृतीये। जातः पुत्रश्चोत्तराद्यैव चेते माता पित्रोश्चातरं बालनाशं॥ द्विमासं चोत्तराषाढः पुष्ये
चैव त्रिमासिकः॥ पूर्वाषाढाष्टमे मासि चित्रा षाण्मासिकं फलं॥ नव मासं तथाश्लेषां मूले चाष्टक व
र्षकं॥ ज्येष्ठा पंचदशो मासि पुत्रादर्शन वर्जिता। वसिष्ठः। व्यतीपाते गंडाति निःस्यात्परिघे मृत्युमादि
शेत्। वैधृतौ पितृहा निःस्यात्त्रिपुष्करे दानं वैधृतौ वृजेत्। मूले समूलनाशः स्यात्कुलनाशोऽपेनाभवेत्। विद
तां गे च हीने च संध्ययोरुभयोरपि। पर्वेण्यपि प्रसूतौ च सर्वारिष्टं नपप्रदः॥ तद्वत्स दंते जाते श्च पाद जाते
स्त्र पेक्ष्या॥ तस्माच्छांतिं प्रकुर्वीत ग्रहणेन क्रूरखेतसा। गर्गः। कृष्णे त्वतु दर्शा षोढा कुर्यादादौ स्नानं स्मृतं
द्वितीये पितरं हंति तृतीये हंति मातरं। चतुर्थे मातुलं हंति पंचमे वंशनाशनं। षष्ठे तु धननाशः स्या
दात्मनो वंशनाशनं। देवकीर्तिः॥ यद्येकस्मिन्धिष्ण्ये जायंते द्वितीयपुत्राः॥ पितुरंतकरा एते

राम

यद्यपरे प्रीतिरतुला स्यात् ॥ गर्गः ॥ एकस्मिन्नेव नक्षत्रे भ्रात्रोर्वा पितृपुत्रयोः ॥ प्रसूतिश्च तयोर्मृत्युर्भवेदेकस्य
निश्चितं ॥ शौनकः ॥ ग्रहणे चंद्रसूर्यस्य प्रसूतिर्यदि जायते । व्याधिपीडा तथा स्त्रीणां ग्रामादौ तु क्रतुदर्शीनां तु ॥ इ
त्यसंज्ञापते य स्यात्तस्य मृत्युर्न संशयः ॥ अथ गंडांतं ॥ ज्योतिर्निबंधे ॥ पूर्णानंदाख्ययोस्तिथ्योः संधिर्नाडीद्वयं तथा ॥
गंडांतं मृत्युदं जन्मयात्राविवाहव्रतादिषु ॥ कुलीरसिंहयोः कीटचापयोर्मीनमेषयोः ॥ गंडांतमंतरं कालं स्या
द्घटिकार्धमिति प्रदं ॥ कुलीरः कर्कटकः कीटो वृश्चिकः ॥ चापं धनुः ॥ सार्पैंद्रपौष्णभेष्वंत्यषोडशांशो लेनसं
धयः ॥ तदग्रे नैधाद्यपादाश्च नां गंडांतसंज्ञकाः ॥ सार्पमश्लेषा ॥ ऐंद्रं ज्येष्ठा ॥ पौष्णं रेवती ॥ पौष्णाश्विन्योः स
र्पपित्र्यक्षयोश्च ज्येष्ठामूलयोरंतरालं स्याद्गंडांते स्याद्वतु नाडिकं हि यात्राजन्मविवाहकालेष्वनिष्टं ॥
रत्नसंग्रहे ॥ सर्वेषां गंडजातानां परित्यागो विधीयते ॥ वर्जयेद्दर्शनं यावत् षण्मासिकं भवेत् ॥ तिथ्यर्क्ष
गंडे पितृमातृनाशो लग्ने तु स्याद्धौतनयस्य नाशः ॥ सर्वेषु नो जीवति तं हंति वधुं न जीवन् पुनः स्याद्
ध्रुवारणेश्च ॥ अथ पैथीनसिः ॥ तिथिगंडे त्वनड्वाहं नक्षत्रे धेनुरुच्यते ॥ कांचनं लग्नगंडे तु गंडदोषो वि

नक्षत्रपति॥ उत्तरांतिलपात्रं स्यात्पुष्ये गोदानमिष्यते॥ आश्लेषायां तु दानं स्याद्रौप्यं स्यात्पूर्वाषाढे च कांचनं॥ उत्तराति ष्यचि
त्रास्तु पूर्वाषाढोऽश्ववस्यां च कुपीछाति प्रपत्ते न नक्षीकरं बुध:॥ अथ मूलेषाफलं। मूर्धास्य नेत्र गल्लकोस
युगं च बाहुं हृज्जानुगुह्य पदमित्यहि देहन्नाग:॥ बाणाङि ७ नेत्र कृतन्तु कर स्मृति ४ नाग रुद्र ११ षट् ६ ध्नं
द १ पूं च पञ्चिमस: क्रमणास्त्रना अ:॥ राज्यपितृ विनाशा: स्यात्तपाकामक्रियारत्नि:॥ पितृन्नक्षो बली स्व घ्नस्सा
गी भोगी धनी क्रमात्॥ ज्येष्ठाफलमुक्तं ब्रह्मयामले॥ ज्येष्ठादौ जननी माता द्वितीये जननी पिता तृती
ये जननी भ्राता स्वयं माता चतुर्थके॥ आत्मानं पंचमे हंति षष्ठे गोत्रक्षयो भवेत्। सप्तमे चोभय कु
लं ज्येष्ठ भ्रातर मष्टमे॥ नवमे श्वशुरं हंति सर्वं हंति दशांशक इति॥ अथ मूल शांति॥ तत्र पाद्मिका: पंचं
ति। अथातो मूलविधिं व्याख्यास्यामो मूलो त्रोपितुर्नेष्टो द्वितीये मातुस्तृतीये धनधान्यस्य चतुर्थे कु
लशोवह:॥ स्वपं उएणे नागीस्या मूलनक्षत्रे मूलविधानं कुर्यात् सैव षष्पा सर्वगंधस्म संयुक्तं तत्रो
दकुंभे कृतावस्त्र गंधपुष्परत्नसाहितं स्थापितासि द्वार्षं कुसुमयुक्तं तस्मिन् परिघान्मूलानि धारये

धं शापात्रे कृत्वा वस्त्रेण बध्वा तस्मिन्नष्टधानानि मूलानि वक्ष्यामि हिरण्यं पमूलं रसमधान्यानि प्रपमाकार
ष्मर्यो सहदेव्यपराजिता वाला पाणघोषपुष्पी शंखपुष्पी मधुयष्टि काच कांकिता मयूरशिखा रवा काकजंघा
कुमारी हयपंजीवंत्यपामार्ग नागराज कल्हार्णसुलक्ष्मणा जीती व्याघ्रपत्र कस्त्र कर्मर्दकः सिद्धेश्व
रोश्वत्थोदुंबरवटपलाशार्क दूर्वा रोहितक शमी वातावरी स्येवमादि मूलं त्राते पूर्वपिल्वा तस्मिन्निषि
क्तानि मूलानि वक्ष्यामि बैल्व चवनि बकदंबराजवृक्षोदुंबरशाला प्रियालुक्ष्ण घिकपित्थको विदारक
श्लेष्मांतक बिल्वीतक शाल्मली वल्लुसर्वकंटकी वर्जित त्रानिषेकं कुर्याच्छिवः त्रोर्जन न्पाश्व
देवस्य लवैत्योदुंबर्यो संदी मुद्गागा मास्तृणातित त्रासीनान्संपाते नैकेनानिषिंचति त्रिरसो ध्यनुलो
मं शिरो मे श्मार्यग्रा इति पपालिंगमंगानि समन्वातिस्नानाद्रुधि नैर्कीतं पापसर्वं प्रपयिलाकाषे पु
मपर्यं स्नुकृस्नुवं प्रतप्य संमज्यान्वारव्याधारावाज्याचा गो हुत्वा स्नुवं तमिति चतस्र स्थाली पाके
नजुहुयात्संवद वाज्याहुतीर्जुहोति कृष्णपाज इति पंचमानस्तोक इति वे

॥१२३८॥
॥नारद॥

२

[illegible]
[illegible] याते रुद्र शिवा तनूरिति द्वेषडग्ने रक्षांसि सेधति सूक्तं ज्ञाचिरमन्त्रैः॥ शुचिः
पावक ईड्य इति त्वं सोम विश्वतो रक्षा राजन्नघायतो न रिष्येत्त्वावतः सखेति स्विष्टकृदादिप्राशनांते कृष्णां गोः
कृष्णां प्रतिलोहिरण्मयमल्वं सप्तधान्यसंयुक्तमाचार्याय दद्यात्स्वशोन ब्राह्मणेभ्यो दद्यान्न हुत्वस्यपे
न्यावासो दद्याद्न्येभ्यो ब्राह्मणेभ्यः सुवर्णं दद्यात्कृतार्थपापसे न ब्राह्मणान्भोजयेत्तापि देवतेगंडजातप
ष एवं विधिः कात्यायनेनोक्तः कृते शांतिर्भवतीति॥ ॥स्वर्णं तं ते दोक्तं ब्रांतिः स्वल्प दर्जस्यचला शांतीवक्ता॥
॥ मत्स्ये विशेषः॥ अकालप्रसवा नार्यः कालातीतप्रजास्तथा। विकृतप्रसवाश्चैव युग्मप्रसवकास्तथा॥ अ
मानुषा अमुंडा अश्च जातश्मश्रुजनास्तथा॥ हीनांगा अधिकांगाश्च जायन्ते यदि वा स्त्रियः॥ पशवः पक्षिणश्चै
व तथैव च सरीसृपाः॥ विनाशं तस्य देशस्य कुलस्य च विनिर्दिशेत्॥ निर्वासयेत्तां नगरात्ततः शांतिं समा
चरेत्॥ पादे॥ ३ परि प्रथमं यस्य जायंते च त्रिशो द्विजाः॥ दंतैर्वा सह यस्य स्याज्जन्म भार्गवसत्तम॥ द्वि

राम

॥५४॥
॥१२३८॥

तीये च तृतीये च चतुर्थे पंचमे तथा ॥ यदा दंताश्च जायंते मासे चैव महद्भयं । मातरं पितरं चास्य खादेदात्मानमेव च

॥ ॥ अथोर्ध्वदंतजननशांतिः ॥ ॥ गजपृष्ठगतं बालं २ नौस्थं वा स्थापयेद्द्विजः ॥ तदभावे तु धर्मज्ञ कांचनेन तु व

राननेन । सर्वौषधैः सर्वगंधैर्बीजैः पुष्पैः फलैस्तथा ॥ पंचगव्येन रत्नैश्च मृत्तिकाभिश्च नागव ॥ स्नापयेदिल

न्वेयः ॥ स्थालीपाकेन धातारं पूजयेत्तदनंतरं ॥ समाहृत्वा त्वर्कचंद्रौ तथा ब्राह्मणभोजनं ॥ अष्टमे हनि विप्रा

णां तथा देया च दक्षिणा । कांचनं रजतं गां च भूमिं वा धनमेव च ॥ दंतानामष्टमे मासि षष्ठे मासि ततः पुनः ॥

दंता यस्य च जायंते माता वा म्रियते पिता ॥ बालको म्रियते तत्र स्वयमेव न संशयः ॥ दधिक्षौद्रघृताक्तानाम

श्वत्थसमिधां ततः । जुहुयादष्टशतं तत्र समंत्रेण तु मंत्रवित् ॥ धेनुं च दद्याद्गुरवे ततः संपद्यते शुभं ॥ ज्योति

र्निबंधे तु ॥ अष्टमादिषु दंतोत्थानं स्तनावहमित्युक्तं । रुद्रयामले ॥ प्रथमं दंतनिर्मुक्तिरूर्ध्वं बालस्य चेद्भवे

त् । क्लेशाय मातुलस्याहतदाप्रोक्ता महर्षिभिः ॥ सौवर्णे राजते वा पितामहकांस्यमये तु वा ॥ दध्योदनेन सं

मंगोद्या ॥

पूर्णपात्रं दद्याच्छिरोकरे ॥ समंत्रेनाजनं दत्वा सपत्रपेन्मातुलः शिशुं ॥ सालंकारं सवस्त्रं च शिशुमालिंग्य सा
दरं ॥ तत्र मंत्रः ॥ रुद्रमांनाग्निनेपल्लवेरुद्रमेसकलंकुले ॥ गृहीत्वा नाजनेसामंत्रेप्रसन्नोनवमेसदा ॥ निर्विघ्नं कु
रु कल्याणं निर्विघ्नं वस्व मातरं ॥ मयात्मानमधिष्ठाप्य चिरंजीव मया सहेति ॥ ततो नंदयेद्विप्रान्नून्न
गिनी नागिनी पति ॥ होमं कृत्वा तिलाज्येन ब्राह्मणानपि भोजयेत ॥ एवं कृते विधाने तु विघ्नः कोपि न जा
यते ॥ ॥ अथ त्रिकशांतिः ॥ ॥ गर्गसंहितायां ॥ तत्र पातुस्तुताचेत्स्यात्त्रये वा सुता यदि ॥ मातापित्रोः
कुलस्यापि तदानिष्टं महद्भवेत् ॥ ज्येष्ठनाशो धनेहानि दुःखं चैव महद्भवेत् ॥ तत्र शांतिं प्रकुर्वीत वित्त
शाठ्यविवर्जितः ॥ जातस्यैकादशाहे वा द्वादशाहे शुभे दिने ॥ आचार्यमभिजो वृत्वा ग्रहयज्ञपुरःसरं ॥
ब्रह्मविष्णुमहेशेंद्रप्रतिमाः स्वर्णतः कृताः ॥ पूजयेद्धान्यराशिस्थकलशोपरि शक्तितः ॥ पंचमे कलशे रु
द्रं पूजयेद्रुद्रसंख्यया ॥ रुद्रसूक्तानि चत्वारि शांतिसूक्तानि सर्वशः ॥ आचार्यो जुहुयात्तत्र समिदा

राम

॥ घर ॥
[illegible]

पुत्रोग्रा

ज्यतिल्वोऽस्मकं ॥ अपेशत्तरसह संतुषद्धातं त्रिद्यातं तु वा ॥ देवतान्यस्मतुर्वक्रादिभ्यो ग्रहपुरःसरं ॥ ब्रह्मादिमं त्रै
रिं इस्यपत्त इडन्नेजामहे ॥ ततः स्विष्टकृतं हुत्वा बलिं पूर्णाहुतिं ततः ॥ अभिषेकं कुटुंबस्य कृत्वा चार्यं प्रपू
जयेत् ॥ हिरण्यं धेनुरेका च अविजो दक्षिणा ततः ॥ आज्यस्यावीक्षणं कृत्वा शांतिपाठं तु कारयेत ॥ ब्राह्म
णान्भोजयेच्छक्त्या पादीनानाधान्यं तर्पयेत् ॥ कृत्वैवं विधिना शांतिं सर्वारिष्टाद्विमुच्यते ॥ ॥ अथ दत्त
कपुत्रपरिग्रहविधिः ॥ ॥ पारिजाते शौनकः ॥ अपुत्रो मृतपुत्रो वा पुत्रार्थं समुपोष्य च ॥ वाससी कुंडले द
त्वा उष्णीषं चांगुलीयकं ॥ बंधनं ज्ञे नसंतोऽपि ब्राह्मणांश्च विशेषतः ॥ अन्वाधानादिपर्यंतं त्रं कृत्वोऽप
त्यवनातकं ॥ दातुः समक्षं गत्वा तु पुत्रं देहीति याचयेत् ॥ दाने समर्थो दातास्मै ये यज्ञेनेति पंचभिः ॥ देव
स्य त्वेति मंत्रेण हस्ताभ्यां परिगृह्य च ॥ अंगादंगेत्यृचं जप्त्वा आघ्राय शिशुमूर्धनि ॥ गृहमध्ये तमा
धाय चरुं कृत्वा विधानतः ॥ यस्त्वाहृदेत्यृचा चैव तुभ्यमग्रे ऋचैकया ॥ सोमोददिति त्वेताभिः प्रत्यृचं पंच
भिस्तथा ॥ स्विष्टकृदादि होमं च कृत्वा शेषं समापयेत ॥ ब्राह्मणेन सपिंडेषु कर्तव्यः पुत्रसंग्रहः ॥ त

ऽन्यत्रानुज्ञानाद्भर्तुरिति। यत्तु समंत्रकहोमस्य पुन ... दिमंत्रपाठेच

॥१४०॥
ना.दी.॥

दत्त्वा वेऽसपिंडो वा अन्यत्र तु न कारयेत्। मिताक्षरादौ तु व्याहृतिभिराज्येन होम उक्तः॥ तत्रैव वसिष्ठः न
त्वेकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वा नैं स्त्री [illegible] रूपोरनधिकारात्तयोर्दत्तकपुत्रो न नैव संसेवेति स्मृतिविवेकोऽत
त्यन्ये॥ भर्त्रनुज्ञया स्त्रिया अपि प्रतिग्रहो ज्ञेयः॥ यद्यपि मेधातिथिना नार्या लववद्दृष्टरूपदत्तके होमसा
ध्यमुक्तं॥ स्त्रिया अस्य होमासंभवस्तथापि व्रतादिवद्विप्रद्वारा होमादिकार्यं इति हरिनाथादयः॥ संबंधते हे
व्येवं॥ शूद्रस्याप्येवं॥ स्त्रीशूद्राश्च सधर्माण इति स्मृतेः॥ अत एव पराशरेण शूद्रकर्तृको होमो वि
प्रद्वारेवोक्तः॥ दत्तके विशेषः कालिकापुराणे॥ पितृगोत्रेण यः पुत्रः संस्कृतः पृथिवीपते॥ आचूडां
तं न पुत्रः स पुत्रतां याति त्वान्यतः॥ चूडाद्या यदि संस्कारा निजगोत्रेण वै कृताः॥ दत्ताद्यास्तनया
स्ते स्युरन्यथा दास उच्यते। ऊर्ध्वं तु पंचमाद्वर्षान्न दत्ताद्याः सुता नृप॥ गृहीत्वा पंचवर्षीयं पुत्रेष्टिं प्रथ
मं चरेदिति॥ अथ सूतिकास्नानं॥ ॥ ज्योतिषे॥ करे ह्युत्तरगपानिलवासवांत्यमैत्रेंदुवाष्ट्रधातृव
न्हे क्रिपुंसो॥ तिष्यावरिक्तेऽष्ट नमामनंति प्रसूतिकास्नानविधिं मुनींद्राः॥ हस्तज्येष्ठा प्रवीणा

राम

॥व्यव.॥
॥१४०॥

ल्गुनी स्वाती धनिष्ठा रेवती अनुराधा मृगशीर्षाश्विनी रोहिणी त्रिषूत्तरासु सूतिकास्नानमित्यर्थः ॥
पुंसामङ्गिरविचैव मगुरुवारेषु ॥ ॥छ॥ इति श्रीगदाधरकृते गृह्यसूत्रभाष्ये जातकर्मविधिः ॥ ॥
दशम्यामुत्थाप्य ब्राह्मणान्भोजयित्वा पिता नाम करोति ॥ ॥ प्रसवाद्दशम्यां रात्रावतीतायामेकादशे
ऽह्नि सूतिकागृहात्सूतिकामुत्थाप्य श्राद्धव्यतिरेकेणानु ब्राह्मणान्भोजयित्वा पिता कुमारस्य नाम
संज्ञां संव्यवहारार्थं करोति ॥ अन्यस्मिन्नपि संस्कारे पितुरेवोत्सर्गकर्तृत्वं ॥ इह पितृग्रहणादन्यत्रापि
नियमो गम्यते ॥ अत्र दशम्यामिति सूतकोपलक्षणं ॥ तथा च मदनरत्ने नारदीये ॥ सूतकान्ते नामकर्म
विधेयं स्वकुलोचितमिति ॥ तत्र पक्षे यावंति दिनानि सूतकं पक्षद्वयं ॥ तथा च मदनरत्ने नार
दीये तदंते दिने कार्यमिति हरिहरः ॥ सूत्रकारवचनादेकादशेऽहन्येवेत्यन्ये ॥ गोभिलसूत्रे दशरा
त्रे वुष्टे नामकरणमिति ॥ याज्ञवल्क्यः ॥ अहन्येकादशे नामेति ॥ मदनरत्ने विशेषः ॥ द्वादशे दशमे
पि जन्मतोपि त्रयोदशे ॥ षोडशे विंशतौ चैव द्वाविंशे वर्णतः क्रमात् ॥ कारिकायां ॥ एकादशे द्वादशे वा

मासे पूर्णेथवापरे। अष्टादशेहनि तथा वदंत्यन्ये मनीषिणः॥ जातदशाहे व्यतीते वा पूर्णे संवत्सरेथवा॥ ज्यो
तिर्निबंधे गर्गः॥ आमासंक्रांति विष्णादौ प्राप्तकालेपि नाचरेत्॥ एकादशेहनि नामकरणं जातकौस्तु
त्यंत रीत्या द्वादशाद्यादिकालो ग्राह्यः॥ तदुक्तं कारिकायां॥ मुख्यकाले यदा नामधेयं कर्तुं न शक्यते॥ उक्ता
नामन्यतमस्मिन्नुदिने स्यात् गुणान्विते॥ कीदृशं नाम कार्यमित्यत आह॥ ॥द्व्यक्षरं चतुरक्षरं वा॥ ॥
नाम कुर्यादिति शेषः॥ द्वे अक्षरे यस्य तत् द्व्यक्षरं॥ चत्वार्यक्षराणि यस्य तत् चतुरक्षरं॥ अनयोर्विकल्पः॥ ॥
घोषवदाद्यंतरंतस्थं दीर्घाभिनिष्ठानं कृतं कुर्यान्न तद्धितं॥ ॥घोषवदादि घोषवदक्षरमादौ यस्य तत्॥ घो
षवंतो वर्गीयास्त्रयो वर्णाः परं लवाश्चोच्यंते ते च॥ ग घ ङ। ज झ ञ। ड ढ ण। द ध न। ब भ मा इति॥ अंतरंतस्थं। अं
तर्मध्ये अंतस्थाः यस्य तत्॥ अंतस्था यरलवा उच्यंते॥ एते नाम्नो मध्ये कर्तव्या इत्यर्थः॥ दीर्घाभिनिष्ठानं
अभिनिष्ठानं समाप्तिः॥ अवसाने दीर्घं यस्य तत्॥ दीर्घो गुरुरुच्यते॥ कृतं कुर्यात् कृदिति प्रत्ययसंज्ञा तदं
तं कुर्यात्॥ अपरे पितामहादिकृतं वर्णयंति॥ न तद्धितं। तद्धितप्रत्ययांतं कुमारस्य नाम न कुर्यात्॥ कृत्प्र

त्ययांतस्यापवादोयं। ततश्चेदं नामकार्यं न इकारीति॥ स्त्रियानाम्नि विशेषमाह॥ ॥अयुजाक्षरमाकारांतं स्त्रि
यै तु तद्धितं॥ ॥अयुजानि विषमाणि अक्षराणि यस्मिन्नाम्नि तत्॥ आकारांतं। आकारोंऽते यस्य तत्॥
तद्धितं। तद्धितप्रत्ययांतं च स्त्रियै स्त्रियाः नाम कुर्यादित्यर्थः॥ ॥शर्म ब्राह्मणस्य॥ ॥शर्मशब्दः सुखनीयव
चनः सुखनीयं ब्राह्मणस्य नामकर्तव्यं॥ यथा शुभंकरः प्रियंकरः इति कर्कः॥ ब्राह्मणस्य नाम्नि शर्मेत्यनुषं
गो भवतीति नेत्रे पद्महरिहरौ॥ ॥वर्म क्षत्रियस्य॥ ॥वर्मशब्दः शौर्यवचनः शौर्ययुक्तं क्षत्रियस्य नामका
र्यमिति कर्कः। क्षत्रियनाम्नि वर्मेत्यनुषंग इत्यन्ये॥ ॥गुप्तेति वैश्यस्य॥ ॥गुप्तशब्दः आढ्यत्वाभिधायी वैश्य
स्य नाम भवतीति कर्कः। गुप्तेति नाम्नि अनुषंग इत्यन्ये। मनुः॥ शर्मांतं ब्राह्मणस्य स्यात् वर्मांतं क्षत्रियस्य
तु॥ वैश्यस्य धनसंयुक्तं शूद्रस्य प्रेष्यसंयुतं॥ ॥चतुर्थे मासि निष्क्रमणिका॥ ॥कुमारस्य जननाच्चतुर्थे
मासि मासि निष्क्रमणिका गृहाद्बहिर्नयनं कर्तव्यं॥ ज्योतिर्निबंधे॥ तृतीये वा चतुर्थे वा मासि निष्क्र[illegible]
केन॥ ततस्तृतीये कर्तव्यं मासि सूर्यस्य दर्शनं॥ चतुर्थे मासि शिशोश्चंद्रस्य दर्शनं॥ अत्र सूर्येंदोः कर्म[illegible]॥

कर्तव्यं

८५

१७४२ ॥ग॥

ये च तयोः श्राद्धं न विघत इति छंदोगपरिशिष्टा छंदोगानां निष्क्रमणे वृद्धिश्राद्धं नास्तीति कल्पतरुः॥ प्र
मैत्रे पुष्ये पुनर्वसु प्रथमन्ने पौष्णे नुकूले विधौ हस्ते चैव सुरेश्वरे च मृगे चन्ने तारास्तु शस्तास्तु च॥ कुर्यान्नि
ष्क्रमणं शिशोर्बुधगुरौ शुक्रे घटिक्रांतिपो कन्याकुंभतुलाघमृगारिन्ने वने सौम्यग्रहालोकिते॥ मदनरत्ने॥ प्र
नेत्रे शुभे न जन्मकाले वा कुर्यान्निष्क्रमणक्रिया॥ ॥सूर्यमुदीक्षयति तच्चक्षुरिति॥ ॥गृहाद्वहिर्नेपनानंत
रं पिता कुमारं सूर्यं दर्शयति तच्चक्षुरिति मंत्रेण॥ सूर्यमुदीक्षस्वेति प्रैष इति गर्गपद्धतौ॥ तन्नग्गं॥ ॥इ
ति श्रीगदाधरकृते गृह्यसूत्रभाष्ये प्रथमकांडे सप्तदशी कंडिका॥ १७॥ अथ पदार्थक्रमः॥ जन्मत एका
दशे द्वादशे वा यथाचारं नियतदिने वा नामकरणं कार्यं॥ नियतकाले विविष्टि वैधृति व्यतीपात ग्रहण संक्रांत्यमा
वास्या श्राद्धदिनेषु न कार्यं। नियतकाले क्रियमाणेषु गुरुशुक्रास्त बाल्यवार्द्धकवृक्रातिचारमलमासादि
न निषेधो नास्ति॥ नियतकालातिक्रमे तु ज्योतिःशास्त्रोक्ते शुभे काले कार्यं॥ सर्वपापक्षयो नाम प्रशस्तः॥
प्राणानायम्य देशकालौ संकीर्त्य शिशोर्बीजगर्भसमुद्भवैनोनिबर्हणद्वारा वृद्धिव्यवहारसिद्धिद्वारा

राम

ग॰ सू॰ २
॥१७४२॥

श्रीपरमेश्वरप्रीत्यर्थं नामकरणं करिष्ये इति संकल्प्य। मातृपूजापूर्वकमाभ्युदयिकं कृत्वा ब्राह्मणेभ्य भोजनं
कार्यं। ततः स्वकुलदेवतानक्षत्र इति नामक्त्वा जन्मकालीनमासनाम कुर्यात्॥ तत्रादौ केशवानंतोऽच्युतश्चक्री
वैकुंठोऽपजनार्दनः॥ उपेंद्रो यज्ञपुरुषो वासुदेवस्तथा हरिः। योगीशः पुंडरीकाक्षो मासनामान्यनुक्र-
मात्॥ अत्र यथाचारं चैत्रादि मार्गशीर्षादि वा क्रमः। ततोऽवकहडाख्या ज्योतिःशास्त्रोक्तचक्रानुसारेण जन्मन-
क्षत्रपादप्रयुक्ताक्षरादि नाम॥ ततो व्यावहारिकं स्वेष्टं नामेति॥ अत्राचार्यं दक्षिणे त्वशिष्टाचारः। तंडुलान्
कांस्यादिपात्रे प्रसार्य तदुपरि सुवर्णशलाकया कुलदेवताप्रयुक्तममुकनक्षत्र इत्यादिनामचतुष्टयं लेखयेत्॥ त-
तो देवताभ्यो नम इति संपूज्यामुकनाम्ना त्वममुकोऽसीति स्वदक्षिणस्य मातुरुत्संगस्थस्य शिशोर्दक्षिणक-
र्णे कथयित्वा मनोजूतिरित्यादिमंत्रपाठांते। विप्रैर्नामसु प्रतिष्ठितमस्त्विति उक्तेऽमुकनाम्नामुकनामायं त्वामभि-
वादयते इत्युक्त्वा नामकर्त्रा प्रतिनाम विप्रानभिवादयेत्॥ ते चायुष्मान् भव त्वममुक इति वदेयुरिति। ततः क-
र्ता देवताभ्यो ब्राह्मणेभ्यश्च नत्वा यथासंख्याकान् विप्रान् भोजयेत् दक्षिणां च दद्यात्। विप्राशिषश्च ग्राह्याः॥

तु ७

॥१८३॥
रामः॥

कुमार्या अपि नामकरणममंत्रकं कार्यं॥ ॥इति नामकरणे पदार्थक्रमः॥ ॥नात्र गर्गमते विशेषः॥
अथ खट्वारोहः॥ ॥पद्मिजाते खट्वारोहस्तु कर्तव्यो द्वादशे मासे द्वादशे पि वा॥ षोडशे दिवसे वापि द्वाविंशे दिव
शे पि वा। ज्योतिर्निबंधे। करत्रये वैष्णवरेवतीषु दितिद्वये चाश्विनके ध्रुवेषु कुर्याच्छिशूनां नृपते श्रुतदं
दोलनं वै सुखिनो भवंति॥ तत्रैव। आंदोलाशयने पुंसां द्वादशो दिवसः स्मृतः॥ त्रयोदशोस्तु कन्याया नन्
दोत्र विचारणा॥ अन्यस्मिन्दिवसे चेत्स्यात्त्रिपणा स्यप्रशस्यते॥ ॥तत्र नामकरणादि दिने षोडशे द्वाविंशे
न्यस्मिन्वा ज्योतिर्विदादिष्टे सुलग्ने काले पयश्चारं कुलदेवतादिपूजां विधाय पाल्लंकृते शिशुं हरिद्राद्यलंकृते
पर्यंके मातापित्राद्याः सौभाग्यपुत्राः स्त्रियो योग्यपानेन हरिं स्मरंत्यो गीतवाद्यादिसमकालं प्राक्शिरसं न्य
सेयुः॥ स्वस्वाचारप्राप्तं वान्यदपि कार्यं॥ ॥अथ दुग्धपानं॥ नृसिंहः॥ एकत्रिंशद्दिने चैव पयः शंखेन पा
ययेत्। अन्नप्राशनतः त्रैदिवशाद्यपराशिषु॥ अथ तांबूलभक्षणं। चंडेश्वरः। सार्द्धमासद्वये देयात्तांबू
लं प्रथमं शिशोः॥ कर्पूरादिकसंमिश्रं विलासायहिताय च॥ मल्लार्कचित्रकदितिष्यहरीन्द्रजेषु पौष्णेत्या

राम
॥५२॥
॥१८३॥

तर

मृगशिरोदितिवासवेषु ॥ अर्केंदुजीवज्ञबुधघनवासरेषु लग्नेबलन्नहाणविधिर्मुनिभिः प्रदिष्टः ॥ कुमारस्य अस्मि
न्नेवमासेसुतिनदिनेरात्रौचेद्रदर्शनंकारयेत् ॥ चंद्रार्कयोर्दिगीशानांदिशांचवरुणस्यच । निक्षेपार्थमहंदद्मितेलं
रक्षंतुसर्वदा ॥ अप्रमत्तंप्रमत्तंवादिवारात्रमथापिवा ॥ रक्षंतुसंततंसर्वेदेवाः शक्रपुरोगमाः ॥ एवंशिशुरक्षणार्थंदेवा
नूप्रार्थयेत् ॥ ॥ अथोपवेशनविधिः ॥ प्रयोगपारिजाते ॥ पंचमेचतथामासिजन्मतोतमुपवेशयेत् ॥ तत्रसर्वेग्रहाः
शस्ताभौमोप्यत्रविशेषतः ॥ उत्तरात्रितयंसौम्यंपुष्यर्क्षंशक्रदेवतं । प्राजापत्यंचहस्तश्चशस्तमाश्विनमित्रभं ॥
पंचममासेसुलग्नेपक्षेशुभेतिथ्यादौपूर्ववर्द्धस्वस्तिवाचनंकृत्वा शोरवतुर्यादिमांगलिकघनौघ्नियमाणेशिशु
मुपवेशयेद्विसेतेर्मंत्रैः ॥ रक्षैनंवसुधेदेविसदासर्वगतंशुभे । आयुःप्रमाणमखिलंनिक्षिपस्वहरिप्रि
ये ॥ अचिरात्पुषस्वस्ययेकेचित्परिपंथिनः ॥ जीविताशेप्यविनेषुनिर्दहस्वाचिरेणतान् ॥ धारिणिशेषवत्
तानीमातस्त्वमधिकाह्यसि । कुमारंपाहिमातस्तंब्रह्मातदनुमन्यतामिति ॥ ततोब्राह्मणान्पूजयित्वाशि
षोवाचयित्वानीराजनाघुत्सवंकुर्यात् ॥ एवंकुमार्याअपि ॥ ॥ अथकर्णवेधः ॥ ॥ रवायोपविष्टा

तत्रपातिका ·

पंगे ॥ अथ कर्णवेधो वर्षे तृतीये पंचमे वा पुष्ये ह्युचि त्राह हरि रेवती पु श्लोके कुमारस्य मधुरं दत्वा प्र ॥

अनु १

॥१४४॥
॥ग दा॥

यद्दक्षिणं कर्णमभिमंत्रयते भद्रं कर्णेभिरिति सव्यं वक्ष्यंतीवेदिति बाधमिंद्यान्नतो ब्राह्मणभोजनं ॥ मदनरत्ने ॥ प्र
थमे सप्तमे सप्तमे मासि ष्टमे दशमेपवा ॥ द्वादशे चतपा कुर्यात्कर्णवेधं शुभावहं । हेमाद्रौ व्यासवचनं । कार्त्ति
के पौषमासे वा चैत्रे वा फाल्गुनेपि वा । कर्णवेधं प्रशंसंति शुक्लपक्षे शुभे दिने । कारिकायां ॥ शुनक्षत्रे शुभेनेवं दे
स्थे स्वत्राषोदये शुभे । दिनच्छिद्रव्यतीपातविष्टिवैधृतिवर्जिते । चित्रानुराधामृगरेवतीषु पुनर्वसौ पुष्यकराश्वि
नीषु । श्रुतौ धनिष्ठातिसपूत्तरासु लग्ने गुरौ लाभमगे शुभेस्या त । मदनरत्ने । द्वितीया दशमी षष्ठी सप्तमी
च त्रयोदशी । द्वादशी पंचमी शस्ता तृतीया कर्णवेधने । सौवर्णी राजपुत्रस्य राजती विप्रवैश्ययोः । शूद्रस्या चाय
सी सूची मध्यमाष्टांगुलात्मिका ॥ हेमाद्रौ देवलः । कर्णरंध्रे रवेश्छाया नाविशेद् ग्रजन्मनः ॥ तं दृष्ट्वा विलयं
यांति पुण्यौघाश्च पुरातनाः । रत्नाकरे । अंगुष्ठमात्रसुषिरौ कर्णौ न भवतो यदि । तस्मै श्राद्धं न दातव्यं दत्तं चेदा
सुरं भवेत् । ततो यथोक्तकाले देशकालौ स्मृत्वाऽस्य द्विजोः कर्णवेधं करिष्य इति संकल्प्य कुमारं स्नापयि
त्वा तस्मै शर्करादि मधुरं दत्वा भद्रं कर्णेभिरिति दक्षिणं कर्णमभिमंत्र्य वक्ष्यंतीवेदिति सव्यकर्णस्याभिमं

राम

॥धर॥
॥१४४॥

वर्णां कुर्यात् ॥ ततः सव्याद्दक्षिणकर्णस्य वेधः ॥ ततः सव्यस्य ॥ अत्रात्तदुदयिकं केषांचिन्मते नास्ति ॥ ॥ छ ॥
इति श्रीसंस्काराहूवामनाम्नि जगद्धरकृते कर्णवेधपदार्थक्रमः ॥ प्रोष्येत्य गृहानुपतिष्ठते पूर्ववत् ॥ साग्नि
कः प्रवासं कृत्वा एत्य गृहान् गृहस्थितान् भार्यापुत्रादीनुपतिष्ठते ॥ तत्समीपेस्थितान्मंत्रं पठति ॥ पूर्ववद्व्रो
तवत् । गृहा मा बिभीतेति त्रिभिर्मंत्रैरित्यर्थः ॥ उपस्थानानंतरं होमायव इति प्रवेशनमिति चेत्तर्यपत्रहारि
हरौ । प्रवासस्थस्साग्निकेनद्व्याजेनादिहस्पकार्यमेव केवलेन पुरुषेण कार्यः ॥ न तु तीर्थयात्राघट
कृकार्यपर्यमिति प्रयोगरत्ने ॥ ॥ पुत्रं दृष्ट्वा जपेत् अंगादंगात्संभवसि हृदयादधिजायसे । आत्मा वै पुत्र
नामासि स जीव शरदः शतमिति ॥ ॥ पुत्रं आत्मजं दृष्ट्वाऽवलोक्य अंगादंगादिति मंत्रं जपति ॥ मंत्रार्थः ॥
हे पुत्र । यतस्त्वं अंगात् अंगात् संभवसि ॥ उत्पन्नोसि । हृदयात् अंतरंगादपि अधिकतया जायसे । अतस्त्वं
वै निश्चितं ॥ पुत्रनामा आत्मा आत्मजनितरूपोसि । स त्वं शतं शारदो वर्षाणि जीव प्राणिहि ॥ ॥ अथ पापस्य
मूर्धानमवजिघ्रति प्रजापतेष्ट्वा हिंकारेणावजिघ्रामि सहस्रायुषाऽसौ जीव शरदः शतमिति ॥ ॥ जपे

गवांत्वेति ... सहस्रायुषे सौर त्राप्यनुषंगः तेन प्रजातिस्थाने गवांत्वेति पद मत्र पठेदित्यर्थः तत
दि

॥१४५॥
॥गद०॥

तरं अस्य पुत्रस्य मूर्धानं त्रिः अवजिघ्रति। अवाचीनं जिघ्रति प्रजापतेष्ट्वेति मंत्रेण। असाविति तस्यैव नाम
ग्रहणं॥ मंत्रार्थः॥ हे पुत्र प्रजापतेर्ब्रह्मणः हिंकारेण। स्वेच्छाकृत ध्वनिविशेषेण सामवेदाख्य पवेन त्वा
त्वां अवजिघ्रामि। शिरसि सिंचुं वा मि। अतो वघ्राणात् हे असौ अमुकशर्मन्। सहस्रायुषा सह जीवनेन
शारदः शतमित्यर्थः॥ ॥गवां त्वा हिंकारेणेति च त्रिः॥ ४॥ गवां त्वा हिंकारेण वजिघ्रामि सहस्रायुषा
मुकशर्मन् जीव शरदः शतमिति मंत्रेण पूर्ववदेव घ्राणादि कृत्स्नमवजिघ्रति॥ ॥दक्षिणेस्य कर्णे ज
प त्वस्मे प्रयंधि मघवन्नृजीषिन्निंद्र रायो विश्ववारस्य भूरेः॥ अस्मे शतं शरदो जीवसे धा अस्मे वीरां छ
श्वत इंद्र शिप्रिन्निति॥ ॥अस्य पुत्रस्य दक्षिणे कर्णे अस्मे प्रयंधि मघवन्निति मंत्रं जपति। मंत्रार्थः
हे मघवन् इंद्र. ऋजीषिन्॥ स्निग्धचित्त। हे इंद्र लोके शिप्रिन्। सुखदा लघुहस्तेति वा। अस्मे कुमा
राय॥ इंद्र रायः॥ ऐश्वर्याणि धनानि वा प्रयंधि। प्रयच्छ। विश्ववारस्य। सर्ववरणीयस्य। वाराणां समूहो
वारं॥ सर्वेषां वाराणां समूहः सर्ववारं तस्येति वा॥ भूरेर्बहुतरस्य॥ उभयत्र कर्मणि षष्ठी। प्रभुरः सर्वव

राम
॥५२॥
॥१४५॥

रं रात्रेश्च पश्च इत्यर्थः॥ प्रयोजनमाह॥ अस्मिन्नस्य ज्ञातं ज्ञारदे जीवसे जीव नायेति। किंच॥ किंच। अस्मिन्नस्मिन्नु
वीरान्नु ज्ञानू ज्ञास्वतः ज्ञास्वतान् दीर्घायुषः॥ अघाः॥ निधेहि। अस्मिन्देहीत्यर्थः॥ ॥ इंद्र श्रेष्ठानि द्रविणानि धे
हि चित्तिं दक्षस्य सुभगत्वमस्मे। पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नामिति मंत्रेण॥ ॥सर्वे
कर्णे इंद्र श्रेष्ठानीति मंत्रं जपति। मंत्रार्थः॥ हे इंद्र परमैश्वर्ययुक्त। अस्मिन्नस्मिन्नु। श्रेष्ठानि। सुमंगलानि धेहि।
। स्थापय। चित्तिं। ज्ञानं। दक्षस्य प्रजापतेरिव सुभगत्वं॥ सौभाग्यं सर्वप्रियत्वं च धेहि॥ तथा रयीणां धनानां पोषं
पुष्टिं॥ तनूनामवयवानामरिष्टिं निरोगत्वं॥ वाचां वाण्याः स्वाद्मानं स्वादुत्वं माधुर्यमिति यावत्॥ अह्नां दि
नानां सुदिनत्वं साफल्यं च धेहीति॥ ॥ स्त्रियै तु मूर्धानमेवावजिघ्रति तूष्णीं॥ ॥ स्त्रियै स्त्रियाः दुहि
तुः पुत्रिकायाः मूर्धानमेव तूष्णीं जिघ्रति॥ न त्वन्यत्॥ एवकारेण दर्शनजपकर्णजपयोर्निवृत्तिरिति हरिह
रः॥ एवकारकरणं कर्णजपप्रतिषेधार्थमिति चर्तुपद्माः॥ ॥ इति श्रीगदाधरकृते गृह्यसूत्रभाष्ये प्र
थमकांडे अष्टादशी कंडिका॥ ॥१८॥ ॥षष्ठे मासेऽन्नप्राशनं॥ ॥जन्मतः षष्ठे मासे कुमारस्यान्नप्रा

॥१४६॥
॥नद॥

त्रानारब्धं कर्म कुर्यात्॥ नारदः। जन्मतो मासि षष्ठे स्यात् सौरेणान्नप्राशनं परं। तदभावेऽष्टमे मासि नवमे दशमेऽपि वा॥
द्वादशे वापि कुर्वीत प्रथमान्नप्राशनं परं। संवत्सरे वा संपूर्णे केचिदिच्छंति पंडिताः॥ नारदः॥ षष्ठे वाप्यष्टमे मासि
पुंसां स्त्रीणां तु पंचमे। सप्तमे मासि वा कार्यं नवान्नप्राशनं शुभं॥ रिक्तां दिनक्षयं नंदां द्वादशीमष्टमीममां
त्यक्त्वान्यतिथयः प्रोक्ताः सितजीवज्ञवासराः॥ चंद्रवारं प्रशंसंति कृष्णे चांत्यत्रिकं विना॥ श्रीधरः॥ आदित्य
तिष्यवसुसौम्यकराश्विचित्राजविभुवरुणोत्तरपौष्णमित्राः॥ बालान्नभोजनविधौ दशमे वि
शुद्धेष्विंद्रो विहायनवमीतिथयः शुभाः स्युः॥ वसिष्ठः॥ बालान्नभुक्तौ व्रतबंधने च राज्याभिषेके खलु
जन्मधिष्ण्यं॥ शुभं त्वनिष्टं सततं विवाहे सीमंतयात्रादिषु मंगलेषु॥ ॥ स्थालीपाकं श्रपयि
त्वाज्यभागौ विष्ण्वाज्याहुती जुहोति॥ ॥ स्थालीपाकं चरुं पश्चाद्विधिं श्रपयित्वाज्यभागौ हुत्वा द्वे आ
ज्याहुती वक्ष्यमाणमंत्राभ्यां जुहोति॥ देवीं वाचमजनयंत देवास्तां विश्वरूपाः पशवो वदंति। सा नो मंद्रेषम
ऊर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु स्वाहेति। वाजो नो अद्य प्रसुवाति दानमिति च द्वितीयां॥ ॥ द्वे आज्याहुती जुहोति स्रुवेण॥

दि
राम
॥नद॥
॥१४६॥

तत्र देवीं वाचमजनयंत इति मंत्रेणैकामाहुतिं जुहोति। ततस्त्वं देवीं वाचमिति वाजो नो अद्य घेति च द्वितीयां च
त्रीण्याः त्पूर्वया ऋचा सह वाजो नो अद्य घे स नया द्वितीयामाहुतिं जुहोति। ततस्त्वं देवीं वाचमिति वाजो नो अद्य घेति च
द्वाभ्यामृग्भ्यां द्वितीयामाहुतिं जुहोतीत्यर्थः॥ मंत्रार्थः। देवीं देवसंबंधिनीं वाचं वाणीं। देवाः प्राणादिवायवः
अजनयंत। उत्पादितवंतः। ततस्तां देवीं वाचं विश्वरूपाः नानारूपाः ऋषिमुनिब्राह्मणादयः पशवः संसर
णत्वात् वदंति॥ पशुरेवं सदेवानामिति श्रुतेः॥ सा नो अस्मान् उपैतु। सन्निहितास्तु। किंभूता। मंद्रा। हर्षक
री॥ इषं रसं। ऊर्जं मन्नादि च दुहाना॥ सुष्टुता। शोभनैर्मंत्रैः स्तुता। इष्टत्रिवीं स्तुता। तत्र दृष्टांतः वत्सान्धेनु
रिवेति॥ ॥ स्थालीपाकस्य जुहोति प्राणेनान्नमशीय स्वाहा। अपानेन गंधानशीय स्वाहा। चक्षुषा रूपाण्यशी
य स्वाहा। श्रोत्रेण यशोऽथ शीय स्वाहेति॥ ॥ स्थालीपाकस्यैतस्यवयवलक्षणं षष्ठी। स्थालीपाकस्य चरोः प्रा
णेनान्नमशीय स्वाहेति प्रतिमंत्रं चतुर्भिर्मंत्रैश्चतस्र आहुतीर्जुहोति। ततः स्विष्टकृदादि प्राशनांतं। मं
त्रार्थः॥ प्राणेन वायुनान्नमन्नमशीय अन्नं प्राप्नुयां लभेयं॥ अपानेन वायुना गंधान् परिमलान् लभेयं। ८

॥१४७॥
॥गदा॥

वमग्रेपियोज्यं॥ ॥प्राशनांतेसर्वान्रसान्सर्वमन्नमेकतउद्धृत्याथैनंप्राशयेन्मस्रीऽं हंतेतिवाहंतकारं
मनुष्याइतिश्रुतेः॥ ॥प्राशनांतेकर्मणिसर्वान्रसान्कटुमधुरतिक्तकषायादीन्सर्वमन्नंन्दध्येनो
ज्ज्वलेह्वेवोष्यंपेयंचैकतः॥एकस्मिन्स्वर्णादिपात्रेउद्धृत्याथैनंकुमारंतस्माद्वेगृहीत्वातूष्णींप्राश
येत।हंतेतिवामंत्रेणप्राशयेत॥तस्यैद्वौस्तनौदेवाउपजीवंतिस्वाहाकारंचवषट्कारंचहंतकारंमनुष्याः॥
स्वधाकारंपितरइतिश्रवणात॥श्रुतिरपिद्विलिंगान्यतास्मरणस्यद्योतिकाभवति॥नन्वग्रमुद्धृत्यबाल
णपदीतेतत्रकृतार्थमेतत्तद्दर्शनमितिचेत।नैषदोषः॥अन्नप्राशीतिकामविष्यति।एकतोद्धृत्यतत्रछं
दसः संधिः॥मार्कंडेयः॥देवतापुरतस्तस्यधात्र्युत्संगगतस्यच॥अलंकृतस्यदातव्यमन्नंपात्रेसकांचने
।मध्वाज्यदधिसंपुक्तंप्राशयेत्पायसंतुवेति।गुणफलमाह॥ ॥भारद्वाज्यामांऽसेनवाक्प्रसारकाम
स्य॥ ॥भारद्वाजीपक्षिविशेषः॥चिटीकेतिप्रसिद्धा॥तस्याः मांसेनवाक्प्रसारः अयंकुमारोवाग्मीस्या
दित्येवंकामोयस्मिन्कुमारस्तस्यप्राशनंकुर्यात॥ ॥कपिंजलमांऽसेनान्नाद्यकामस्य॥ ॥कापे

राम
॥च२॥
॥१४७॥

जल्लः पक्षिविशेषः प्रसिद्धः पद्यपंक्तु मारोच्चादः स्यादितिकामयेत्तदा कपिंजलमांसेन प्राशनं कुर्यात् ॥ एवमग्रेपि
योज्यं ॥ ॥ मत्स्यैर्जवनकामस्य ॥ ॥ जवनः शीघ्रगामी स्यादितिकामयेत्तदा मत्स्यानां मांसेनैकुर्यात् ॥ कृक
षाया आयुष्कामस्य ॥ ॥ कृकषा कंकणहारिका ॥ तन्मांसेन दीर्घायुष्कामस्य प्राशनं ॥ ॥ आट्या ब्रह्मवर्चस
कामस्य ॥ ॥ आटिर्जलचरः पक्षी तन्मांसेन ब्रह्मवर्चसकामस्य प्राशनं कुर्यात् ॥ ॥ सर्वैः सर्वकामस्य ॥ ॥ यो
वा कृषसारादि सर्वान् कामयते तस्य नारद्वाड्यादि सर्वैर्मांसैः क्रमेण प्राशनं कुर्यात् ॥ मिश्रैः प्राशनमिति च
त्यपज्ञः ॥ ॥ अन्नपार्यायवा ततो ब्राह्मणभोजनमन्नपर्यायवा ततो ब्राह्मणभोजनं ॥ ॥ अन्नपरिपाट्या
वा अन्नवत्सर्वमांसान्येकीकृत्य प्राशयेदित्यर्थः ॥ अन्नपरिपाट्या वा क्रमेण प्राशयेत्त्रेकैउ घृत्येति च तैत्यपज्ञः ॥
अन्नपर्यायवेत्यविन्नक्तिकं छांदसं पदं ॥ ततइत्युकार्थं ॥ द्विरुक्तिः कांडसमाप्तिसूचनार्था ॥ ॥ छ ॥ इति
श्रीसमग्राट्टामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये प्रथमकांडे एकोनविंशती कंडिका ॥ ॥ छ ॥ १९ ॥
अथ पदार्थक्रमः ॥ जन्मतः षष्ठे मासे रेवती अश्विनी रोहिणी मृगशिरः पुनर्वसु पुष्य हस्त चित्रा श्रवण

प्राशनं २

त

धनिष्ठा उत्तरात्रयेषु बुधजीवशुक्रवारे शुभलग्ने चंद्रे पूर्वाह्णेपि त्र्यादिः शिशोरन्नप्राशनं कुर्यात ॥ षष्ठे चेत् क्रियते तत
दा गुरुशुक्रास्तमादिदोषाधिकमासादिदोषश्च नास्ति पित्रादिः स्नात्वा शिशोर्मंगलस्नानं कारयित्वा देशका
लौ स्मृत्वा मम अस्य शिशोर्मातृगर्भमलप्राशनशुध्यन्नाद्यब्रह्मवर्चसतेजइंद्रियायुर्बलसिद्धिबीजग
र्भसमुद्भवैनोनिवर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं अस्य कुमारस्यान्नप्राशनाख्यं कर्माहं करिष्ये ॥ ततः स्वस्ति
वाचनाभ्युदयिके कृत्वा पंचसंस्कारान् कृत्वा लौकिकाग्नेः स्थापनं वैकल्पिकपदार्थावधारणे । हंतेति प्रा
शनमिति विशेषः । ततो ब्रह्मोपवेशनाद्याज्यभागांते ॥ ततश्चाज्येन देवीं वाचमिति प्रथमाहुतिः ॥ इदं वाचे न
मम ॥ पुनर्देवीं वाचं वाजो नो अद्येति मंत्राभ्यामाज्येन द्वितीयाहुतिः ॥ इदं वाचे वाजाय न मम ॥ ततः स्थाली
पाकेन चतस्र आहुतयः ॥ प्राणेनान्नमशीय स्वाहा ॥ इदं प्राणाय ॥ अपानेन गंधानशीय स्वाहा ॥ इदं
अपानाय ॥ चक्षुषा रूपाण्यशीय स्वाहा ॥ इदं चक्षुषे । श्रोत्रेण यशोशीय स्वाहा ॥ इदं श्रोत्राय ॥
ततः स्थालीपाकेन स्विष्टकृद्धोमः ॥ ततो महाव्याहृत्यादि प्राजापत्यांता नवाहुतयः ॥ ततः संस्रवप्राशनं

पवित्राभ्यां मार्जनं ॥ पवित्रप्रतिपत्तिः ॥ ब्रह्मणे पूर्णपात्रदानं ॥ प्रणीताविमोकः ॥ ततः सर्वान् रसान् सर्वमन्नं
चैकस्मिन्पात्रे उद्धृत्य सकृदेव हंतेति मंत्रेण कुमारं प्राशयेत् ॥ कामं पयो वा ॥ एकब्राह्मणभोजनं ॥ ततो दशा
ब्राह्मणभोजनं ॥ बालेन्नमात्रमुपवेश्य तदग्रे पुस्तकशस्त्रवस्त्रादिशिल्पानि विन्यस्य जीविकापरीक्षां कुर्यात् ॥
शिशुः स्वेच्छया यत्प्रथमं स्पृशेत्तेनास्य जीविकेति विद्यात् ॥ तदुक्तं कारिकायां ॥ कृतप्राशनमुत्संगाद्धात्री बाल
मुत्सृजेत् ॥ कार्यं तस्य परिज्ञानं जीविकायास्ततः परं ॥ देवताग्रे प्रविन्यस्य शिल्पभाण्डानि सर्वशः ॥ शस्त्राणि
चैव शास्त्राणि ततः पश्येत्तु लक्षणं ॥ प्रथमं यत्स्पृशेद्बालः ततो भाण्डं स्वयं तदा ॥ जीविका तस्य बालस्य तेनैवेति
भविष्यति ॥ गर्गो धानादिकाप्यन्नप्राशनान्तामल्लिकमुचे ॥ अथ कर्णवेधस्य ॥ त्रिपानान्याद्त्साहन्नास्कर: ॥
कुमारोऽप्येतदर्थं कार्यः ॥ इत्यन्नप्राशने पदार्थक्रमः ॥ गर्गमते प्राणापानाय चक्षुषे श्रोत्रायापस्तुपं
गृह्णामीति चरुग्रहणं ॥ प्राशने त्वाधिकः ॥ अन्नन्त्समानं ॥ अथ वर्धापनविधिः ॥ आदित्यपुराणे ॥ स
र्वैश्च जन्मदिवसे स्नातो मंगलवारिभिः ॥ गुरुदेवाग्निविप्राश्च पूजनीयाः प्रयत्नतः ॥ स्वनक्षत्रं च

ल१

॥१४९॥
॥गदा॥

पितरंस्तथादेवः प्रजापतिः ॥ प्रतिसंवत्सरं यत्रा कर्तव्यश्च महोत्सवः ॥ स्वनक्षत्रे स्वनक्षत्रे देवता ॥ स्वनक्षत्रे वित्तपश्चेति कचित्पाठः ॥ तदा वित्तपः कुबेरः ॥ अथ प्रयोगः ॥ तत्र वर्षपर्यंतं प्रतिमासं ततः प्रतिवर्षं तिलतैलेन वांगं समुद्धृत्य तिलतैलेन वस्नावाश्चुक्लवस्त्रयुगं परिधाया चांतो गृह्य स्वंतरत उपविश्य पुण्याहवाचनं कृत्वा ॐ अद्येत्यादि पूजन्मदिने दीर्घायुष्य सोमार्कईश्वरादीनां पूजन नमहं करिष्ये इति संकल्प्य ॥ तत्र निर्विघ्नार्थं गणपतिपूजनमहं करिष्ये ॥ ॐ गणपतये नमः ॥ इति गंधादीनि दत्वा प्रणम्य ॐ गणपते क्षमस्वेति विसर्जयेत् ॥ एवं गौरी पद्मा शची मेधा सावित्री विजया जया देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥ तुष्टिं पुष्टिं आत्मकुलदेवतां पूजयेत् ॥ ततो घृतेन वसोर्धारां कुर्यात् ॥ ततः ॐ गणपतये नमः ॥ दुर्गायै नमः कुलदेवतायै नमः ॥ गुरुभ्यो नमः ॥ देवताभ्यो नमः ॥ अग्नये नमः ॥ विप्रेभ्यो नमः ॥ पितृभ्यो नमः ॥ सूर्याय नमः ॥ मंगलाय नमः ॥ बुधाय नमः ॥ बृहस्पतये नमः ॥ शुक्राय नमः ॥ शनैश्चराय नमः ॥ राहवे नमः ॥ केतुभ्यो नमः ॥ पंच

सोमाय नमः ॥ २

४ धृति
मातृभ्यो०

राम

॥१५२॥
॥१४९॥

ऋतेभ्यो नमः ॥ कालाय नमः ॥ युगाय नमः ॥ संवत्सराय नमः ॥ मासाय नमः ॥ पक्षाय नमः ॥ अस्मज्ज
न्मतिथये नमः ॥ अस्मज्जन्मनक्षत्राय नमः ॥ अस्मज्जन्मराशये नमः ॥ त्रिवाये नमः ॥ संक्रांत्यै नमः ॥ प्री
त्यै नमः ॥ संतत्यै नमः ॥ अनुसूयायै नमः ॥ क्षमायै नमः ॥ विष्णवे नमः ॥ ब्रह्माये नमः ॥ इंद्राय नमः ॥ अ
ग्नये नमः ॥ यमाय नमः ॥ नैर्ऋतये नमः ॥ वरुणाय नमः ॥ वायवे नमः ॥ धनदाय नमः ॥ ईशानाय नमः ॥
अनंताय नमः ॥ ब्रह्मणे नमः ॥ इति संपूज्य षष्ठिके इहागच्छ इह तिष्ठेत्यावाह्य पाद्यादिकं दद्यात् ॥ ॐ जगन्मा
तर्जगद्धात्रि जगदानंदकारिणि ॥ प्रसीद मम कल्याणि नमोस्तु षष्ठिदेवते ॥ इति मंत्रेण पुष्पांजलिं
त्रयेण संपूज्य गंधादिकं दत्वा वरं प्रार्थयेत् ॥ रूपं देहि यशो देहि भगं भवति देहि मे ॥ पुत्रान्देहि धनं
देहि सर्वान्कामांश्च देहि मे ॥ इति वरं प्रार्थ्य प्रणम्य विसर्जयेत् ॥ ततश्चंदनेनाष्टदलं कृत्वा तन्मध्ये
तो नाह्वय ग्रैलगरुन् मार्कंडेय इहागच्छ इह तिष्ठेत्यावाह्य स्थापयित्वा इदमनुलेपनं ॐ मार्कंडेयाय
नमः ॥ इति वंदनं दद्यात् ॥ ॐ आयुःप्रद महाभाग सोमवंशसमुद्भव ॥ महातपो मुनिश्रेष्ठ मार्कंडेय

ॐ मार्कंडेय महाभाग सप्तकल्पांतजीवन॥ १

॥१५०॥
॥८८॥

नमोऽस्तु ते॥ इति पुष्पांजलित्रयेण संपूज्य गंधादीनि दत्वा वरं प्रार्थयेत्॥ ॐ मार्कंडेयाय मुनये नमस्ते महा
दायुषे। चिरंजीवी यथा त्वं भो तथा विष्णामि तपोमुने॥ मार्कंडेय महाभाग सप्तकल्पांतजीविन॥ आयुरारो
ग्य सिध्यर्थमस्माकं वरदो भव॥ नानाणामायुरारोग्यैश्वर्य सौख्यैः सुखप्रद।। सौम्यमूर्ते नमस्तुभ्यं नत्वा गु
वं ज्ञाव पथ॥ महातपो मुनिश्रेष्ठ सप्तकल्पांतजीवन॥ मार्कंडेय नमस्तेस्तु चंदीर्घायुष्यं प्रयच्छ मे॥ मार्कं
डेय महाभाग प्रार्थये त्वां कृतांजलिः॥ चिरंजीवि यथा त्वं भो तथा विष्यहं तपो मुने॥ इति वरं प्रार्थ्य प्रणम्य
अश्वत्थाम्ने नमः॥ बलये नमः॥ व्यासाय नमः॥ हनुमते नमः॥ बिभीषणाय नमः॥ कृपाय नमः॥ प
रशुरामाय नमः॥ कार्तिकेयाय नमः॥ जन्मदेवतायै नमः॥ स्थानदेवतायै नमः॥ प्रसन्नदेवतायै नमः॥
वासुदेवाय नमः॥ क्षेत्रपालाय नमः॥ पृथिव्यै नमः॥ अग्नये नमः॥ तेजसे नमः॥ वायवे नमः॥ आका
शाय नमः॥ इत्यष्टदिग्भागे संपूज्य प्रार्थयंतौ देवताः सर्वाः पूजां गृह्णंतु ता मम॥ प्रयच्छंत्वायुरारोग्यं पुत्राः सौ
ख्यं च संपदः॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं महामुने॥ यदर्चितं मया देव परिपूर्णं तदस्तु मे॥

२ मस्त्र
१ रा

नाम
श्लो ३
॥४८॥
॥१५०॥

ॐ दत्तायनमः १४

इति षष्ठिव्रतातिलवपनं॥ ब्राह्मणायतिलदानं। देशस्मृत्वा मासि संपूज्य कुशात्रयतिलजलान्यादाय गंधमदीपज
न्मदिने दीर्घायुष्कामएतान्तिलान्सोमदेवतान्यथानामगोत्रायब्राह्मणायदातुमहमुत्सृजे इति दद्या
त्॥ ततो घृताक्ततिलैर्व्याहृतिभिर्होमः॥ ततः पयसा सर्वेभ्यो भूतेभ्यो बलिं नम इति॥ बलिं दद्यात्॥ तंडुलेभ्यो
नम इति॥ बलिं संपूज्य जलेनासिक्ता कुशात्रयतिलजलान्यादाय गंधमदीपजन्मदिने दीर्घायुष्का
मएतान्सोपकरणान्तंडुलान्यथानामगोत्रायब्राह्मणायदातुमहमहमुत्सृजे। घृतायनम इति घृ
तं संपूज्य जलेनासिक्ता गंधमदीपजन्मदिने दीर्घायुष्कामइदं घृतं प्रजापतिदैवतं यथानामगोत्रायब्राह्म तं
णायदातुमहमुत्सृजे॥ ततस्तिलगुडसहितदुग्धपानं॥ तत्रमंत्रः॥ अंजल्यर्धमितं क्षीरं सतिलं गुड
मिश्रितं। मार्कंडेयवरंलब्ध्वा पिबाम्यायुष्यहेतवे। इति तिलगुडसहितदुग्धं पीत्वाचम्य। मार्कंडेया
य नमः॥ गोभ्यो नमः॥ ब्राह्मणेभ्यो नमः॥ इति प्रणम्य मार्कंडेयं प्रसमस्तेति विसर्जयेत॥ अश्वत्थामा ब
लिर्व्यासो हनुमांश्च विभीषणः। कृपः परशुरामश्च सप्तैते चिरंजीविनः॥ सप्तैतान्यः स्मरेन्नित्यं मार्कं

॥१५७॥
॥गदा०॥

अ

डेपन्नपापेमं जीवेद्वर्षशतं साग्रं सर्वव्याधिविवर्जितः ॥ इति वचनादश्वत्थामादि मार्कंडेयांतानष्टौ स्मरे
त् । इदं च वर्धापनं यदि जन्ममासो संक्रांतः स्यात्तदा शुद्धमास एव कार्यं न त्वधिके ॥ इदं वर्धापनं यावज्जीवं पित्रादि
भिः कार्यं ॥ पश्चात्प्रतिवर्षं स्वयमेवेति ग्रंथांतरे तु मांगल्यस्नानेन कृत्वा कुमुदादिदेवताः संपूज्य पणा शक्ति
ब्राह्मणभोजनं दक्षिणां च दत्वा सुवासिनीभिर्नीराजितो घृतनूतनवस्त्रैर्ब्राह्मणेभ्यः । त्रीन् मुष्टीन् स्नाप
पपूरिकाः सात्याः कुमुदादिप्रीतये श्यापुर्वक्षु येच वासनानि दद्यात् । जन्मादिदेवताप्रीत्यै च दद्यात् ॥
वर्षांते सद्रप्पावाद्य गावं गोपेटिकास्थमोदकादिखाद्यं निधाय नूतनवस्त्राच्छादिताः पेटिका जीवत्सातिपु
त्राभ्यो दत्वा तदाशिषो गृह्णीयात् ॥ इदं सर्वं जीवत्पितृमाते वा पत्यापुत्रे कुर्यात् ॥ ॥ इति श्रीसाम्राज्य
मनोत्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये प्रथमकांडे समाप्तं ॥ ॥ श्रीविश्वेश्वरार्पणमस्तु ॥ ॥ राम ॥
शाके १६८३ वृषेश्वर नाम संवत्सरे माघशुक्लपौर्णिमा इदं पुस्तकं ॥ १५७ ॥
कूर्मारेस्वरात्मजत्र्यंबकेन स्वहस्तेन लिखितं पायतोंडे पनाम्ना स्थिंद पुस्तकं गंगाधरयाः ॥ स्वरः ॥

॥ अथ गृह्यसूत्र गदाधर भाष्ये द्वितीयकांडे प्रारंभः ॥

॥१॥

॥ ॐ श्रीगणेशाय नमः ॥ ॥ चूडाकरणमाह ॥ ॥ सांवत्सरिकस्य चूडाकरणं ॥ ॥ संवत्सरो जातो यस्य स सांवत्स-
रिकः ॥ तस्य बालकस्य चूडाकरणं चूडाकरणाख्यं कर्म कुर्यादि[illegible]शेषः ॥ चूडाकरणमिति वक्ष्यमाणकर्मणो नामधे-
यं ॥ तृतीये वाप्रतिहते ॥ ॥ अथवा तृतीये संवत्सरे अप्रतिहते असंपूर्णे असमाप्ते चूडाकरणं कुर्यात् ॥ ॥ षोडशवर्ष-
स्य केशांतः ॥ ॥ केशांत इति संस्कारकर्मनामधेयं ॥ षोडशवर्षाण्यतीतानि यस्य स षोडशवर्षः ॥ तस्य पुरुषस्य के-
शांताख्यः संस्कारः स्यात् । अयं च निपतकाल एव ॥ अतो विवाहिताविवाहितयोर्भवतीत्युपरामः ॥ अत्र कारिका-
यां ॥ केशांतः षोडशे वर्षे ब्राह्मणस्य विधीयते ॥ राजन्यवैश्ययोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः ॥ इति कर्मणस्तत्त्वलके-
शांतकल्पनमत्र भगवता कृतं ॥ ॥ यथामंगलं वा सर्वेषां ॥ ॥ अथवा यथामंगलं यथाकुलाचारं चूडाकरणं कार्यं ॥
यस्य कुले सांवत्सरिकस्य कुमारस्य कुर्वंति तस्य सांवत्सरिकस्य चूडाकरणं ॥ यस्य कुले तृतीयेऽब्दे कुर्वंति तस्य तृतीये
असंपूर्णे कार्यमिति व्यवस्था ॥ यस्य कुले नियमो नास्ति तस्य विकल्पः ॥ यथामंगलशब्देन केचित्कालानंतरं का-
र्यं ल्पयंति ॥ अत्र स्मृत्यंतरोक्ताः काला उच्यंते ॥ नारदः ॥ जन्मतस्तु तृतीयेऽब्दे श्रेष्ठमिच्छंति पंडिताः ॥ पंचमे सप्तमे वा

राम

॥१॥

भवेत्

पि जन्मतो मध्यमं स्मृतं॥ अधमं जन्मतो वापि नवमे कादशेपि वेति। बृहस्पतिः॥ तृतीयेब्दे शिखो गर्भाज्जन्मतो वावि

चौ

शेषतः॥ पंचमे सप्तमे वापि स्त्रियाः पुंसोपि वा समं॥ प्रयोगपारिजाते॥ आद्येब्दे कुर्वते केचित्तंचमे वेद्वितीयके। उपनी
त्यासहैवेति विकल्पाः कुलधर्मतः॥ कारिकायां॥ सौंवत्सु दगयने शुक्लपक्षे विशेषतः इति॥ बृहस्पतिः॥ शुक्लप
क्षे शुभं प्रोक्तं कृष्णपक्षे शुभेतरं तं॥ अशुभो त्र विज्ञागः स्यात्कृष्णपक्षे निराकृते। कारिकायां॥ अश्विनी श्रवणस्वा
ती विशाखा पुष्य पुनर्वसुः॥ धनिष्ठा रेवती ज्येष्ठा मृगहस्तेषु कारयेत्॥ तिथिं प्रतिपदारिक्तां पातं विष्टिं विवर्जयेत्॥
वाराः शनैश्चरादित्य भौमानां रात्रिमेव च॥ बृहस्पतिः॥ पापग्रहाणां वारो दो विप्राणां शुभदं रवेः॥ क्षत्रियाणां
कृमासूनोर्विट्छूद्राणां शनैः शुभं॥ वसिष्ठः॥ द्वित्रिपंचसप्तम्यामेकादश्यां तथैव च॥ दशम्यां च त्रयोदश्यां का
र्यं क्षौरं विजानता॥ ग्रंथांतरे॥ षष्ठ्यष्टमी चतुर्थ्यश्च नवमी च चतुर्दशी॥ द्वादशी दर्शपूर्णे द्वे प्रतिपच्चैव नींदिताः॥
सर्वेषामिति सर्वेषां वर्णानामित्यर्थः॥ जर्तयज्ञत्राप्येतु यस्यपादशो ब्राह्मणभोजने मंगलबुद्धिः सताद्दशां वा
ह्मणभोजनं कृत्वा चूडाकरणं कुर्यादिति सत्रं योजितं॥ चूडाकरणकालोभिहितः। कर्मोह॥ ॥ब्राह्मणान्भो

॥२॥ ॥दस्रौ२॥

जप४

जयित्वा माता कुमारमादाय स्नात्वाहतेवाससी परिधायांकमाधाय पश्चादग्नेरुपविशति॥ ॥आभ्युदयिकश्राद्ध
ब्राह्मणभोजनव्यतिरिक्तौ न ब्राह्मणान्भोजयित्वा माता कुमारजननी कुमारं स्वपुत्रमादाय हस्ते गृहीत्वा स्ना स्नाप्य
स्नापयित्वा अहतेन वेपंत्रमुक्तेन केचै धौतेवाससा वस्त्रे परिधाप्य परिहितेकारयित्वा अंकमाधाय ते कुमारं अं
केस्वउत्संगेस्थापयित्वा अग्नेः पश्चादुपविशति। मातरि रजस्वलायां तु विशेषः॥ बृहस्पतिः॥ प्राप्तमाभ्युदयश्रा
द्धं पुत्रसंस्कारकर्मणि॥ पत्नी रजस्वला चेत्स्यान्नकुर्यात्र पिता तदा॥ पितेति कर्तृमात्रोपलक्षणं॥ दोषमाह गर्ग
विवाहोत्सवयज्ञेषु माता यदि रजस्वला। तदा समस्तमाप्नोति पंचमंदिवसं विनेति॥ अग्रेस्तु मुहूर्तालाभे तु वा कुमारं पलाने
स्तु मुहूर्तस्य रजोदोषसंस्थिते॥ श्रियं संपूज्य विधिवत्ततो मंगलमाचरेदिति॥ कुमारस्य मातरि गर्भिण्यामपि
चूडाकर्म न कार्यं॥ तथा च बृहस्पतिः॥ गर्भिण्यां मातरि शिशोः क्षौरकर्म न कारयेत्॥ व्रतानि षेकेप्येवं स्यात्काले
वेदव्रतेष्वपि॥ मदनरत्ने। पुत्रचूडाकृतौ माता यदि स्याद्गर्भिणी भवेत्॥ शस्त्रेण मृत्युमाप्नोति तस्मात्क्षौरं विव
र्जयेत्॥ एतदपवादोपि तत्रैव॥ सूनोर्मातरि गर्भिण्यां चूडाकर्म न कारयेत्॥ पंच...त्पागतऊर्ध्वं गर्भिण्य

प

राम

॥घर॥ ॥श्री॥

श्री२

मपिकारयेत्॥ सहोपनीत्याकुर्याच्चेत्तत्र दोषो न विद्यते। गर्भे मातुः कुमारस्य न कुर्याच्चौलकर्म तु॥ पंच मासादधः कु
र्यादत ऊर्ध्वं [illegible] कारयेत्॥ पंचमासादत ऊर्ध्वं मातुर्गर्भस्य जायते मस्तुरितितत्रैवोक्तं। कुमारस्य ज्वरोत्पत्तौ न कार्यमि
त्याह॥ गर्गः॥ ज्वरस्योत्पादनं यस्य लग्ने तस्य न कारयेत्॥ दोषनिर्गमनात्पश्चात्तस्यैव धर्मं समाचरेद्यत॥ लग्नमितिस
र्वमंगलोपलक्षणं॥ ॥अन्वारब्धआज्याहुतीर्हुत्वाप्राशनांते शीतास्वप्सु आसिंचत्युष्णेनवायउदकेनेत्यादि
ते केशान्वपेति केशश्मश्रुवपति च केशांते॥ ॥ब्रह्मणान्वारब्धआघारादिस्विष्टकृदंता आज्याहुतीर्हुत्वा संस्रवप्रा
शनांते शीतास्वप्सु पूर्वमुपकल्पितास्वप्सु उष्णा अप आसिंचति॥ प्रक्षिपति॥ उष्णेन वाय उदकेनेहीति मंत्रेण॥ केशां
ते तु उष्णेन वायउदकेनेह्यदिते केशान्वपेति मंत्रेण विशेषः॥ कुमारेण अन्वारंभः कार्य इति मर्तृयज्ञमते वि
शेषः॥ मंत्रार्थः॥ रविकिरणसंबंधादंतर्गतज्योतिषा वायोरुष्णत्वं॥ हे वायो त्वमपि॥ अथात्र नवनीतपिंडं घृत
पिंडं दध्नो वा प्रास्यति उष्णोदकसेकानंतरं अ[illegible]त्र प्रकृतोदके नवनीतस्य पिंडं घृतस्य पिंडं दध्नो वा पिंडं प्रास्यति॥
प्रक्षिपति॥ अस्तु क्षेपणे॥ ततआदायदक्षिणेन गोदानमुंदति सविश्राप्रस्तोदैव्याआपउंदंतु ते तनं॥ दीर्घायुत्वाय व
[illegible]दके न[illegible]हीतेन कुमारस्य शिरः प्रक्षालनाय रहि॥ हे अदिते देवमातः केशान्लक्ष्मीस्य स्वकेशार्द्रवर्तुणार्थं शीतोदकमध्ये
[illegible]छोदकं [illegible] कार्यत्वाद्धातो॥३

तत्तस्मै ...रनार्थं दक्षिणां गोदानं गां वीरं व्यांदयते निधीयते स्त्रीभ्यो ... काले दानं गोदानं ॥

॥२॥
॥गदा॥
सेलौका

वैसइति॥ ॥ततस्तस्माघृतनवनीतादीनामन्यतमपिंडप्रासनेंदक्षिणकर्णसमीपशिरःप्रदेशांउंदति॥उंदीक्ले-
दने॥क्लेदयति॥आर्द्रीकरोति॥सवित्रेतिमंत्रेण॥मंत्रार्थस्तु॥हेकुमारस विश्वस्यर्येणप्रसूताजनिताउत्पादिताआ-
पःदेवाःदिव्याःजिनवाः॥तितवतनुंशरीरंचूडालक्षणमंगंउंदंतुक्लेदयंतु॥ किमर्थं॥ तवदीर्घायुत्वायचिरंजीवनार्थं॥
वर्चसेप्रतापाय॥ ॥त्रेण्याशलल्याविनीयत्रीणिकुशातरुणान्यंतर्दधात्योषधइति॥ ॥त्रिषुस्थानेषुएनी-
श्वेतात्र्येणीशललीसेकातयाक्लिन्नान्केशान्विनीयपृथक्कृत्वाविरलान्कृत्वात्रीणिकुशातरुणानिदर्भतरुणानं-
तर्मध्येदधातिधारयति॥ओषधेत्रायस्वेतिमंत्रेण॥ ॥शिवोनामेतिलोहक्षुरमादायनिवर्त्तयामीतिप्रवपति॥
ततःकर्त्ताशिवोनामेतिमंत्रेणलोहक्षुरं॥लोहेनताम्रेणपरिष्कृतमयोमयंक्षुरमादायहस्तेनगृहीत्वानिवर्त्तया-
मीतिमंत्रेणप्रवपतितंक्षुरंकुशातरुणान्यंतर्हितेषुकेशेषुसंलागयतिस्थापयति॥प्रपूर्वोवपतिःसंलागने
॥छेदनार्थत्वेतुतरस्यत्रविहितछेदनमनर्थकंस्यात्॥शिवइत्यस्यार्थः॥हेक्षुरयस्त्वंशिवोनामासिशांत
नामासिस्ववसितेतववस्त्रधितिर्वज्रंपिता॥हेभगवन्तस्मैतुभ्यंनमः॥ मामामाहिंसीःमाविनाशय

गाम
॥धर॥
॥२॥

॥ निवर्त्तयामीत्यस्यार्थः ॥ निवर्त्तयामि मुंडयामि ॥ न्नाविनिष्क्रांतोप्रवासात् ॥ आयुषे आयुरर्थं ॥ अन्नाद्याय ॥ अन्नादना
य ॥ प्रजननाय प्रजोत्पत्त्यै ॥ रायस्पोषाय धनस्य पुष्ट्यै ॥ सुप्रजास्त्वाय ॥ शोभनापत्यत्वनाय: सुवीर्याय शोभनवी
र्याय ॥ ॥ येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् ॥ तेन ब्रह्माणो वपतेदमस्यायुष्यं जरदष्टिर्यथा
सादिति सकेशानि प्रक्षिप्य घानडुहे गोमयपिंडे प्रास्यत्युत्तरतो ध्रियमाणे ॥ ॥ येनावपत्सवितेति मंत्रेण सकेशानि
केशसहितानि कुशतरुणानि प्रक्षिप्य प्रक्षिप्य वा खंडयित्वा अग्नेरुत्तरतो ध्रियमाणे ऽनडुहस्य गोमये आनडु
हे बलीवर्द गोसंबंधि मये पिंडे गोपुरीषे तानि प्रास्यति प्रक्षिपति ॥ अत्र गोमयपिंडस्य स्थापनं कार्यं ॥ ततः के
शान्प्रक्षिप्य पिंडे प्रासनं ॥ अत्र केशान्प्रक्षिप्येति पाठो दर्शितः कर्कमते तु पक्षांतरे सकेशानीति केचित्पठंति तेषां
कुशतरुणानीति कुशतरुणविषयं ॥ नपुंसकमिति मते तु पक्षे प्राचीनपाठो दर्शितः ॥ मंत्रार्थः ॥ हे ब्रह्माणः ॥ ये
न क्षुरेण तेजोमयेन सविता सूर्यः सोमस्य राज्ञो वरुणस्य च शिरः ॥ वपत् । राज्ञस्तु यदीक्षायै अमुंडयत् । विद्वान्सर्व
ज्ञः तेन क्षुरेणास्य शिशोः शिर इदं शिरोऽयं वपत मुंडयत ॥ इदं शिरः अस्य कुमारस्य आयुषे हितं आयुष्यं आयुषोपाव
सत्ता ॥ यथायं कुमारः जरदष्टिः संपूर्णायुरसत् ॥ स्यात् ॥ जरामश्नुते व्याप्नोति ॥ जरदष्टिर्जरासज्ञावः ॥

॥४॥
॥गृह्य॥
उंदनं २

स्या

एवं द्विरपरं तूष्णीं॥ ॥एवमेवोत्तरस्यां दिवारं तूष्णीं मंत्रं विनोंदनादि गोमयपिंडे निधानांतमपरं दक्षिणत एव गोदानेकर्म कुर्यात्॥ अथैवं पदार्थः॥ केशानां विनयनं॥ दर्भेणांतर्धानं॥ छेदनं निधानं॥ सकेशानां छेदनं॥ गोमयपिंडे प्रासनं॥ इतरयोश्चोंदनादि॥ इतरयोः पश्चिमोत्तरयोर्गोदानयोरुंदनादि चकारादेवमेव सकृन्मंत्रेण द्विस्तूष्णीं कर्म कुर्यात्॥ तत्र सर्वं पश्चिमगोदाने कृत्वा उत्तरगोदाने कार्यं। अथ पश्चाद्यथोत्तरत इति सं चकारप्रत्याम्नायः॥ प्रादक्षिण्यानुग्रहार्थः॥ उंदनादानं तु मंत्रेण पुनर्न भवति सकृद्गृहीतत्वात्॥ ॥अथ पश्चात्त्र्यायुषमिति॥ ॥इतरयोश्चोंदनादीत्युक्ते तत्र स एव मंत्रो मा भूदित्याह॥ पश्चात् पश्चिमगोदानकर्मणि त्र्यायुषमिति मंत्रेण सकेशानां क्षुरात्प्राणां छेदनं कुर्यात्॥ त्रीण्यायूंषि समाहृतानि बाल्ययौवनस्थाविराणि तेषामेवावस्थात्रयव्यापकमायुरस्माकमस्त्विति मंत्रार्थः॥ ॥अथोत्तरतो येनावपत् सविता क्षुरेणादि वं ज्योक्च पश्चाद्धि सूर्यं॥ तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय सुश्लोक्याय स्वस्तय इति॥ ॥अथोत्तरगोदान कर्मणि सकेशानां क्षुरात्प्राणां येनावपत् सवितेति मंत्रेण छेदनं कुर्यात्॥ अन्यत्सर्वं दक्षिणगोदानवत्कार्यं॥

राम

॥घृ०॥
॥४॥

दक्षिणकर्णोदारभ्य प्रदक्षिणं शिरसः ६

मंत्रार्थस्तु ॥ येन ब्रह्मणा मंत्रेण तपसा वा वरुण शीतो वायुः ज्योक् चिरं च आकल्पमित्यर्थः ॥ दिवं द्यां पश्चात् ताम
नुसरयति च अनुविसर्पं च चरति । किंभूतः । भूरिः प्रचुरः ॥ तेन ब्रह्मणा तपसा वा तन्मंत्रित क्षुरेण ते तव शिरः वपा
मि ॥ कमर्थं । जीवातवे जीवनहेतवे दीर्घमायुर्घर्षः जीवनाय पुष्टये । सुश्लोक्याय ॥ श्लोकोऽन्नं यशो वा ॥ स्वस्तये अ
विनाशाय ॥ ॥ त्रिः क्षुरेण शिरः प्रदक्षिणं परिहरति समुखं केशांते यत्क्षुरेण मज्जयता सुपेशसा वप्ता वा व
पति केशान् छिंधि शिरो मास्यायुः प्रमोषीः मुखमिति च केशांते ॥ ॥ त्रिवारं क्षुरस्नापनेन शिरः मस्तकं
परिहरति । सम्यक् अनंतरोक्तेन दक्षिणकर्णपर्यंतं यत्क्षुरेणेति मंत्रेण क्षुरं स्नापयतीत्यर्थः ॥ समुखं केशांते । मुख
सहितं शिरः परिहरति केशांतकर्मणि । मंत्रेपि विशेषः ॥ केशांते मुखमिति पदं मंत्रे अधिकमावपेत् ॥ यत्क्षुरेणे
ति सकलमंत्रेण हितस्तस्य शिरः परिहरणं हे क्षुर ॥ यत् यस्मात् क्षुरेण वप्ता मुंडयित्वा आवपति गोमये केशा
न् क्षिपति । किंभूतेन मज्जयता संस्कुर्वतो तान्निरङ्गिः शिरः समुपता पितापक्षुरं प्रपछ तस्य एवं परि
तपेन ॥ ॥ तान्निदीतोत्सान्निरङ्गिकुमारस्य शिरः समुद्य आर्द्रं विधायनापितापक्षुरेक नैजाति विशेषापक्षुरं च क्षु
तथा सुपेशसा । शोभयता अतो अस्य केशान् छिंधि । अवखंडय । शिरो मस्तकं मा छिंधि । मा लुवणं कुरु ।
अस्य मा आयुः प्रमोषीः मा अपहर ॥ २

कं
पिंडे

॥५॥
॥गदा॥

एवं परिवपेत्तनेन मंत्रेण प्रयच्छति॥ ददाति॥ मंत्रार्थः॥ हेनापितत्वं अस्य शिरः अस्य शिरः अक्षुरावेत्रज्ञ तं यथा
स्यात्तथा परि[illegible] समंतात् वपामुंडयायथा मंगलं केशाशेषकारणं॥ केशानां शेषकारणं यथा मंगलं कुलाचार
व्यवस्थामनतिक्रम्य भवति। कुलाचारा अबहुधा अत्र कारिकायां॥ केशशेषं ततः कुर्याद्यस्मिन् गोत्रे यथो
चितं। वासिष्ठा दक्षिणे [illegible] भागे उभय त्रा पि काश्यपाः॥ शिखां कुर्वंत्यंगिरसः शिखाभिः पंचभिर्यतः पारितः के
शपंक्त्या वा मुंडा अन्ये गवो मताः॥ कुर्वंत्यन्ये शिखामत्र मंगलार्थमिह क्वचित्॥ लौगाक्षिः॥ दक्षिणतः कंबुज
वसिष्ठानामुभयतो त्रिक रुपणानां॥ मुंडा भृगवः पंचचूडा अंगिरसः॥ वाजसनेयिनामेका। मंगलार्थे शि
खिनोन्य इति॥ एतच्छूद्रातिरिक्तविषयं॥ शूद्रस्येति यतः केशविशेषा इति वासिष्ठोक्तेः॥ यत्तु पाद्मे॥ न शिख
नोपवीती च नो चरेत् संस्कृतो गिरमिति शूद्रमुपक्रम्योक्तं तदसच्छूद्रस्येति केचित्॥ विकल्प इति तु युक्तं॥ ॥
अनुगुप्तमेतं सकेशं गोमयपिंडं निधाय गोष्ठे पल्वलोदके तीरे वा॥ ॥ततो वपनानंतरं सर्वान्केशाननुगोम
यपिंडमुल्का गोमयपिंडं वस्त्रादिवेष्टनेनानुगुप्तावृतं कृत्वा गोष्ठे गवां व्रजे स्थापयेत्॥ अथवा पल्वलेऽल्पे

राम

॥चूर
॥५॥

२२ च्यं ददाति अभिलिख

य

दके सरसि स्थापयेत् ॥ उदकांते पत्रकुत्र चिद्दुदकसमीपे वा स्थापयेत् ॥ ॥ आचार्याय पवरं ददाति ॥ ॥ ततश्चू
डाकरण कर्मकर्ता पित्रादि स्वाचार्याय पवरं अभिलषितं द्रव्याभावे चतुःकार्षापणोवर इति मूल्याध्यायो क्त द्रव्यदा
नमिति वृद्धः ॥ ॥ गोंकेशांते ॥ ॥ केशांतकर्मणि केशांतसंस्कारकर्त्ता स्वाचार्याय गां ददाति संस्कार्यस्याचार्यायेति
हरिहरः ॥ ॥ संवत्सरं ब्रह्मचर्यमवपनं च केशांते ॥ ॥ केशांतकर्मानंतरं केशांतकर्माणायः संस्कृतः संवत्सरं प
वह्मचर्यं चरेत । स्त्री संभोगं न कुर्यादित्यर्थः ॥ ॥ अवपनं च ॥ केशांतोत्तर काले संस्कृतः संवत्सरं वपनं वर्जये
त् ॥ चशब्दः संवत्सरानुवत्यर्थः ॥ केशांतकर्मोत्तरं अवपनं चयावज्जीवं शास्त्रीयवपना ति करेकेणेति वासुदेवह
रिहर गर्गाः ॥ द्वादशरात्रं षड्रात्रं त्रिरात्रमंततः ॥ ॥ संवत्सरं ब्रह्मचर्यमवपनं च ॥ द्वादशरात्रं वा ॥ षड्रात्रं वा
त्रिरात्रं वा । एते चत्वारो विकल्पाः पूर्वापूर्वाभावे त्वया ॥ अत्रेस्मिं संतरोक्तो वपने विधिः ॥ विशेष श्रोच्यते । गंगायां भ
स्कर क्षेत्रे माता पित्रोर्गुरोर्मृतौ ॥ आधाने सोमपाने च वपनं सप्तसु स्मृतं ॥ तथा ॥ मुंडनं चोपवासश्च सर्वतीर्थे
ष्वयं विधिः ॥ वर्जयित्वा कुरुक्षेत्रं विशालं विरजं गयां ॥ तथा च विष्णुः ॥ प्रयागे तीर्थयात्रायां पितृमातृवियो

इतिनिषे ...व शः स्पोतिश्चनीच केन्द्रात्तविधानात् कर्तनादिना नीचवत्तसपादना ...मुड नस्यैषे धे पिके र्तनंतु विधीय १

१८

॥ ६॥ ॥गदा॥

गतः। कचानां वपनं कुर्यात् तृपानविकचोभवेत्॥ इति बृहस्पतिवचनात्॥ नारतो। प्राङ्मुखः श्मश्रुकर्माणि कारयीत समाहितः। उदङ्मुखो वापयानं स्नात पापुर्विंदते महत्॥ अपरोर्के। के वा श्मश्रुलोम नखान्युदकु संस्कृ निवापयेत। दक्षिणे कर्णे मारभ्य धर्मार्थे पापासंबद्धे... वेके वा घृतं व संस्कारे स्त्री खाघृतं च स्त्री रोवपेत॥ यतीनां तु विशेषो निगमे। कक्षोपस्थ स्त्री खावर्जं ऋतुसंधिषु वापयेदिति॥ १॥ छ ॥ इति श्रीगदाधरकृते गृह्यसूत्रभाष्ये द्वितीयकांडे प्रथमकंडिका॥ ॥छ॥ अथ पदार्थक्रमः॥ ॥तत्र कालस्तावत् प्रथमे द्वितीये पंचमे॥ सप्तमे वा वर्षे गते तृतीये वा गेऽगते तृतीयनागे वा उपनीत्यासह वा पयाकुलाचारं चौलं कार्यं॥ तत्रापि द्वितीये प्रामे मतोमुख्यं॥ गर्भतो गौणं॥ उदगयने शुक्लपक्षे गुरुशुक्रयोर्बाल्यवार्धकास्तमयाभावे अधिके च मासेऽज्योतिः शास्त्रोक्ते प्रशस्ते तिथिवारलग्नेषु मुहूर्ते दिन एव न तु रात्रौ कार्यं॥ तत्र मातृपूजाभ्युदयिकश्राद्धं कुमारस्य हविष्यालापनादि मंगलकरणं॥ ततो ब्राह्मणत्रयभोजनं॥ ततः संकल्पः॥ देशकालौ स्मृत्वा कुमारस्य बीजगर्भसमुद्भवैनो निबर्हणबलायुर्वर्चोभिवृद्धिद्वारा श्रीपरमेश्वरप्रीत्य

दोवर्षेजन...

राम

॥ धस॥ ॥ ६॥

ध्ये ८

थ्यं चूडाकरणस्य कर्माहं करिष्ये इति संकल्प्य ॥ ततो बहिः शालायां पंचभूसंस्कारान् कृत्वा लौकिकाग्नेः स्थापनं ॥ ततो
माता कुमारं स्नापयित्वा ऽहते वाससी परिधाप्योत्संगे कृत्वा पश्चादग्नेरुपविशति ॥ ततो वैकल्पिकावधारणं ॥ ब्रह्म
णो गमनादि पूर्ववदवधारणं । घृतपिंडप्राशनं । सकेशं गोमयपिंडस्योदकांते प्राशनं ॥ इत्यवधारणं ॥ ततो ब्रह्मो
पवेशनाद्याज्यभागांते विशेषः ॥ नात्र चरुः ॥ उपकल्पनीयानि ॥ शीतोदकं । उष्णोदकं ॥ नवनीतपिंड घृतपिं
ड दधिपिंडानामेव धारितानामन्यतमं ॥ त्रेणी शलली ॥ सप्तविंशतिकुशतरुणानि ॥ ताम्रपरिस्कृत आयसः
क्षुरः ॥ आनडुह गोमयपिंडः ॥ नापितो वरस्थेति ॥ आज्यभागानंतरं महाव्याहृत्यादि प्राजापत्यांतं नवाहुतयः ॥
ततः स्विष्टकृत् ॥ ततः संस्रवप्राशनादि ब्रह्मणे पूर्णपात्रवरयोरन्यतरस्य दानांतं ॥ ततः शीतोदके उष्णोदकस्य
निनयनं ॥ उष्णेन वाय उदकेनेह्यदितेकेशान्वपेति ॥ उष्णोदकमिश्रितास्वप्सु नवनीत घृतपिंडानामन्यत
मप्राशनं ॥ अतः प्रभृति सर्वेनैवोदकेन कार्यं सर्वत्र ॥ उदकमादाय दक्षिणं गोदानमुंदति सवित्रा प्रसूतेति ॥ तत
स्त्रेण्या शलल्या विनयनं ॥ त्र्याणां कुशतरुणानामंतर्धानं ओषधे त्रायस्वेति मंत्रेण ॥ शिवो नामेति क्षुरं

॥७॥
॥गदा॥

दानं॥ निवर्त्तयामीति कुशातरुणं तर्हितेषु केशेषु क्षुरनिधानं॥ ततो येनावपत्सवितेति सकेशानि कुशातरु
णानि प्रछिद्य धानडुहे गोमयपिंडे उत्तरतो ध्रियमाणे प्रक्षिपति। ततस्तस्मिन्नेव दक्षिणगोदाने एवमेवापरं वा
रद्वयं तूष्णीं कर्म कर्त्तव्यं। तत्रैव पश्चार्धे॥ उदकमादायोंदनं। त्र्येण्या शलल्या विनयनं। त्रयाणां कुशातरुणा
नामंतर्धानं॥ क्षुरानिनिधानं॥ सकेशानां कुशातरुणानां छेदनं। गोमयपिंडे प्रासनं। दक्षिणगोदानव
देवोंदनादि पिंडे प्रासनांतं पश्चिमोत्तरयोर्गोदानयोः सकृत्समंत्रकं द्विस्तूष्णीं कर्म कुर्यात्॥ एतावान्विशेषः
पश्चिमगोदाने आयुषामिति छेदनं॥ न तु येनावपदिति॥ उत्तरगोदाने येन भूरिश्चरादिवमिति मंत्रेणैव छेदनं
। ततो यत्क्षुरेणेति। त्रिरसमंतात् प्रदक्षिणं क्षुरस्य भ्रामयति सकृन्मंत्रेण द्विस्तूष्णीं॥ ततस्ताभिरेवाद्भिः शि
रस उंदनं॥ नापितायक्षुरसमर्पणमक्षुण्वं परिवपेति॥ यथामंगलं शिखास्थापनं। नापितः करोति॥
ततः सकेशं गोमयपिंडं अनुगुप्तपल्वले गोष्ठे वा उदकांते वा निदधाति॥ ततश्चूडाकरणकर्त्री [illegible] वा
यापवरं ददाति पश्चात् पार्श्वौके द्वाब्राह्मणभोजनं॥ अत्र भोजने प्रायश्चित्तमुक्तं पराशरमाधवीये

राम
[illegible]धर॥
॥७॥

निवृत्ते चूडाहोमे तु प्राशनमकरणं तदा। चरेत्सांतपनं कृत्वा ज्ञानकर्माणि चैव हि॥ अतोन्येषु संस्कारेषु उपवासेन शुध्यति॥ ॥इति चूडाकर्मप्रयोगक्रमः॥ ॥अथ केशांतप्रयोगक्रमः॥ ॥कालः चूडाकरणोक्तो ज्ञेयः॥ सप्तदशे वर्षे इदं कार्यं॥ लौकिकेग्नौ॥ आरंभनिमित्तं मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं देशकालौ स्मृत्वा केशांतकर्म करिष्य इति संकल्प्य॥ ब्राह्मणभोजनादि परिशिष्टं कं ब्राह्मणभोजनांते चूडाकरणवत्। इयांस्तु विशेषः॥ उष्णोदकासेकमंत्रे उष्णेन वाय उदकेनेध्यदितिः केशान् श्मश्रु वपेति। क्षुरपरिहरणमंत्रे वपत्सु रेण प्रमोषीर्मुखमिति। मुखसहितं शिरः परिहरति। वरस्थाने आचार्याय गोदानं। संवत्सरं ब्रह्मचर्यमित्यादि पूर्वोक्तं॥ ॥इति केशांतः॥ ॥एतानि जातकर्मादि चूडाकरणांतानि कर्माणि कुमार्या अप्यमंत्रकाणि कार्याणि। तत्र होमस्तु समंत्रकः॥ तदुक्तं कारिकायां॥ जातकर्मादिकाः स्त्रीणां चूडाकर्मांतिकाः क्रियाः॥ तूष्णीं होमे तु मंत्रः स्यादिति गोभिलभाषितं॥ होमस्तु समंत्रक इति प्रयोगपारिजाते याज्ञवल्क्यः॥ तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समंत्रक इति॥ ॥अथ शूद्रसंस्काराः॥ ॥मनुः॥ शूद्रोप्येवंविधः कार्यो विनामंत्रेण

॥१८॥
॥गद॥

संस्कृतः किनाचित्समस्तं छंदसा तं प्रजापतिः ॥ छंदसा मंत्रेण [illegible] व्याहृतः ॥ गर्भाधानं पुंसवनं सीमंतो जातक
र्म च ॥ नामक्रिया निष्क्रमो ऽन्नप्राशनं वपनक्रिया ॥ कर्णवेधो व्रतादेशो वेदारंभक्रिया विधिः ॥ केशांतः स्नान
मुद्वाहो विवाहाग्निपरिग्रहः ॥ त्रेताग्निसंग्रहश्चैव संस्काराः षोडश स्मृताः ॥ इत्युक्त्वोक्त नवैताः कर्णविधां
तामंत्रवर्जं क्रियाः स्त्रियः ॥ विवाहो मंत्रतस्तस्याः शूद्रस्यामंत्रतो दश ॥ इति ॥ पद्मब्रह्मपुराणे त्वयं शूद्रस्य गर्भाधा
नं पुंसवनं सीमंतं जातकर्म नामधेयं निष्क्रमणान्नप्राशनं चूडाकरणं विवाहो नव संस्कारा विहितास्ते च तू
ष्णीमिति हरिहरभाष्ये ॥ शार्ङ्गधरस्तु ॥ द्विजानां षोडशैवस्युः शूद्राणां द्वादशैव हि ॥ पंचैवामिश्रजातीनां
संस्कौरं सप्रदाविल्लच्चते सदेति ॥ अत्र सच्छूद्रासच्छूद्रविषयत्वेन व्यवस्था ॥ सच्छूद्रस्य द्वादश ॥ असच्छूद्रस्य विवाह
मात्रं ॥ एते च तूष्णीं कार्याः ॥ तथा च व्यासः ॥ शूद्रो वर्णश्चतुर्थोपि वर्णत्वाद्धर्ममर्हति ॥ वेदमंत्रस्वधास्वाहा व
षट्कारादिभिर्विना ॥ मरीचिः ॥ अमंत्रस्य तु शूद्रस्य विप्रो मंत्रेण गृह्यत इति ॥ तेन शूद्रधर्मेषु सर्वत्र विप्रेण
मंत्रः पठनीयः ॥ सोपि पौराणिक एवेति शूलपाणिना ॥ एवं शूद्रकर्तृकहोमो विप्रद्वारैव परार्थे कर्मणा कः ॥ ॥ भग्ग॥

राः कुलधर्मतः ॥ विद्व्रतोपनयनमहानाम्नीमहाव्रतं ॥ विनाहृद्वा शूद्राणां संस्काराः तामसमंत्र त इयाहौ विवाह मोक्षसंस्का

व्रतघुवणेन्तु

४ भाग

। दक्षिणार्थं तु यो विप्रः शूद्रस्य जुहुयाद्धविः। ब्राह्मणस्तु भवेच्छूद्रः शूद्रस्तु ब्राह्मणो भवेत्॥ अत्र माधवाचार्यैर्व्या
ख्यातं॥ यो विप्रः शूद्रस्य दक्षिणामादाय तदीयं हविः जुहोति पुत्रोत्पत्त्यादिसिद्ध्यर्थं वैदिकैर्मंत्रैर्जुहोति तस्य विप्रस्यैव दो
षः॥ शूद्रस्तु होमफलं लभत एवेति। शूद्रस्य पत्रे होमस्तत्र तत्र लौकिकाग्नावेव मंत्रांतरां विधानान्नमस्का
रमंत्रेणेति मदनपारिजाते॥ शूद्रस्य विवाहहोमोऽस्मिन्तत्रैवोक्तः। तन्निर्णयं॥ ॥ अथानुपनीतधर्माः॥ ॥ गौतम
। प्रागुपनयनात्कामचारवादभक्षाः। नित्यं मद्यं ब्राह्मणोऽनुपनीतोपि वर्जयेत्॥ उच्छिष्टतादावप्पतमन
स्त्रो महापातकवर्ज्यं। ब्रह्मपुराणे। मातापित्रोरपोच्छिष्टं बालो भुंजीत चेत्सु रवी॥ वृद्धशातातपः॥ त्रिशोरच्युत्र
णं प्रोक्तं बालस्यावमनं स्मृतं॥ रजस्वलादिसंस्पर्शे स्नानमेव कुमारके॥ प्राक्चूडाकरणाद्बालः प्रागन्नप्राशा
नाच्छिशुः। कुमारस्तु स विज्ञेयो यावन्मौंजीनिबंधनं। तस्यानुपनीतस्य चंडालादिस्पृष्टस्यापि स्नानं॥
इदं च षष्ठवर्षात्प्राक् ऊर्ध्वं नवत्सरेव। बालकस्य पंचमाद्वर्षात् ज्ञात्वार्ध्यं शौचमाचरेदिति स्मृतेः। कामचारादि
केप्येवं॥ ऊनैकादशवर्षस्य पंचवर्षात्परस्य च॥ चरेद्गुरुः सुहृच्चैव प्रायश्चित्तं विशुद्धये इति स्मृतेः॥ ॥

स्पर्शान्

अथ गर्गमते पदार्थक्रमः॥ ॥आभ्युदयिकं॥ ब्राह्मणभोजनं। बहिःशालायां लौकिकाग्नेः स्थापनं। माताकु-
मारमादायेत्यादिपयोक्तं॥ ततो ब्रह्मासनादिदक्षिणादानांते विशेषः। बर्हिरासादनानंतरं उष्णोदकं नवनीतघृ-
तदधिपिंडानामन्यतमः पिंडः॥ श्येणी शल्ली॥ सप्तविंशतिकुशतरुणानि॥ क्षुरः॥ गोमयं॥ नापितः॥ वरः॥ इ-
त्यासादनं। नोपकल्पनं॥ ततो दक्षिणादानांते कृत्वा शीतास्वप्सूष्णा आसिंचति॥ नवनीतादीनामन्यतमग्रास-
नं॥ तत्रोंदनेंतस्सीविनयनं। कुशतरुणांतर्धानं॥ क्षुरादानं॥ आयुषं येनावपदिति मंत्रद्वयेन कुशतरुणं-
तर्हिते षुंद्धरमग्निनिधायसकेशानि तरुणानि त[illegible]पृष्ठिद्यानडुहे गोमयपिंडे प्रासनं॥ एवं तूष्णीं मुंदं-
नादि द्विरपरं क्षुरादानवर्जं॥ ततः पश्चिमगोदाने एवं सकृन्मंत्रेण द्विस्तूष्णीं येन भूरिश्चरेति छेदने विशेषः॥ त्रि-
रः परिहरणं॥ शिरःसमुंदनं॥ क्षुरसमर्पणं॥ शिखास्थापनं। गोष्ठाद्यन्यतमांते गोमयपिंडनिधानं॥ आचा-
र्यायवरदानं॥ ॥इति गर्गमते पदार्थक्रमः॥ ॥इति चूडाकरणे पदार्थक्रमः॥ ॥अथोपनयनमाह॥ ॥
अष्टवर्षं ब्राह्मणमुपनयेत॥ ॥प्रसवानंतरं अष्टे वर्षाण्यतीतानि यस्य बालस्यासौ अष्टवर्षः तं अष्टवर्षं ब्रा-

आयुषमितिच्छेदनमंत्रे विशेषः। अथोत्तरगोदाने एवमेव सकृन्मंत्रेणाद्विस्तूष्णीं॥ ४

४९॥ गदा॥

शीतोदकं

नाम

॥ पुर॥ सा ४९॥

द्वादशवर्षाण्यतीतानियस्यासौतथा॰॰रयंवर्णंक्षत्रीयंउपनयेत्।जन्मतस्त्रयोदशेवर्षेइत्यर्थः।।१८

ह्मणंउपनयेत्।।उपनयनसंस्कारेणसंस्कुर्यात्।।आचार्यस्यउपसमीपेमाणवकस्यनयनंउपनयनशब्देनोच्यते
।उपनयनंचविधिनाचार्यसमीपेनयनं।।अग्निसमीपेनयनंवा।सावित्रीवाचनंवा।।अन्यदंगमितिस्मृत्यर्थ
सारे।।उपनेतृकर्माह वृद्धगार्ग्यः।।पितापितामहोभ्राताज्ञातयोगोत्रजाग्रजाः।।उपायनेधिकारीस्यात्पूर्वाभावेप
रःपरः।।तथा।।पितैवोपनयेत्पुत्रंतदभावेपितुःपिता।तदभावेपितुर्भ्रातातदभावेतुसोदरः।।पितेतिविप्रपरं।न
क्षत्रियवैश्ययोः।।तयोस्तुपुरोहितएवउपनयनस्यदृष्टत्वात्तयोस्त्वध्यापनेऽनधिकारात्।। ।।गर्भाष्ट
मेवा।। ।।अथवाब्राह्मणंगर्भसहिताष्टवार्षिकमुपनयेत्।।गर्भाष्टमेष्वितिपाठोहारिहरस्मार्तपद्धत्यां।।
।।एकादशवर्षंराजन्यं।।द्वादशवर्षंवैश्यं।।एकादशवर्षाण्यतीतानियस्यासौ।क्षत्रियं।।उपनयेत्।जन्मतोद्वाद
शेवर्षइत्यर्थः।। ।।यथामंगलंवासर्वेषां।। ।।अथवासर्वेषामेववर्णानांब्राह्मणक्षत्रियविशांयथामंगलंशा
स्त्रांतरविहितैर्मुपनयनंभवति।।अत्रास्वलायनः।।गर्भाष्टमेऽष्टमेवाब्देपंचमेसप्तमेपिवा।।द्विजत्वंप्राप्नुयाद्विप्रोव
र्षेत्वेकादशेनृपः।।आपस्तंबः।।गर्भाष्टमेषुब्राह्मणमुपनयीतेति।।बहुवचनंगर्भषष्ठार्थंसप्तमप्राप्त्यर्थं

शास्त्रांतरहितैर

वैकादशवर्षस्तंराजन्यं८

नरमेतेल्स्त्रामं

मितिसुदर्शीनं ज्योतिषं॥ अथापरोऽपि वः॥ अथ पकामानि॥ सममेब्रह्मवर्चसकाममष्टम आयुष्काम द्वंद्वामेत्रावध्काममेका
दशं इष्टिपकामं घादशोपशुकाममुपनयेत्॥ मनुः॥ ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पंचमे॥ राज्ञो बलार्थिनः
षष्ठे वैश्यस्यार्थिनोऽष्टमे॥ विष्णुः॥ षष्ठे तु धनकामस्य विद्याकामस्य सप्तमे॥ अष्टमे सर्वकामस्य नवमे कांति
मिच्छतः॥ नृसिंहः॥ उत्तरायणगे सूर्ये कर्तव्यं ह्युपनायनं॥ श्रुतिः॥ वसंते ब्राह्मणमुपनयीत॥ ग्रीष्मे राजन्यं
शरदि वैश्यं॥ मासविषये ज्योतिषे॥ माघादिषु तु मासेषु मौंजी पंचसु शस्यते॥ गर्गः॥ विप्रं वसंते क्षितिपं निदाघे वै
श्यं घनांते व्रतिनं विदध्यात्॥ माघादिशुक्रांतिकपंचमासाः साधारणा वा सकलद्विजानां॥ बृहस्पतिः॥ अथ जन्मप
क्षेः प्रशुनः प्रोक्तः कृष्णांत्यात्रिकं विना॥ वृत्तशते॥ न जन्माधिष्ण्ये न च जन्ममासि न जन्मकालीयदिने विदध्यात्॥ ज्ये
ष्ठे न मासि प्रथमस्य सूनोस्तत्पापस्तु तापापि मंगलानि॥ बृहस्पतिः॥ मिथुने संस्थिते भानौ ज्येष्ठमासो न दोषकृ
त्॥ राजमार्तंडः॥ जातं दिनं दूषयते वसिष्ठो ह्यष्टौ च गर्गो नियतं दशात्रिः॥ जातस्य पक्षं किल भागुरिश्च शेषाः प्र
शस्ताः खलु जन्ममासि॥ जन्ममासतिथौ भे च विपरीतदले सति॥ कार्यं मंगलमित्याहुर्गर्गभार्गवशौनकाः॥

जन्ममासनिषेधेपिदिनानिदशवर्जयेत्॥ आरभ्यजन्मदिवसाष्टुनाःसुक्तिप्ययोऽपरे। बृहस्पतिः मेषचापकुली
रस्थेजीवोप्यशुभगोचरः॥ अतिजोत्नेनतादघोद्विवाहोपनयादिषु। कारिकायां॥ यादशाष्टमबंधुस्थे मनसापिनचिं
तयेत्॥ ग्रंथांतरे। शुद्धिर्नैवगुरोर्यस्य वर्षे प्राप्तेष्टमेयदि। चैत्रेमीनगते ज्ञानी तस्योपनयनंशुभं॥ कारिकायां॥ अती
वदुष्टेसुरराजपूज्ये सिंहस्थिते वाद्विजपुंगवानां॥ व्रतस्यबंधेरव। लुमासिचैत्रे कृतमित्रापुः शुभसौख्यदंस्यात्॥
एतदष्टवर्षविषयं॥ ग्राह्यमनसाशास्त्राणि मदनपारिजाते॥ हस्तत्रयेदैत्यरिपुत्रयेचवाकेंद्रपुष्पाश्विनिरेवतीषु॥
वारेषुशुक्रा-र्कबृहस्पतीनां हितानुबंधोद्विजमौंजिबंधः॥ राजमार्तंडस्तु पुनर्वसुब्राह्मणस्य निषेधति। पुनर्वसौ
कृतेविप्रः पुनःसंस्कारमर्हतीति॥ तिथयस्तुचैवोक्ताः॥ तृतीयैकादशी ग्राह्यापंचमीदशमीतथा। द्वितीयाचैवमेधा
वीनवेदर्यबलान्वितः॥ रिक्तायामर्थहानिःस्यात्योगेमास्यांतयेवच॥ प्रतिपद्यपिवाष्टम्यांकुलनुद्धिविनाशतः॥ य
कारिकायां। अनध्यायेवतृष्ण्यांच कृष्णपक्षेविशेषतः॥ अपरांह्णेचोपनीतःपुनःसंस्कारमर्हति॥ नांदीश्राद्धे
कृतेवैतस्यादनध्यायस्तुकालिकं॥ तदोपनयनंकार्यंवेदारंभेनकारयेत्॥ लल्लः। वृत्तेपिपूर्वसंध्यायांवारिदा

॥११॥
॥गदा॥

यदि गर्जति। तद्दिने स्यादनध्यायो व्रतं तत्र विवर्जयेत्। ज्योतिर्निबंधे मदनरत्ने नारदः॥ विनर्तेनावसंते न कृष्णपक्षे ग
लग्रहे॥ अपराह्णे चोपनीतः पुनः संस्कारमर्हतीति। वसंते गलग्रहो न दोषायेत्यर्थः॥ [illegible] अपराह्ण
स्त्रेधा विभक्तदिनतृतीयांश इत्युक्तं तत्रैव॥ शब्दसामर्थ्यात् द्वेधा विभक्त इति नु उक्तं नारदः॥ कृष्णपक्षे चतुर्थ्यस
प्तम्यादि दिनत्रयं॥ त्रयोदशीचतुष्कं च अष्टावेते गलग्रहाः॥ राजमार्तंडः॥ अन्यं चांतरं यत्र प्रसारं ज्ञो न सिध्य
ति॥ गर्गादिमुनयः सर्वे तमेवाहुर्गलग्रहं॥ ज्योतिर्निबंधे॥ अष्टकास्तु च सर्वासु युगमन्वंतरादिषु। अनध्यायं
प्रकुर्वीत तथा सोपपदास्वपि॥ सोपपदास्तु स्मृत्यर्थसारे उक्ताः॥ सिता ज्येष्ठे द्वितीया च आश्विने दशमी सिता। च
तुर्थश्वादशी चैत्रे [illegible] सैताः पदाः स्मृताः। चंडेश्वरः। वेदव्रतोपनयने स्वाध्याया[illegible]ध्ययने तथा। न दोषाय प्रत्युषा सोप
पदास्वध्ययनेपि च॥ प्रदोषादिनमपि वर्ज्यतेत्य त्वरूपमुक्तं गोभिलेन। षष्ठी च द्वा[illegible] दशी चैव अर्द्धरात्रो नना
डिका। प्रदोषा [illegible] मिह कुर्वीत तृतीयां तु न यामिकेति। ज्योतिर्निबंधे व्यासः॥ पार्श्वे त्रवै श्रावणसितात् तृतीयामा
घस्य सप्तम्यपि फाल्गुनस्य। कृष्णे तृतीयोपनये प्रशस्ताः प्रोक्ता नरवाजमुनीन्द्रमुख्यैः॥ अपत्युर्बृहद्गार्ग्यवचनं॥

२प

तो

२४
राम
॥५२॥
॥११॥

दोषे॥ व्रतेदग्रा हानिवदंतिन्नह्मास्त्र यादग्रा हानिं वदंति केचित॥ संकरेतु चंडेश्वरः॥ दाहेद्रूग्रां चेव धरा प्रकंपे वज्रप्रपातेच्य विदा प

अनध्यायेप्रकुर्वीत यस्तु नैमित्तिकोन्नवेत॥ सप्तमी माघशुक्लेतु तृतीया चाक्षयातथा॥ बुधत्रयेष्ठुवारात्रस्तृ वास्ताः स्युर्व्रतबंधने॥ इति प्रायश्चित्तार्थोपनयनपरं॥ तथा चनिर्णयामृते कालादर्शेच॥ स्वाध्यायविधुज्योयास्ताः कृष्णप्रतिपदादयः॥ प्रायश्चित्तनिमित्ते तु मेखलाबंधने मताइति॥ ज्योतिर्निबंधे नारदः॥ शाखाधिपतिवारश्च शाखाधिपबलं तथा॥ शाखाधिपतिलग्नं च दुर्लभं त्रितयं व्रते॥ संग्रहे॥ ऋग्यजुःसामयजुषां गुरुसौम्यभौमसिताः॥ जीवो विप्राणां क्षत्रियस्य भौमो विशां चंद्र इति॥ गर्गः॥ ग्रहे रवींद्वोः स्वनिप्रकंपे तु ...ोल्कापतनादिरणे चाकोतैतपोल्कांशुकणप्रपाते त्र्यहं न कुर्याद्भूतमंगलानि॥ अनध्यायास्तु वाते मावास्यायामित्यत्र द्रष्टव्याः॥ ...कालश्चात्रक्रमः॥ इदानीं कर्माह॥ ॥ब्राह्मणान्भोजयेत्तेच॥ ॥उपनेता अष्टस्वधिकब्राह्मणव्यतिरिक्तान्त्रीन्ब्राह्मणान्भोजयेद्वाचयेत्॥ तं च कुमारं भोजयेत्॥ चशब्दो भोजनक्रियानुकर्षणार्थः॥ ॥पर्युप्तशिरसमलंकृतमानयंति॥ ॥परिपूर्वस्य वपतेः कृतसंप्रसारणस्यैतद्रूपं॥ परिसर्वत उप्तं मुंडितं शिरो यस्य स पर्युप्तशिराः॥ तं पर्युप्तशिरसं अलंकृतं स्रक्माल्यादिनाभूषितं आनयंति॥ ये पूर्वं तेनाचार्येणोपनीता

के ५

॥२२॥
॥गदा॥

स्तेएनं आचार्यसमीपे आनयंति। इदमानयनं चाध्ययनार्थं॥ अतस्तदन्ध्यावोष्टुऽस्यानधिकारः॥ अस्य प्रतिषे
धो न वत्यध्ययनं प्रति। श्रवणोत्र प्रजंतुर्मा श्रोत्र पूरणं॥ उच्चारणे जिकाछिदः॥ धारणे शरीरनेद इति। वपनं
चन्नोजनास्सर्वमेव कार्यं॥ नहीदानीं तदुपदेशोऽन्तकालनिर्दिष्टत्वात्॥ ॥ब्रह्मचर्यमागामिति वाचयति॥ ॥आ
नयनानंतरं आचार्यः। अग्नेः पश्चात् स्वस्य च दक्षिणतः कुमारमवस्थाप्य अवस्थि? पश्चादग्नेरवस्थाप्य +
तं कृत्वा ब्रह्मचर्यमागामिति ब्रूहीत्येवं वाचयेदिति॥ ततो माणवकः प्राङ्मुखस्तिष्ठन्नेव ब्रह्मचर्यमागामिति
च वदति॥ मंत्रार्थः॥ ब्रह्मचर्यं प्रति गृह्णामि? आगां आगातोस्मि॥ ब्रह्मवेदः तदाचरणं॥ ॥ब्रह्मचार्यसानीति च॥ ॥
लेत आचार्यः ब्रह्मचार्यसानीति ब्रूहीति वाचयेदिति च शब्दात् माणवकश्च प्राङ्मुखस्तिष्ठन्नेव तिष्ठन् ब्रह्मचार्य
सानीति ब्रूयात्॥ मंत्रार्थः॥ ब्रह्मकर्म चरतीति एवं शीलो ब्रह्मचारी अहमसानि भवानि॥ ॥अथैनं वासः परि
धापयति येनेंद्राय बृहस्पतिर्वासः पर्यदधादमृतं॥ तेन त्वा परिदधाम्यायुषे दीर्घायुत्वाय बलाय वर्चसे मरति?
॥ ॥अथाचार्यः एनं कुमारं वाससाऽहतं परिधापयति। येनेंद्रायेति मंत्रेण वाससि वक्ष्यमाण हौमा

राम

॥ ...
॥२२॥

विकानि वृष्णे त्रिपविग्रां यथासंख्यं ज्ञेयानि।वासांसि माणवको माविकानीति वक्ष्यमाणत्वात्।मंत्रार्थः॥ हे कुमा
रयेन विधिना यइंद्राय संस्कर्तुं बृहस्पतिः सुराचार्यो वासः पर्यदधात्॥परिधापितवान्॥ किंभूतं अमृतं अहतं
।तेन विधिना त्वा त्वां माणवकं परिदधामि॥परिधापयामि॥ उपनयनांते तेनोपि च ज्ञेयः।परिधापयतीति तत्वा
त्॥ यद्वा इंद्राय पर्यदधात्॥ इंद्रेणाप्यवछिन्नं प्रापितत्वात्।तस्मात्वां त्वां लक्ष्मीकृत्य परिदधामि। त्वयि अव्यवछेदेन
धारयामीति॥किमर्थं॥दीर्घायुत्वाय॥तत्वाचिरजीवनाय॥अपुः श्रोत्रकारांतोप्यस्ति॥बलाय देहशक्तये॥वर्चसे
इंद्रियशक्तये।ऐश्वर्यायचेति॥ ॥मेखलां बध्नीत इयं दुरुक्तं परिबाधमाना वर्णं पवित्रं पुनती म आगात्॥प्रा
णापानाभ्यां बलमादधाना स्वसा देवी सुभगा मेखलेयमिति पुवास्सुवासाः परिवीत आगात्स उश्रेयान्भव
ति जायमानः।तं धीरासः कवय उन्नयंति स्वाध्यो मनसा देवयंत इति वा तस्मीवा॥ ॥ततः आचार्यो माणव
कः कट्यां मेखलां रशनां बध्नीतो॥आचार्यस्यैवमंत्रपाठः॥अत्रैवं बंधनं।आचार्यः त्रिगुणां मेखलां माणव
टोः कटिप्रदेशे प्रादक्षिण्येन त्रिर्वेष्टयति॥ततो यवेष्टनेग्रंथयपतच्चयः पंच सप्त वा कार्याः।तदुक्तं।त्रिवृतां मेखलां का

...स्मि ति मंत्रेण।अथवा युवा सुवासा इति मंत्रेण।अथवान्नृषंडी।बध्नीते॥२

॥१३॥
मदा॥

यास्त्रिवारं स्यात्समावर्तना। तदूर्ध्वं यस्त्वपः पंच सप्त वा कार्याः॥ अत्र प्रवरसंख्यया नियमः॥ आर्षेयस्याग्नेपि त्र्ययं। पंचा
र्षेयस्य पंच। सप्तार्षेयस्य सप्तेति गर्गपद्धतौ॥ रक्षाचारोप्येवमेव॥ आचार्यकर्तृकं मेखलाबंधने कुमारस्य मंत्र
पाठ इति वासुदेवमुरारिमिश्रतनयरामहरिहराः॥ अत्र मुरारिमिश्रैरबुद्धिपुरुषयोगि मंत्रसंस्कारयो
रुक्तागे सामर्थ्यादिति हेतुपन्यासोपि प्र [illegible] द्रितीति। नहि करणमंत्रेऽपन्यायः प्रवर्तते॥ आचार्यकर्तृको ह्ययं प
दार्थः॥ मंत्रपाठस्तु लिंगाद्वेत्रीन माणवककर्तृकः स्यादिति चेत्। तन्न। प्रधानभूतस्य पदार्थस्य॥ गुणभूत
श्च मंत्रः॥ अतः पदार्थांगत्वेन मंत्रोपि पदार्थकर्त्रा पठनीयः॥ मंत्रेपि च लक्षणया माणवकाभिधानमित्यदो
षः॥ तथा च श्रुतिः॥ यां वै कां च यज्ञे ऋत्विज आशिषमाशासते यजमानस्यैव सेति। कारिकायां। बघ्नीयात्त्रिगु
णां स्वहस्तामितियं कृत्वा मुच्यते रन्ध्र। आचार्यवरमंत्रोयं नवद्वोराल्लनेपदात्॥ अस्मिन्नवसरे समाचाराद्यज्ञो
पवीताजिनेन्नवत इति भर्तृयज्ञव्यातिरिक्तवासुदेवादिसर्वग्रंथेषु॥ कर्काचार्यैस्तूपवीतमेव लिखितं॥ त
त्रवाविरोधादुपवीतेनारंवातरीयो मंत्रो आद्यः॥ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्॥ अ

राम

॥१५२॥
॥१३॥

पुष्पमग्र्यं प्रतिमुंचशुभ्रं यज्ञोपवीतं बलमस्तु तेजः इति ॥ अजिनस्यांतरीकरणं तस्मिन् मंत्रपाठेनवेति वासुदेवः ॥ मि-
त्रस्य चक्षुर्धरुणं बलीयस्तेजो यशस्वि स्थविरं समिद्धं ॥ अनाहनस्यं वसनं जरिष्णु परीदं वाज्यजिनं दधेहमिति मं-
त्रेणाजिनधारणमिति कारि- कायां गार्ग्यपद्धतौ च ॥ यज्ञोपवीतलक्षणं स्मृत्यर्थसारे ॥ कार्पासक्षौमगोवा-
लशणवल्कतृणादिकं । यथासंभवतो धार्यमुपवीतं द्विजातिभिः ॥ शुचौ देशे शुचिः सूत्रं संहतांगुलिमूलके । आवेष्ट्य
षण्णवत्या तत् त्रिगुणीकृत्य वाग्यतः ॥ अब्लिंगकैस्त्रिभिः सम्यक् प्रक्षाल्योर्ध्ववृतं तु तत् ॥ अप्रदक्षिणमावृत्तं सावि-
त्र्या त्रिगुणीकृतं । अधः प्रदक्षिणावृत्तं सम्यक् स्यान्नववृत्तकं । त्रिरावेष्ट्य दृढं बद्ध्वा हरिब्रह्मेश्वरान्नमेत् । यज्ञोपवी-
तं परममिति मंत्रेण धारयेत् ॥ सूत्रं सलोमकं चेत्स्यात्ततः कृत्वा विलोमकं ॥ सावित्र्या दशकृत्वोद्भिर्मंत्रिताभि-
स्तदुक्षयेत् । विच्छिन्नं वाप्यधोयातं भुक्त्वा निर्मितमुत्सृजेत् । एष्वं वंशोच नान्याचक्षते यद्दिंदते कांटं । तद्धार्यमु-
पवीतं स्यान्नातिलंबं नचोच्छ्रितं । स्तनादूर्ध्वमधो नाभेर्न धार्यं तत् कथंचन ॥ ब्रह्मचारिण एकं स्यात् स्नातस्य
द्वे बहूनि वा ॥ तृतीयमुत्तरीयं वा वस्त्राभावे तदिष्यते । ब्रह्मसूत्रे उपसव्ये सव्ये स्थिते यज्ञोपवीतता । प्राचीनावी-

॥५४॥ ॥८०॥

ततः सव्येकंठस्थे इति निवीतिता ॥ वस्त्रं यज्ञोपवीतार्थे त्रिवृत्सूत्रं च कर्मसु । कुशमुंजवाल्वजं तु रज्जुर्वा सर्वजातिषु ॥
कात्यायनः ॥ सदोपवीतिना भाव्यं सदा बद्धशिखेन च । विशिखो व्युपवीतश्च यत्करोति न तत्कृतं । यज्ञोपवीतं द्वि
जेत्वचिन्त्यार्थमिति प्रयोगरत्ने । कृष्णाजिनधारणं प्रावरणार्थं अंगुले तु बहिर्लोमपक्षास्या चतुरंगुलं । अजिनं
धारयेद्विप्रश्चतुर्विंशाष्टषोडशैः ॥ इति प्रयोगरत्ने । रशना नाम मौंज्यादिकाः । मौंजी रशना ब्राह्मणस्य धनुर्ज्या
राजन्यस्य मौर्वी वैश्यस्येति वक्ष्यमाणत्वात् । गृह्णि नान्येणपा[illegible]दीनि ॥ इ[illegible] रशनामित्यस्यार्थः ॥ ॥
इयमिता दम्भशब्दस्य आद्यं तयोर्वाभ्यालंकारार्थः ॥ इयमेरवल्लामभ्यगात् ॥ अभ्यगात् ॥ किं कुर्वती उरगेन्द्रा [illegible] तमस
त्याप्रियादिकं परितः सर्वतः अतं गविष्यच्चु बाधमाना निराकुर्वाणा ॥ वर्णैर्वर्णैर्वपवित्रं श्रुद्धं पुनतीस कुर्वती । मेम
मप्राणा पानाम्भोमरुत्संभोतत्वोबलं सामर्थ्यं गमादधानास्यापयंती ॥ नवसात्वसवनं हितादेवादीक्षिमतीस्तनगासो
त्रागणा ॥ ध्रुवाम्सुवासा इत्यस्यार्थः । यौति गुणानेकीकरोतीति ध्रुवा स्त्रवासा । शोभनं नु वस्त्रं ॥ अरुणं शोभनं मुख
ते ॥ प वीरितः । वस्त्रपुष्पमाल्यादिभिः समंतेतो वेष्टितमभ्यागात् ॥ अभ्यागतः ॥ उ वितर्कि । अयात् ॥ सयदिनोप

२

राम

॥५४८॥
॥१४॥

परम। परआत्मा मीयते ज्ञायते नेन वा येषां पदं स्थाप्य चिन्मात्रस्वादात्। पवित्रं शोधकं प्रजापतेर्ब्रह्मणः सहजं सहोत्पन्नं स्वभावसिद्धं वा पुरस्तात् प्राग्भवं। अतोऽहं ददे आयुषे हितं॥

मानः। उत्साधमानः। अग्र्यान् श्रुत्वा त्॥ धीरासः। स्थिरप्रज्ञाः॥ कवयः। वेदार्थप्रवक्तारः। कांतदर्शिनाः॥ स्वाध्योः। ध्यो
नेन चित्तवृत्तयः। तं च उन्नयंति। उत्कर्षं गमयंति। किं कुर्वंतः॥ मनसा मनोवृत्त्या देवयंतः। वेदार्थं ज्ञापयंतः॥ यज्ञो
पवीतमंत्रार्थः॥ हे आचार्य इदं ब्रह्मसूत्रमहं प्रतिमुंचामि प्रतिमुंचामि। प्रतिबध्नामि। मुंचतिर्बंधनार्थः॥ पुरुषस्य
स्कंदसः॥ किं भूतं यज्ञोपवीतं। यज्ञेन प्रजापतिना यज्ञाय वेदोक्तकर्माधिकाराय पतितं वा॥ य पवीतं। उपरिस्कंधे
शोभते परिलसितं अग्र्यं पुण्यं श्रुतं। अग्र्यं मुख्यं। अनुपहतं। शुभ्रं निर्मलं। बलं धर्मस्यामृष्यं। तेजः प्रज्ञा वदं। य
धापत्रसूत्रकता यज्ञोपवीतं नोक्तं तथापि उपवीतिना इति पारस्कराचार्येण सदा यज्ञोपवीतिना भाव्यमिति प
रि शिष्टाचारव्याख्ये। कालभाष्यानुक्तोपि स्मर्तव्यं तदपि एव। उपवीतिना इत्यस्यापमर्धः॥ सर्वे उपवीतिनः स
व्यस्कंधस्थित यज्ञोपवीत धारिणः कर्म कुर्वीतीति शेषः॥ उद्धृते दक्षिणे पाणावुपवीत्युच्यते बुधैरिति स्मरणा
त्। यज्ञोपवीती देवकर्माणि करोति॥ ॥ अथ तस्मै मेखलापमार्जनमुत्तरीयं करोति॥ दंडं प्रयच्छति तं प्रतिगृ
ह्णाति॥ यो मे दंडः परापतद्वैहायसोधि भूम्यां॥ तमहं पुनराददे आयुषे ब्रह्मणे ब्रह्मवर्चसायेति॥ दंडं प्रयच्छ

त ततः आचार्यो माणवकाय तदंडी

॥१५॥
॥गदा॥

तिसमर्पयति । माणवकमग्रे दक्षिणेन हस्तेन दंडं प्रतिगृह्णाति यो मे दंड इति मंत्रेण । दंडाश्च पालाशो बैल्वो वौदुंवरः ॥ ब्राह्म
णक्षत्रियविशां यथासंख्यं ज्ञेयाः ॥ अथवा पालाशादयः सर्वेषां वर्णानां ॥ पालाशो ब्राह्मणस्य दंडो बैल्वो राजन्य
स्यौदुंवरो वैश्यस्य सर्वे वा सर्वेषामिति वक्ष्यमाणत्वात् ॥ मानं च आख्यातरीयं ग्राह्यं ॥ मुखसंमितो ब्राह्मणस्य दंडो
ललाटसंमितः क्षत्रियस्य घ्राणसंमितो वैश्यस्येति वा ॥ मंत्रार्थः ॥ हे अग्ने यो दंडः मे मद्ध्ये परापतत् । अग्नि
मुखमागतः । विहायसः ॥ आकाशोद्भूतः ॥ अधिभूम्यां भूमेरुपरि वर्तमानः ॥ तं दंडं अहमादेद गृह्णामि पुन
र्ग्रहणात्सोमदीक्षायां यो दंडो ग्राह्यस्तमप्याददे इत्याशंसनं ॥ आयुषे जीवनाय ॥ ब्रह्मणे वेदग्रहणाय ॥ ब्रह्मव
र्चसाय ॥ पाठेनाध्यापनोत्कर्षतेजसे ॥ दीक्षावदेके दीर्घसत्रमुपैतीति वचनात् ॥ ॥ अस्यार्थः दीक्षावत् ।
सोमयागदीक्षायां तस्मिन्प्रातर्गृह्योक्तपक्षे सूत्रपक्षे विहितं तद्वदत्रापीच्छंति । कुतः । दीर्घसत्रं वा एष उपैति
यो ब्रह्मचर्यमुपैतीति वचनात् ॥ दंडप्रतिग्रहणसामर्थ्यात् । दीर्घसत्रतासिद्धेः । पक्षे वा । न दीक्षावत्प्रतिग्र
हणं ॥ स्मरणाभावात् ॥ या चात्र दीर्घसत्रस्तुतिः । सा दीर्घकालसामान्यादिति कर्कजयरामः ॥ दी

राम
॥गदा॥
॥१५॥

ज्ञावक्षादंडग्रहणमितिवासुदेवकारिकाकारहरिहराः॥ अथास्याञ्जलिरंजलिनांजलिंपूरयत्यापोहिष्ठेतितिसृ
भिः॥ ॥अथाचार्योस्यकुमारस्यांजलिंस्वेनांजलिना अप आदापतामिरद्भिः पूरयति॥ आपोहिष्ठेतितिसृ
भिःऋग्भिः॥ ॥अथैनं सूर्यमुदीक्षयति तच्चक्षुरिति॥ ॥अथाचार्येणैनं कुमारं सूर्यमुदीक्षयति सूर्यदर्शी
पतीति तच्चक्षुरितिमंत्रेण॥ उदीक्षयतीतिकादितार्थत्वात्सूर्यमुदीक्षस्वेति प्रैषं आचा[र्येणकुमारःसूर्यमु]
र्यस्य॥ ॥अथास्य दक्षिणांसमधि हृदयमालभते मम व्रते ते हृदयं दधामि मम चित्तमनु
चित्तं ते अस्तु॥ ॥मम वाचमेकमना जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यमिति॥ ॥अथाचार्योस्यकुमा
रस्य दक्षिणांसमधि दक्षिणस्कंधोपरि स्वीयं दक्षिणहस्तं नीत्वा हृदयं वक्ष आलभते स्पृशति। मम व्र
ते त इति मंत्रेण। व्याख्यातश्चायं विवाहप्रकरणे॥ ॥अथास्य दक्षिणं हस्तं गृहीत्वाह को नामासीति
॥ ।आचार्योस्यकुमारस्य दक्षिणहस्तं स्वदक्षिणहस्तेन गृहीत्वा को नामासीत्याह ब्रवीति॥ १ ॥
असावहं भो इति प्रत्याह॥ [आचार्यस्य] एवमाचार्येण पृष्टः कुमार आचार्यं प्रत्याह॥ असाविति सर्वनाम

॥१६॥
॥गदा॥

स्थाने आत्मनो नाम गृह्णीयात् अमुकोऽहंभो ३ इति॥ ॥अथैनमाह कस्य ब्रह्मचार्यसीति॥ अथैनं कुमारं प्रति आ-
चार्य आह कस्य ब्रह्मचार्यसीति॥ ॥भवत इत्युच्यमाने इंद्रस्य ब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्यस्तवा-
सावितिः॥ ॥भवत इति आचार्यप्रति कुमारेणोच्यमाने आचार्यः इंद्रस्य ब्रह्मचार्यसीत्यमुं मंत्रं पठति॥ अ-
सावितस्य स्थाने आमंत्रणविभक्तियुक्तं कुमारनाम गृह्णीकार्यं॥ स्वनाम प्रथमांतमित्यपरे॥ ॥अत्र पञ्चम-
आर्षोपदेशः स्मर्तव्यं तरामिर्णय इति भर्तृयज्ञभाष्ये मंत्रार्थस्तु॥ इंद्रादिपरमैश्वर्ये॥ इंद्रस्य प्रजापतेर्ब्रह्म-
चारी त्वमसि॥ तव चाग्निराचार्यः प्रथमः द्वितीयस्त्वाहं तवाहमसौ अमुकनामन् ब्रह्मचारिन्॥ ॥
अथैनं भूतेभ्यः परिददाति प्रजापतये त्वा परिददामि देवाय त्वा सवित्रे परिददाम्यद्भ्यस्त्वौषधीभ्यः॥
परिददामि द्यावापृथिवीभ्यां त्वा परिददामि विश्वेभ्यस्त्वा भूतेभ्यः परिददामि सर्वेभ्यः त्वा भूतेभ्यः परि-
ददाम्यरिष्ट्या इति॥ ॥आचार्य एनं कुमारं भूतेभ्यः प्रजापति प्रभृतिभ्यः परिददाति प्रजापतये त्वा प-
रिददामि देवाय त्वा सवित्रे परिददामीति भूतत्वात्॥ मंत्रार्थस्तु गमः॥ हे ब्रह्मचारिन् प्रजापतये
परिपालितं अरिष्टेः रक्षायै प्रयच्छति प्रजापतये त्वा परिददामि अनेन मंत्रेण। अथैनं ब्रह्मचारिः

राम

॥धर॥
॥१६॥

गोदेवार २

स्पष्ट्रे त्वा त्वां परिददामि समर्पयामि॥ विश्वेभ्यो मे त्तेभ्यः विश्वानि भूतानि पृथिव्यादीनि पंचतेभ्यः सर्वेभ्यो भू
तैविशेषेभ्यः इत्यपोनरुक्त्यं॥ किमर्थं॥ अरिष्टै॥ अहिंसायै॥ ॥छ॥ इति श्रीगदाधरकृते गृह्यसूत्रभाष्ये
द्वितीयकांडे द्वितीयकंडिका॥ ॥२॥छ॥ प्रदक्षिणमग्निं परीत्योपविशति॥ ॥परिदानानंतरं कुमारोग्निं
प्रदक्षिणं पर्यास्यात्र पापरीत्य परिक्रमणं कृत्वाऽग्नेरुत्तरत उपविशत्याचार्यस्योत्तरत उपविशति। पश्चाद
ग्नेराचार्यस्योत्तरत उपविशतीति जयरामहरिहरौ। पश्चादग्नेरुपवेशनमिति अत्र पद्धतिकारिकाकारौ॥
आचार्यस्य दक्षिणत इति गर्गपद्धतौ॥ आचार्यस्योत्तरत इति वासुदेवः॥ ॥अन्वारब्ध आज्याहुतीर्हुत्वा
प्राशनांते प्येनं संशास्ति ब्रह्मचार्यस्यपोऽशान कर्म कुरु मा दिवा सुषुप्था वाचं यच्छ समिधमाधेह्यपोऽशा
नेति॥ ॥ततआचार्यो ब्रह्मणान्वारब्ध आघारादि स्विष्टकृदंताश्चतुर्दशाहुतीर्हुत्वा संस्रवप्राशनांते ब्र
ह्मचार्यसीत्येवमादिभिः सप्रैषवाक्यैरेनं कुमारं अनुशास्ति शिक्षयति॥ अत्र ब्रह्मोपवेशनादिद
क्षिणादानांतं कर्मणोऽनुशासनेकार्यम्॥ तथैवं॥ ब्रह्मचार्यसीत्याचार्य आह॥ अश्नानीति ब्रह्म

आ २

चारी प्रत्याह ॥ अपोऽशानेत्याचार्य आह । अश्नानीति ब्रह्मचारी प्रत्याह । कर्म कुर्वित्याचार्य आह ॥ करवाणीति ब्रह्म
चारी प्रत्या । मा दिवा सुषुप्था इत्याचार्य आह ॥ न स्वपामीति ब्रह्मचारी॰ वाचं यच्छेत्याचार्यः॰ यच्छामीति ब्रह्म
चारी॰ समिधमाधेहीत्याचार्यः ॥ आदधानीति ब्रह्मचारी । अपोऽशानेत्याचार्यः ॥ अश्नामीति ब्रह्मच
री । ब्रह्मचार्यसीत्यादिप्रैषाणामर्थः ॥ ब्रह्म कर्म चरतीत्येवं शीलो ब्रह्मचारी । असि । भवसि । अपः अश्ना
न पिब ॥ कर्म स्नानादिकं स्ववर्णाश्रमविहितं कुरु विधेहि । दिवसे मा स्वाप्सीः ॥ अस्तु तत्काले वाचंयि
रं यच्छ नियमय । समिधं वक्ष्यमाणप्रकारेण आधेहि । अग्नौ सर्वदा प्रक्षिप । प्रथममावमनन मन्त्रोच्यत
द्वितीयं चाश्नीयात् ॥ अश्नीष्यन्नावामेदशित्वा चामेदिति श्रुतेः ॥ कर्मकरणमविशेषोपदिष्टमप्याचा
र्याय ॥ आचार्यायं कर्म करोतीति श्रुतेत्वादिति चेत्परत्र ॥ सावित्र्युपदेशमाह ॥ ॥ अथास्मै सावित्री
मन्वाहोत्तरतोऽग्नेः प्रत्यङ्मुखायोपविष्टायसमीक्षमाणाय समीक्षिताय ॥ ॥ अथाचार्योऽस्मै ब्रह्म
चारिणे सावित्रीं सवितृदेवताकां गायत्रीछंदस्कां तत्सवितुरित्येतामन्वाह । उपदिशति ॥ किंभूताय ॥

राम

प्रत्यपेक्षायां उत्तरतोग्नेः अग्नेउत्तरस्यां दिशी ऽस्मन्नायप

प्रत्यङ्मुखाय। पश्चिमाभिमुखाय॥ पुनः किंभूताय। उपविष्टायासीनाय॥ पुनः किंभूताय गुरुं समीक्षमाणा
य। पुनः किंभूताय समीक्षिताय। गुरुणा समीक्षिताय सम्यगवलोकिताय॥ स्मृतिः तस्मादेतां गायत्रीं सावित्रीं
मनुब्रूयादिति। मदनपारिजाते शातातपः॥ तत्सवितुर्वरेण्यमिति सावित्री ब्राह्मणस्येति॥ ॥दक्षिणतस्तिष्ठ
त आसीनाय वैके॥ ॥येके आचार्या अग्नेर्दक्षिणतो दक्षिणस्यां दिशि तिष्ठते स्थिताय॥ ऊर्ध्वीभूताय ब्रह्मचा
रिणे आसीनाय उपविष्टाय वा सावित्रीप्रदानमाहुः॥ अपरे के दक्षिणतस्तिष्ठते वासीनाय वा ब्रूयादिति स्मृ
तिवात। एक ग्रहणाद्विकल्पः॥ ॥पच्छोर्धर्चशस्ततोपि नसहानुवर्त्तयन्॥ ॥सावित्रीप्रदाने अयं प्रकारः प्र
थमं तावत्पच्छः पादशः॥ ततोर्धर्चशः॥ अर्धर्चे अर्धर्चे। ततस्ततोपि नवारेण सह वद्भूनास वींच सावित्रीमनुवर्त्तय
न्॥ आवर्त्तयन्नुपठेत्॥ अत्राह मदनपारिजाते लौगाक्षिः ओं भूर्भुवः स्वरित्युक्त्वा तत्सवितुरिति सावित्री
त्रिरन्वाह पच्छोर्धर्चशः सर्वामन्ततः इति॥ तां वै पच्छोन्वाह तु पक्रम्य अपर्यार्धर्चशो अत्र्यपक्वत्स्ना मीति स्मृतेः॥ सावि
त्रीप्रदानस्य कालविकल्पानाह॥ ॥संवत्सरे षण्मास्ये चतुर्विंशत्यहे वा द्वादशाहे षडहे त्र्यहे वा॥ ॥उपन

सर्वांचृ६
पादं

॥१८॥
॥८॥

यन्नमारन्यसंवत्सरे पूर्णे वा षण्मास्ये मासे षडहे वा चतुर्विंशत्यहे द्वादशाहे वा षडहे वा त्र्यहे वा सावित्रीमनुब्रूयादि
त्यर्थः॥ तां ह स्मैतां पुरा संवत्सरेन्वाहुरित्युपक्रम्य षट्सु मासेषु त्र्यहे चतुर्विंशत्यहे द्वादशाहे षडहे
हे त्र्यहे इति श्रुतेः॥ क्षत्रियवैश्ययोरेते कालविकल्पाः॥ ब्राह्मणस्य तु वक्ष्यमाणत्वात् एते कालविकल्पा
आचार्यशुश्रूषादिशिष्यगुणतारतम्यापेक्षा इति हरिहरः॥ षण्मास्ये इति षडेव मासाः षण्मास्यः स्वार्थे त
द्धितष्यञ् छांदसः वृद्धिलोपः छंदोवत्सूत्राणि भवंतीति वचनात्॥ ब्राह्मणस्य कालमाह॥ ॥सद्यस्त्वे
व गायत्रीं ब्राह्मणायानुब्रूयात् आग्नेयो वै ब्राह्मण इति श्रुतेः॥ ॥तु पुनः ब्राह्मणाय सद्य एव गायत्रीम
नुब्रूयात् उपदिशेत् कुतः आग्नेयो वै ब्राह्मण इति श्रुतेः॥ आग्नेयः अग्निदेवत्य इति अतोस्मै सद्य एवो
पदेशो युक्तः॥ आग्नेयो वै ब्राह्मणः सद्यो वा अग्निर्जायते तस्मात् सद्य एव ब्राह्मणायानुब्रूयादिति श्रुतेः
॥ त्रिष्टुभं राजन्यस्य॥ ॥ त्रिष्टुप् छंदो यस्याः सा त्रिष्टुप्॥ तां सावित्रीं त्रिष्टुभं देव सवितरित्यादिकां
राजन्यस्य क्षत्रियस्यानुब्रूयात्॥ याक्रिजोतो देव सवितरिति राजन्यस्येति॥ तां सवितुरिति जगतीं वैश्ये नो

राम
॥५९॥
॥१५॥

मो साहता॥ ॥जगती वैश्यस्य॥ ॥जगतीछंदो यस्याः सा जगती तां सावित्रीं॥ विश्वारूपाणिप्रतिमुंचते
इति ऋचं वैश्यस्यानुब्रूयात्। युंजते मन इति मंत्रं पद्मनाभे। विश्वारूपाणि प्रतिमुंचत इति वैश्यस्येति॥
पारिजाते॥ ॥सर्वेषां वा गायत्री॥ ॥गायत्रीछंदो यस्याः सा गायत्री तां सावित्रीं सर्वेषां ब्राह्मणक्षत्रियवि
शां तत्सवितुरित्यृचमनुब्रूयात्॥ वा शब्दो विकल्पार्थः॥ ॥छ॥ इति श्रीगदाधरकृते [illegible] गृह्यसूत्रभाष्ये
द्वितीयकांडे तृतीया कंडिका॥ ॥छ॥ उपनयनांगत्वेन समिदाधानमाह॥ ॥अत्र समिधमाधाने॥
अत्रास्मिन्प्रकृते अग्नौ समिदाधानं समिधां तिसृणां प्रक्षेपो ब्रह्मचारीकर्तृकोत्र भवति॥ अत्रावसर इति
केचित्तन्न॥ पाठादेव सिद्धेरत्र शब्दो ऽग्निपरो द्रष्टव्यः॥ समिदाधानस्येतिकर्तव्यतामाह॥ ॥पाणिना
ग्निं परिसमूहत्यग्ने सुश्रवः सुश्रवसं मा कुरु॥ यथा त्वमग्ने सुश्रवः सुश्रवा अस्येवं मां सुश्रवः॥
सौश्रवसं कुरु यथा त्वमग्ने देवानां यज्ञस्य निधिपा अस्येवमहं मनुष्याणां वेदस्य निधिपो भूयासमि
ति॥ ॥ब्रह्मचारी पाणिना दक्षिणेन पाणिनाग्निं प्रकृतं उपनयनांगहोमाधिकरणं परिसमूहति। स्तु

यथायेन उ... सुश्रवो असि एवं गुणाधानेन मां सुश्रवः १८

॥१९८॥ ॥गद॥

ष्ठ गोमयरवंडादिइंधनप्रक्षेपेण संधुक्षयति। अग्ने सुश्रवः सुश्रवसं मा कुर्वित्येवमादिभिः पंचमंत्रैः। कारि
कायां विशेषः॥ प्रतिमंत्रं त्रिभिः काष्ठैरग्ने सुश्रवमग्र्यादिभिः। अग्ने सुश्रव इत्येकं यथा त्वं स्याद्वितीयकं॥ य
था त्वमग्ने देवानां मंत्रेणापि तत्तीयकं। कुर्वा पर्युक्षणं एव कृत्वा उपसमिद्धाहुतिरिति॥ पाणिने त्येकां वच
नमेकवत्तिपमाप्य। उत्तात्यामपि दशत्ते संधुक्षणं॥ मंत्रार्थः। हे अग्ने सुश्रवः शोभनकीर्ते। मां सुश्र
वसं शोभनकीर्तिं कुरु। किंच। हे अग्ने त्वं सुश्रवः सौश्रवसः। सुश्रवा अस्ति तत्र सुश्रवाः स्वयं सुश्रवा गुरु
स्तस्यापत्यं सौश्रवसः॥ यमात्वापमपि सुश्रवसं कृत्वा तदीयत्वेन मां सौश्रवसं कुर्वित्यर्थः॥ किंच। हे अग्ने
यथा त्वं देवानां इंद्रादीनां मध्ये यज्ञस्य चक्रे तो निधिपं हविर्द्वायासि। रक्षसि। एवमहं मनुष्या [illegible]
[illegible] णां मध्ये अस्ति निधिपः रक्षकः भूयासं। भवेयं॥ ॥ प्रदक्षिणमग्निं पर्युक्ष्य उपसमिध
मादध्यात् अग्ने समिधमहार्षं बृहते जातवेदसे। यथा त्वमग्ने समिधा समिध्यसे एवमहमायुषा मेधया
वर्चसा प्रजया पशुभिर्ब्रह्मवर्चसेन समिंधे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी

स:४

राम

॥चर॥ ॥१५॥

ख्यातेजस्वी ब्रह्मवर्चस्व्यन्नादो भूयासं स्वाहेति ॥ ॥ततो ब्रह्मचारी दक्षिणेन पाणिना पात्रपार्श्वे धृत्वाग्निं
दक्षिणहस्तं गृहीतेनोदकेन परिषिच्य उत्थाय प्राङ्मुख उत्तिष्ठन् समिधमादधाति अग्नौ प्रक्षिपति । अग्नये स
मिधमित्यादिस्वाहाकारान्तेन मन्त्रेण समिध्यते दीप्यतेऽग्नि इति समित् । तल्लक्षणं चास्माभिः समिधो न्याधा
नप्रसंज्ञा जुहुयादिति सूत्रार्थ उक्तं । ननु तिष्ठन् समिधः सर्वत्रेति सूत्रे तस्य चोक्तत्वात् उत्थायेति ग्रहणं व्य
र्थं । सत्यं । नायं होमः समिदाधानमित्येतस्य च नापि मुत्थायेति ग्रहणमित्यदोषः ॥ अतोऽत्र त्यागाभावः । यद्वा
इहोत्थायेति ग्रहणमन्यत्र स्मार्त्ते परिसंख्यार्थमिति कारिकायां । प्रयोगरत्ने तु त्यागो विलिखितः । मंत्रार्थः ॥
हे देवाः इमां समिधं अग्नये अग्न्यर्थं आहार्षं आहृतवानस्मि । किंभूताय । जाताय । जातान्वेत्ति जातवेदास्त
स्मै । यथा येन प्रकारेण समिधाग्ने नयादीप्यमानया त्वं हे अग्ने समिध्यसे । दीप्यसे ॥ एवमहमायुषा जीव
नेन मेधया अग्नितीतादिधारणवत्या बुद्ध्या वर्चसा तेजसा । प्रजया पुत्रादिभिः पशुभिः गवादिभिः ब्रह्म
वर्चसेन तेजसा च तद्धयपनसंपत्त्या ॥ एतैरहं समिंधे । समृद्धो भवामि । आचार्यविषयं फलमप्याशास्ते ।

ते ३

मनुष्य[illegible] [illegible]मपसमिधं परिषात् इत्यंतेद्वियोमंत्रयोः सन्तु [illegible] वयस समिदाधाने स्यात् । अत्रा प्रति समिदाधाने मंत्रयोरावृत्तिः ॥ ६

[illegible] स्वाभि

॥२०॥
॥गृह्य॥

जीवपुत्रो दीर्घायुरयं सोमस्माकं वीर्यो भवतु । जीवंतः पुत्राः यस्यामे धावी श्रहमस्मात्रिः । अनिराकरिष्णुर्गुरूपदिष्ट धर्मादविस्मरणं शीलः । यशस्वी तेजस्वी ब्रह्मवर्चसी । अन्नंश्च होतन्त्राद्यः [illegible]पासं [illegible]वेयं स्वाहा सुहुतम स्तु ॥ ॥ एवं द्वितीयां तथा तृतीयां ॥ ॥ एवं अनेनैव मंत्रेण द्वितीयां समिधमादधाति । तथैवानेन मंत्रेण तृतीयां समिधमादधाति । अग्नये समिधमहार्षमिति स्तुव्यमानेन मंत्रे तेषु गर्पतिस्मरणमाधानं प्राप्नोति । तत्रिवत्सर्पमेवं द्वितीयां तृतीयामिति सूत्रमुक्तं ॥ ॥ एषा तइति वा ॥ ॥ अपवा एषा ते अग्ने समित्तयेति मंत्रेण समिदाधानं । अत्रापि मंत्रावृत्तिः ॥४॥ पूर्ववत्परिसमूहनं पर्युक्षणं ॥ ॥ परिसमूहनं अग्नेस्सुश्रव इत्यादिना संधुक्षणं । पर्युक्षणं अग्नेः सर्वतो जलासेकः परिसमूहन पर्युक्षणे अग्नेः पूर्ववत्कर्तव्ये ॥ ॥ पाणी प्रतप्य मुखं विमृष्टे तनूपा अग्नेसि तन्वं मे पाह्यायुर्दा अग्नेस्यायुर्मे देहि वर्चोदा अग्नेसि वर्चो मे देहि ॥ अग्ने यन्मे तन्वा ऊनं तन्म आपृण । मेधां मे देवः सविता [illegible] मेधां मे देवी सरस्वती [illegible] मेधामश्विनौ देवावाधत्तां पुष्करस्रजाविति ॥ ॥ पर्युक्षणानंतरं ब्रह्मचारी पाणी उभौ हस्तौ प्रतप्य त

तिस्रः समिध आदधाति ४

राम

॥ग्रह॥
॥२०॥

सीमग्नेनोतापयित्वातनूपाअग्नेसीतिसमन्त्रिमेंत्रवाक्येमुखंविमृज्य पाणिन्यांमार्जयति।वाक्यान्तेदोक्षुप्रतिवाक्यं
पाणेपोःपूतपनंमुखमार्जनंच॥तनूपाइत्यस्यास्य अग्निरवीपलान्नतिगृहणेप्रातेमंत्रवाक्यवतुष्टपस्तोपयोगात्।सवे
पाठ शुमेधांमेदेवःसवितामेधांमेदेवीसरस्वतीत्यनयोर्मंत्रयोराद्धातीत्यध्याहारः।साकांक्षत्वात्।मंत्रार्थः
॥तनूपाअग्नेसीत्यादपःस्पष्टाः।मेधामितिस्पार्थः।देवोद्युतिमान्सूर्योमेमह्यंधारणावतींबुद्धिंदीप्यमान
सरस्वतीआद्धातुतपाअश्विनौदेवौमेमह्यंमेधांआधत्तांसंपादयेतां।पुष्करस्रजौ॥पुष्पमालाधा
रिणौ॥अत्राग्नालंम्भनंआपूषकरणाभिवादनाभिमुख्येकृतौनुक्तान्यप्याचारतोनुष्ठेयानितत्राभिवा
दनंगोत्रनामोच्चारणपूर्वकंपादोपग्रहः॥अंगालंम्भनंआपुषकरणयोःसूत्रकारोतरप्रद र्शितोमंत्रे
ग्राह्यो।तद्यथा।अंगान्यालभ्यजपतंगानिचमअग्ना प्यायंतांवाक्प्राणश्चक्षुःश्रोत्रंयशोबलमितिआपु
षाणिकरोतिचस्मनालंलापैत्रीवापांदक्षिणेंसेहृदि च आपुषमितिप्रतिमंत्रं॥ ॥तत्रवाक्येमअग्ना प्या
यतामितिक्रियाविपरिणामंकुर्यात्॥ ॥अथाभिवादनेप्रकारः॥ ॥तत्रयाज्ञवल्क्यः॥तत्राभिवादये

तथादेवी५

सोना।(...ते यन्।। विप्रो ति क्षितासुपल... आपस्तंबः। स्वदाद... ...मं प्रसाय
...लणोऽभि वादयेत्।। उरः समं राजन्यो मध्यसमं वैश्यो नीचैः शूद्रः प्रांजलिः। मनुः। भोशब्दं कीर्तयेदंते स्वस्य ना
म्नोऽभिवादने। २

।२९।।
।।गद।।

हृद्यानसाव...मितिब्रुवन्। ततोग्निकार्यादनंतरमित्यर्थः।। ब्रह्मपुराणे। उत्थाय मातापित्रोः पूर्वमेवाभिवादयेत्।
आचार्यश्च ततो नित्यमभिवाद्यो विजानता।। मनुः। लौकिकं वैदिकं वापि तथाध्यात्मिकमेव वा।। आददीत यतो ज्ञा
नं तं पूर्वमभिवादयेत्।। अभिवादात्परं विप्रो ज्यायांसमभिवादयेत्।। नाम्नां स्वरूपभावो हि भोभाव ऋषिभिः
स्मृतः।। आयुष्मान्भव सौम्येति वाच्यो विप्रोऽभिवादने।। अकारश्चास्य नाम्नोंऽते इत्यस्यायमर्थः।। अस्याभिवाद
नस्य नाम्नोंऽते योयमकारः। अकार इति स्वरमात्रोपलक्षणं। सर्वेषां नाम्नामकारांतत्वानियमाभावात्।। स
एवास्य स्वरः पूर्वाक्षरैः पूर्वाणि नामगतान्यक्षराणि यस्य स तथोक्तः। एवंविधः प्लुतो वाच्यो न पुनरन्य एव

७ वाच्य इति

कारो नाम्नोंऽते [illegible] । तथा च वसिष्ठः। आमंत्रितो स्वरोस्य प्लुवत इति आमं
त्रिते कर्तव्ये अभिवादक नाम्नोंऽते तस्मादभिवादनप्रत्यभिवादनयोरेव प्रयोगो भवति। अभिवादयेचैव अना
माहमस्मि भो इति। आयुष्मान्भव सौम्य विष्णुशर्मा३न् भो इति। क्षत्रियवैश्ययोस्तु वर्मगुप्तप्रयोग इति म
दनरत्नपारिजाते।। आत्म नाम गुरोर्नाम नामातिकृपणस्य च।। आयुष्काम... ज्येष्ठापत्यकलत्र

...क्षार पुलः अकारस्यास्य ४ ...स्वरः स प्लवते त्रिमात्रो भवतीत्यर्थः ८

राम

।।धर।।
।२९।।

त्र्योदश्यादिनिषिद्धस्तत्राभिवादनस्थले अतिरिक्त इति विज्ञेयं। अभिवादनं च हस्तद्वयेन कार्यं। अन्यथाकरणे
विप्रत्वादोषसंकीर्तनात्॥ जन्मप्रभृति यत्किंचिच्चेतसा धर्ममाचरेत्। सर्वं तं निःफलं याति एकहस्ताभिवाद-
नात्॥ एतदपि विहितविषयं पतः स एवाह॥ अजाकर्णेन विदुषो मर्त्यो नाम्नैकपाणिनेति॥ अजकर्णश्रोत्रसमो-
केत्वात्पुनः संपुटितेन करद्वयेन स्पर्शः। त्रिपिबाजाकर्णेसंपुटितौ यथा तथैव संपुटितेन करद्वयमपीत्यज-
कर्णौ॥ मनुः॥ यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनं। नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः॥ प्रत्य-
भिवादे तु यो विप्र आशिषं न प्रयच्छति। श्मशाने जायते वृक्षः काककंकादिसेवितः॥ शातातपः। पाखंडं
पतितं व्रात्यं महापातकिनं शठं। सोपानत्कं कृतघ्नं च नाभिवादेत्कथंचन॥ धावंतं च प्रमत्तं च मूत्रोत्सर्गकृतं तत्
था भुंजानमाचमनार्हं च नास्तिकं नाभिवादयेत्। वमंतं जृंभमाणं च कुर्वंतं दंतधावनं। अभ्यक्तशिरसं चैव
स्नांतं नैवाभिवादयेत्। बृहस्पतिः॥ जपयज्ञगणस्थं च समित्पुष्पकुशानलान्॥ उदपात्रार्घ्यभैक्ष्यपात्रं हस्तं
तं नाभिवादयेत॥ उदक्यां सूतिकां नारीं भर्तृघ्नीं ब्रह्मघातिनीं। अभिवाद्य द्विजो मोहाद्देहो रात्रेण शुध्यति

नं२

॥२२॥ ॥गदा॥

...पामनुस्मृतौ॥ प्रतिगृह्येप्सितं दंडमुपस्थाय च भास्करं॥१०

।जमदग्निदेवता प्रतिमां दृष्ट्वा यतिं दृष्ट्वा त्रिदंडिनं। नमस्कारं नकुर्याच्चेत्प्रायश्चित्तीभवेन्नरः॥ मनुः॥ अभि
वादनशीलस्य नित्यं वृद्धोपसेविनः॥ चत्वारि तस्य वर्द्धंते आयुः प्रज्ञा यशो बलं॥ एतच्चाभिवादनमधिकवयसा
मेव कार्यं तथा च मनुः। ज्यायांसमभिवादयेत् इति स्मृत्यर्थसारे॥ गुरवो मातास्तन्यधात्री च पितामहादयो
मातामहश्च भ्रातृसुताज्येष्ठपत्नी ताताचार्यश्चोपनेता च मंत्रविद्योपदेष्टा च तेषां पत्न्यश्चोपसंग्राह्याः॥ बाले समव
यस्के चाध्यापके गुरुवच्चरेत्। मातुलाश्च पितृव्याश्च श्वशुराश्च यवीयसोपि प्रत्युत्थायाभिवाद्याः॥ उपाध्याय ऋ
त्विजो ज्येष्ठभ्रातरश्च सर्वेषां पत्न्यश्चैवं॥ मातृष्वसा पितृष्वसा च सवर्णा भ्रातृभार्या च नित्यमभिवाद्याः विप्रोष्य
तूपसंग्राह्या ज्ञातिसंबंधियोषितः॥ विप्रोष्य विप्रं कुशलं पृच्छेत्क्षत्रमनामयं॥ वैश्यं क्षेमं समागम्य शूद्रमा
रोग्यमेव च॥ न वाच्यो दीक्षितो नाम्ना यवीयानपि सर्वथा। पूर्वैस्तमभिभाषेत भोभवत्पूर्वनामभिः॥ छ॥
इति श्रीगदाधरकृते गृह्यसूत्रभाष्ये द्वितीयकांडे चतुर्थकंडिका॥४॥ ॥छ॥ अथ भिक्षाचर्यमाह॥ ॥
अथ भिक्षाचर्याचरणं॥ ॥अत्रास्मिन्काले भिक्षाचर्याचरणं कर्तव्यमिति शेषः॥ प्रदक्षिणं परीत्याग्निं

समावर्तनेन च

राम

॥घर॥ ॥२२॥

याचेर

चरेद्भैक्षं यथाविधि ॥ एतच्चित्तयं नियोगमिति पारिजाते । कारिकायामप्येवं ॥ ॥ भवत्पूर्वं ब्राह्मणेनाभि
हितेद्भवन्मध्यमं राजन्यो भवदंत्यां वैश्यः ॥ ॥ भवच्छब्दः पूर्वो यस्याः सा भवत्पूर्वा तां भवत्पूर्वां ब्राह्मणेन वर्णो
त्तमेनाभिहितेतचरेत् । एवं भवच्छब्दो मध्ये यस्याः सा भवन्मध्या तां भिक्षां राजन्यः क्षत्रियो भिक्षेत । तथा भव
च्छब्दोंतो यस्याः सा भवदंत्या तां वैश्यो वर्णस्तृतीयो भिक्षेत । अयमर्थः । स गौरवसंबोधनार्थं भवच्छब्दमादिम
ध्यावसानेषु ब्राह्मणादिभिः कार्यः तच्च संबुध्यंतं । तिसृ इति सूत्र सामर्थ्यात् स्त्री प्रत्ययश्चेत्तत्सदं भवति । तत्रा
यं प्रयोगः । भवति भिक्षां देहीति ब्राह्मणः । भिक्षां भवति देहीति क्षत्रियः । भिक्षां देहि भवतीति वैश्यः ॥ ॥
तिस्रोऽप्रत्याख्यायिन्यः ॥ ॥ तिस्रः स्त्रियो भिक्षां भिक्षेत । किंभूता याः । अप्रत्याख्यायिन्यः । अत्र द्वितीयार्थे प्रथमा
भिक्षेतेति कर्तृ प्रत्ययांतस्याख्यातस्य कर्मकारकापेक्षितत्वात् । प्रत्याख्यातुं निराकर्तुं शीलं यासां ताः न प्र
त्याख्यायिन्यः अप्रत्याख्यायिन्यः ॥ याः स्त्रियो निराकरणं न कुर्वंति ताः भिक्षणीया इत्यर्थः ॥ शौनकेन तु वि
शेषो दर्शितः ॥ अप्रत्याख्यायिनमग्रे भिक्षेताप्रत्याख्यायिनीं वेति ॥ याज्ञवल्क्यः ॥ ब्राह्मणेषु चरेद्भैक्ष्यं
मनिंद्येष्वात्मवृत्तय इति । भिक्षामामुंचरेदित्यर्थः । आत्मवृत्तये स्वशरीरपोषणार्थं नाधिकं । ब्राह्मणेषु च

॥२२॥
॥गदा॥

रेदित्येतद्ब्राह्मणविषयं। अत एव व्यासः॥ ब्राह्मणक्षत्रियविशाम् अरेपु र्नैष्ठमन्वहं। सजातीयगृहेष्वेव सार्ववर्णि
कमेव वेति। सर्ववर्णः। प्रकृतवर्णेत्वपरः॥ ।षट्द्वादशापरिमितावा॥ ॥षट्त्रिंशत्स्त्रियः। द्वादशवास्त्रियः। अपरिमितो
वा। असंख्यातावान्निर्दिष्टेतेत्यर्थः॥ मातरं प्रथमामेके। ।एके आचार्या मातरं स्वजननीं निर्दिशंते त्याहुः॥ अयं च प्रथ
मोधर्मइतिकर्कः॥ ।आचार्याय भैक्षं निवेदयित्वा वाग्यतोहः शेषं तिष्ठेदित्येके। ततो ब्रह्मचारी निर्दिष्टांनिर्दि
त्वा आचार्याय उपनयनकर्त्रे भैक्षं निर्दिष्टं लब्धं निवेदयित्वा निवेदनं श्यं निर्दिष्टं लब्धेति। वाग्यतः संयमितवाक्
अहः शेषं तिष्ठेत्। इतः प्रभृति पावद् [illegible] मासीतेति एके वदंति। नवेसन्नो। अतो विकल्पः॥ ॥अग्निं समन्व
रणपात्सामिध आहृत्य तस्मिन्न ग्नो पूर्ववदाधाय वा चं विसृजेत। ब्रह्मचारी अहिंसन्नूं। आछिंदन् अरण्यात्समिध आ
हृत्य आनीय तस्मिन्न ग्नो उपनयनसंबंधिनि अग्नो पूर्ववत् पाणिना अग्निं परिसमूहतीति पूर्वोक्तरीत्या घा
यसमिदाधाय समिधानंत्वा वा चं विसृजेत। यदि वाग्यमो गृहीतस्तस्मिन्काले विसृजेत। अधः शाय्यशालव
वणाशी स्यात् दंडधारणम् अग्निपरिचरणं गुरुशुश्रूषा भिक्षा चर्या। अधः शायी स्यात्। अक्षारालव
णाशी नवेत्। दंडधारणं सर्वदाकार्यं। अग्नेः परिचरणं समिदाधानं परिसमूहनादि सायंप्रातरनयकाल्

हिंसाम कुर्वन्८

हू २

प्रथमे

राम

॥प्र २५
॥२२॥

रीत॥ गुरुशुश्रूषा च प्रत्यहं कर्तव्या स्वाध्यायानुरोधेन॥ निद्राचार्यानिद्राचरणं स्थि सर्पं॥ ॥मधुमांसं
समञ्जनोपर्यासनस्त्रीगमनानृतादत्तादानानि वर्जयेत्॥ ॥मधुप्रसिद्धं॥ मांसं च॥ मञ्जनं गंगादौ स्नानं प्र
तिषिध्यते। उद्धृतोदके न तु कार्यमेव। उपर्यासनं। आसनस्योपरि कौंदि आसनं निधाय उपवेशनं। स्त्रीगमनं
॥स्त्रीणां मध्ये अवस्थानं। अभिगमनस्योपरि वक्ष्यमाणत्वात॥ अनृतं असत्यभाषणं। अदत्तादानं। परद्रव्या
णां अदत्तानां स्वयं ग्रहणं॥ एतानि ब्रह्मचारी वर्जयेत॥ न कुर्यात॥ अष्टाचत्वारिंशद्वर्षाणि वेदब्रह्मच
र्यं चरेत्॥ ॥अष्टभिरधिकानि चत्वारिंशत् अष्टाचत्वारिंशत्॥ तानि अष्टाचत्वारिंशद्वर्षाणि वेद
ब्रह्मचर्यं चरेत्॥ चतुर्णामपि वेदानां ग्रहणार्थं एकमेव ब्रह्मचर्यव्रतं कुर्यात्॥ अस्मिन्पक्षे चतुर्णामपि
वेदानां एकमेव व्रतादेशः सर्वास्मिन्वेदाहुतयो हूयंते॥ ॥द्वादश वा द्वादश वा प्रतिवेदं॥ ॥अथवा प्रतिवेदं द्वा
दश द्वादश वर्षपर्यंतं ब्रह्मचर्यं चरेत्। अयमर्थः॥ एकं वेदं समाप्य समावर्तनं कृत्वा पुनर्द्वितीयवेदग्रहणं
॥याव ब्रह्मचर्यं चत्वारि स्नात्वैव वेदांतरेपि ब्रह्मचर्यं चरेत्॥ ॥यावद्ग्रहणं वा॥ ॥यद्यावद्वेदस्य वेदये

।।२४।।
।।पार।।

वेदानां वा पाठतो पर्यंतमस्वीकरणं तावद्ब्रह्मचर्यचरणं। अथ वर्णक्रमेण परिधानवस्त्राण्याह॥ ॥वासांसि शाणक्षौमाविकानि॥ ॥ब्राह्मणक्षत्रियविशां यथाक्रमं ब्रह्मचारिणां शाणक्षौमाविकानि वासांसि वस्त्राणि यथासंख्यं परिधानार्थं भवंति। शाणं शणमयं। क्षौमं॥ क्षुमा अतसी तद्विकारमयं। आविकं। अवेर्मेषस्य विकार आविकं। मेषरोमनिर्मितं। सर्वेषां कार्पासं वा विकृतमिति वसिष्ठः। शुक्लमहतं वासो ब्राह्मणस्य मांजिष्ठं क्षौमं वा क्षत्रियस्य पीतं कौशेयं वैश्यस्येति॥ कारिकायामप्येवं। कौशेयं पट्टविशेषमिति पारिजाते॥ ॥ऐणेयमजिनमुत्तरीयं ब्राह्मणस्य॥ ॥एणी हरिणी तस्या इदमैणेयं चर्म उत्तरीयं ब्राह्मणस्य ब्रह्मचारिणो भवति। अत्र कारिकायां प्रयोगरत्ने च विशेषः॥ अंगुलं बहिर्लोम यथा स्यात्तथोत्तरं गुलं। एकखंडं त्रिखंडं वा धार्यं तदुपवीतवत्॥ ॥रौरवं राजन्यस्य॥ ॥राजन्यस्य क्षत्रियस्य ब्रह्मचारिणो रुरुनामारण्यसत्त्वविशेषस्तदीयं चर्म उत्तरीयं भवति॥ ॥सर्वेषां वा गव्यमसति प्रधानत्वात्॥ ॥असति यथोदिते चर्मणि सर्वेषां वर्णानां वा गवं चर्म भवति॥ कुत एतत्॥ पुरुषप्रधानत्वात् गव्यस्य चर्म

गौतमः॥४

५

राम

२ आजं गव्यं वा वैश्य
२ स्य॥ अजस्येदं आजं ब्रह्मचारिणः आजं अजाया चर्म उत्तरीयं भवति। अथवा गोसंबंधि चर्म उत्तरीयं भवति
२ दं चर्म आजं ... गव्यं गोरिदं चर्म गव्यं वैश्यस्योत्तरीयं भवति॥२

।।पार।।
।।२४।।

णः॥पुरुषश्चधानंह्यिगसंचर्मश्रयते।तेऽश्ववस्थापपुरुषंगावोतांत्वचंग्रदधुरिति॥तेदेवाःपुरुषत्वमवस्थाप
उत्कृत्यगतांत्वचंगविग्रदधुः घतवंतइतिश्रुत्यर्थः॥ ॥मौंजीरशनाब्राह्मणस्य॥ ॥मुंजःशरःतन्म
यीमौंजीमेखलाब्राह्मणस्यब्रह्मचारिणोभवति॥ ॥धनुर्ज्याराजन्यस्य॥ ॥धनुषश्चापस्यज्यागुण
मेखलाक्षत्रियस्यब्रह्मचारिणोभवति।सामर्थ्याच्छस्त्रपुमयीवेणुमयीवा॥इयंत्रिवृन्नकार्या॥ज्यात्व
विनाशप्रसंगात्॥ ॥मौर्वीवैश्यस्य॥ ॥मुरुदितितृणविशेषः॥तन्मयीमौर्वीमेखलावैश्यस्यब्रह्मचा
रिणोभवति॥ ॥मुंजालाभेकुशाश्मंतकबल्वजानां॥ ॥मुंजालाभेब्राह्मणस्यकुशाश्मंतकबल्वजानां
संबंधिनीरशनाभवति॥कुशमयीवा॥अश्मंतारव्यतृणमयीवा॥बल्वजीवाभवति॥नर्तयत्तुव्याख्या
नेलभ्यते।मुंजालावशब्दोत्रधनुर्ज्यामौर्व्यलाभोपलक्षणार्थइतिरेणुगार्गहरिहराः॥मुंजाद्यलाभेवर्ण
क्रमेणकुशाश्माश्मंताद्याइतिमदनपारिजाते॥पालाशोब्राह्मणस्यदंडः॥ ॥ब्राह्मणस्यब्रह्मचारिणःपा
लाशोदंडोभवति॥ ॥बैल्वोराजन्यस्य॥ ॥बैल्वोबिल्ववृक्षोद्भवोदंडोभवति॥ ॥औदुंबरोवै

रपस्य॥ ॥वैश्यस्य ब्रह्मचारिणः औदुंबरवृक्षोद्भवो दंडो भवति॥ अआचार्येणानुक्तमपि दंडमानमुपयु
क्तत्वाद्विहितत्वाच्छास्त्रांतरीयं ग्राह्यं। तच्चाकेशसंमितो ब्राह्मणस्य ललाटसंमितः क्षत्रियस्य घ्राणसंमि
तो वैश्यस्येति दंडं प्रक्रम्याक्रमिति अपरामन्वाख्याद्दंतुलसंभवत्र त्वेन हरिहरभाष्योतिष्ठति। भर्तृयज्ञ
कर्कादिभाष्येषु नोपलभ्यतेऽतो हि भ्रममेतदित्याभाति॥ ॥सर्वे वा सर्वेषां॥ ॥अथवा सर्वे पालाशाद
यो दंडाः सर्वेषां ब्राह्मणक्षत्रियविशां मानियमेन भवंति। न प्रतिवर्णं जातिव्यवस्था भवति॥ ॥आचा
र्येणाहूत उत्थाय प्रतिशृणुयात्॥ ॥आचार्येण उपनयनकर्त्रा आहूत आकारितो ब्रह्मचारी आस
नादुत्थाय प्रतिशृणुयात्॥ प्रतिवचनं दद्यात्॥ ॥शयानं चेदासीनः॥ ॥चेत्यदि आचार्यः शयानं स्व
पंतं ब्रह्मचारिणं आह्वयति तदा आसीन उपविष्टः सन् प्रतिवचनं दद्यात्॥ ॥आसीनं चेत्तिष्ठन्॥ ॥
चेद्यदि आसीनं उपविष्टं ब्रह्मचारिणं आकारयत्याचार्यस्तदा तिष्ठन् प्रतिवचनं दद्यात्॥ ॥तिष्ठंतं चेद
भिक्रामन्॥ ॥चेद्यदि तिष्ठंतं ब्रह्मचारिणं आह्वयति तदा अभिक्रामन् आचार्याभिमुखं व्रजन्

स ब्रह्मचारी २

राम

चार्यः २

प्रतिवचनं कुर्यात्॥ ॥अग्निकामं तं चेदभिधावन्॥ ॥चेद्यदि अग्निकामं तं ब्रह्मचारिणं अग्निकामं तं ब्रह्मचारिणं
आकारयति तदा ब्रह्मचारी अग्निं धावन् आचार्याभिमुखं धावन् प्रतिवचनं दद्यात्॥ अस्यार्थवादमाह॥ ॥सए
वं वर्तमानो मुत्राघवसत्यमुत्राघवसतीति॥ ॥सब्रह्मचारी पूर्वोक्तब्रह्मचर्यधर्मे एव वर्तमानः अमुत्र स्वर्गे
लोके अघ इहैव स्थितः सन् वसति तिष्ठति। द्विरुक्तिः प्रश्नसार्था॥ ॥तस्य स्नातकस्य कीर्त्तिर्भवति येनै
वं ब्रह्मचर्यानुष्ठानं कृतं तस्य स्नातकस्य समावर्त्तस्य कीर्त्तिर्यशो भवति। यथोक्तधर्मकर्त्तुः फलं चैतत्॥ स्नात
कलक्षणमाह॥ ॥त्रयः स्नातका भवंति॥ ॥त्रय त्रिविधाः स्नातका भवंति॥ विद्यास्नातको व्रतस्नातको विद्या
व्रतस्नातक इति॥ ॥त्रिविधाः स्नातका इत्युक्तं तत्रैको विद्यास्नातकः द्वितीयो व्रतस्नातकः तृतीयो विद्याव्रतस्ना
तक इति॥ ॥समाप्य वेदमसमाप्य व्रतं यः समावर्तते स विद्यास्नातकः॥ समाप्य वेदं पाठतः अर्थतश्च वेदं वेद
स्य मंत्रब्राह्मणात्मिकां शाखां असमाप्य व्रतं द्वादशवार्षिकं ब्रह्मचर्यमसमाप्य यः समावर्तते स्नाति स विद्या
स्नातक इत्युच्यते॥ समाप्य व्रतमसमाप्य वेदं यः॥ समावर्तते स व्र[illegible]तस्नातक इत्युच्यते॥ व्रतं ब्रह्म

६ अर्वाक् द्वाविंशाद्वर्षात् क्षत्रियस्यानतीत एवोपनयनकालो भवति ॥ ६

॥२६॥
॥गद्रा॥

चर्यं द्वादशवार्षिकं समाप्य वेदमसमाप्य असंपूर्णमधीत्य यः समावर्तते स व्रतस्नातक इत्युच्यते ॥ एवं व्रतस्नात
कस्य विवाहोत्तरकालमध्ययनसमापनं वेदार्थज्ञानं चेति मंतव्यं ॥ ॥ उभयं समाप्य यः समावर्तते स विद्याव्र
तस्नातकः ॥ ॥ उभयं वेदं ब्रह्मचर्यं च समाप्य यः स्नाति स विद्याव्रतस्नातक इत्युच्यते ॥ लक्षणप्रयोजनं च स्नात
कानेकत्वादिषु ज्ञेयं ॥ उपनयनकालपरमावधिमाह ॥ ॥ आषोडशाद्वर्षाद्ब्राह्मणस्यानतीतः कालो भव
ति ॥ अर्वाक् षोडशाद्वर्षात् ब्राह्मणस्य अनतीतः अनतिक्रांत एवोपनयनकालो भवति ॥ ॥ आद्वाविंशा
त्क्षत्रस्य आचतुर्विंशाद्विशस्य ॥ ॥ अर्वाक् चतुर्विंशाद्वर्षात् वैश्यस्यानतीत एवोपनयनकालो भवति ॥ ॥
अत ऊर्ध्वं पतितसावित्रिका भवंति ॥ ॥ उक्तकालादूर्ध्वं अनुपनीता ब्राह्मणादयः पतितसावित्रिका भवं
ति संपद्यंते । अधिकाराभावात् । पतिताः स्खलिताः सावित्री येभ्यस्ते पतितसावित्रिकाः ॥ ॥ नैनानुपनयेयु
र्नाध्यापयेयुर्न याजयेयुर्न चैभिर्व्यवहरेयुः ॥ ॥ एतान् पतितसावित्रिकान् नोपनयेयुः आचार्याः ॥ ॥ अस्मा
नोपनीतान् अपि नाध्यापयेयुः एवमध्यापितान् अपि न याजयेयुः पत्नीं न कारयेयुः ॥ एभिः सह कर्मभिः व

राम

प२

॥५२॥

सहभोजनादिभिः ॥५३॥

वहारमपि न कुर्युः॥ संति गर्भाधानादीनि नियतकालानि कर्माणि तेषु कालातिक्रमे प्रायश्चित्तमाह॥ ॥कालाति
क्रमे नियतव [illegible] त॥ ॥गर्भाधानादि नियतकालानां [illegible] कर्मणां नियतकालव्यति
क्रमे सति प्रायश्चित्तं नियतवत्॥ नित्यवत्। नियते श्रौतकल्पे नैमित्तिके पुवच्छिहितं स्मार्तं तु देवानादिष्टं भवति॥
तेष्वाग्रविज्ञाते प्रतिमहाव्याहृतिभिः स्रुवचतुर्थं सर्वप्रायश्चित्तं चेति। कालव्यतिक्रमात् इत्याद्यपि यज्ञोपवीतिनाव
द्धशिखिना पवित्रपाणिना बद्धकच्छेन प्रदक्षिणमाचांतेन शुचिना स्नातेन न कर्म कर्तव्यमित्यादि स्मृत्यं
तरविहितेष्वपि च्युतेष्वादित्यन्ने एतदेव भवति। नैमित्तिकांतरविधानात्॥ अथ वसथ्याग्निसाध्यत्वेन किं काग्नि

गर्भाग्नि ४

साध्याग्नि

वस्त्र २

साध्यकर्मसु च तुर्गृहीतान्येतानि सर्वत्रेति प्रायश्चित्तस्य त्रेउक्तत्वात् अत्र चतुर्गृहीतं गृहीत्वा होमः कार्यः॥
चतुर्गृहीतं च स्रुगभावे नैस्त्रुव वत्सः स्रुगुत्पाद्येति रामवाजपेयिभिः प्रायश्चित्ते उक्तं स्माचहोमसंबंधा
देकं कृतीन्नवति। स्मोरवादि रणेवा स्रुवेण प्रायश्चित्तहोम इति हरिहरः॥ तदप्युक्तं। अत्र श्रौतातिदेशानि
पतवदिति भगवतोक्तेः॥ तत्र चतुर्गृहीतं विहितं तदत्रापि प्राप्नोत्येव। चतुर्गृहीतं स्माचे वसंभवत्य

संभवति ३

तःस्त्रकृप्राप्ताकेन निवार्यते॥ किंचापूर्णाहुतिधर्मोपि हरिहरैरंगीकृतस्तत्र पठितास्तु कृत्स्नयं कृतो नांगीकृते
ति तैत्तिरीयादिग्रह्योक्तेतिकर्तव्यं तांगीकृता स्यात्॥ ततः स्यात्॥ स्रुवेण होमः सा नांगीकृते मूलमति प्रसंगे ना का
रिकायां॥ मुख्यकाले नरैः कर्मकर्तुं यदि न शक्यते गौणकालेपि कर्तव्यं तदनादिष्टपूर्वकं॥ इदं प्रायश्चित्तं त्वना
दिष्टं। यत्र विशिष्टं प्रायश्चित्तं स्मर्यते। तत्र नैतत्र नैतत्॥ यतः किं तु तदेव च भवति। यथा सर्वकर्ममध्ये तु हूत
स्याचमनं स्मृतं तथा। ग्रैवासमुत्सर्गे प्रहासे नृतभाषणे। मार्जारमूषकस्पर्शे ग्राकृष्टे क्रोधसंभवे
। निमित्तेषु च सर्वेषु कर्म कुर्वन्नपः स्पृशेत् इति॥ राम वाजपेयिनः॥ ॥ त्रिपुरुषं पतितसावित्रिकाणा
मपत्ये संस्कारो नाध्यापनं च॥ ॥ त्रीन् पुरुषान् यावत् ये पतितसावित्रिकाः पितृपुत्रपौत्राः तेषामपत्ये च
तुर्थपुरुषे स्तु संस्कार उपनयनसंस्कारो भवति त्रिभ्रतःहरिहरत्नाष्यमतं॥ ॥ तेषां संस्कारे प्सुर्व्रात्यस्तो
मेनेष्ट्वा काममधीयीरन् व्यवहार्या भवंतीति वचनात्॥ ॥ तेषां पितृपौत्राणां त्रयाणां पतितसावित्रिका
णां मध्ये यः संस्कारेप्सुः ग्रात्मानं संस्कारयितुकामः स व्रात्यस्तोमेनेष्ट्वा व्रात्यस्तोमकृत् व्यवहार्यो भव

योप राम

अध्यापनं च न भवति २ नष्टैय २ पुत्र २

ति॥ कामं इच्छया व्रात्यस्तोमेनेष्ट्वा अधीयीरन्वेदं पठेयुः। व्यवहार्याः शिष्टानामध्यापनादिकर्मसु योग्या भवंती
ति वचनात्। अतश्च एवं धर्मकादीनां विशेषः प्रयोगपारिजाते। ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः स इति स्मृतिः॥
तस्मात् षंढबधिरकुब्जवामनपंगुषु। जडगद्गदरोगार्त्तशुष्कांगविकलांगिषु। मत्तोन्मत्तेषु मूकेषु शयन
स्थे निरिंद्रिये। ध्वस्तपुंस्त्वेषु चैतेषु संस्काराः स्युर्यथोचितं॥ मत्तोन्मत्तौ न संस्कार्याविति केचित्प्रवदंते। कर्मस्वन
धिकाराच्च पातित्यं नास्ति चेत्तयोः। तदपत्यं च संस्कार्यमपरे त्वाहुरन्यथा। संस्कारं होममंत्रादीन् कारयेत्साच
र्यं हवेत्। उपनेयांश्च विधिवदाचार्यस्य समीपतः। आनीयाग्निसमीपे वा सावित्रीं स्पृष्ट्वा जपेत्॥ कन्यास्वी
करणादन्यत्सर्वं विप्रेण कारयेत्॥ एवमेव द्विजैर्जातौ संस्कार्यौ कुंडगोलकौ इति। स्मृत्यर्थसारेप्येवं। अत्र
चापस्तंबः॥ अग्रहणे मद्युष्टकर्मणामुपनयनं। इदं च रथकारस्योपनयनं। तस्य च मातामहीष्यारकंम्य
ऽतो। अग्रदुष्टकर्मणां मद्यपानं रहितानामिति॥ ॥छ॥ इति श्रीगदाधरकृते गृह्यसूत्रभाष्ये द्वितीयकांडे
पंचमी कंडिका॥ ॥छ॥ अथ पदार्थक्रमः॥ ॥ मुंजोपनये द्वितीयादिस्वाध्यायपातित्ये पुनरध्यापनेन

॥२८॥
॥गा.द॥

मित्रिकानध्याये पूर्वाह्ने शुभमुहूर्ते शुभनक्षत्रे तारादौ गुरुशुक्रयोर्बाल्यवार्द्धकास्तराहित्यादौ ज्योतिर्विदुक्ते शुभे
काले उपनयनं कार्यं॥ तत्राधिकारसिद्ध्यर्थं प्रायश्चित्तमाह वृद्धविष्णुः। कृच्छ्रत्रयं चोपनेता त्रीन्के षोडश
वटुश्चरेत्॥ आचार्यो द्वादशसाहस्रं गायत्रीजपेत्तथा। नांदीश्राद्धं कृते चैतत्संपादनध्यापस्य कालिकः॥
तदोपनयनं कार्यं वेदारंभेन कारयेत्॥ उक्ते काले उपानेनीषुः पिता पूर्वेद्युर्बटोः परिधानार्थं मुक्तमी
षट्टीतं नवं सदेशी परेणाधृतं वस्त्रं उत्तरीयं वाजिनं यज्ञोपवीतं मेखलां मवृणं मज्जुं सोमदंडीनं दंड

या

कौपीनं भिक्षापात्रं भोजनेच संपादयेत्स्वस्योपनेतृत्वाधिकारसिध्यै कृच्छ्रत्रयं द्वादश सहस्रगायत्रीजप
म्बाकुमारेणापि कामचारकामवादकामभक्षणादिदोषापनोदार्थं कृच्छ्रत्रयं कारयित्वा स्वस्तिवाचनांकुर
रोपणं गृहमखं नांदीश्राद्धानि संकल्पपूर्वकं कृत्वा मंडपप्रतिष्ठां कुर्यात्॥ तत्र संकल्पः॥ अस्य कुमार
स्योपनयने गृह्यानुकूल्यसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं गृहपतं कारिष्ये॥ गृहपतं स प्राप्य देवताका
त्वीस्मत्वा अस्य कुमारस्य द्विजत्वसिद्धिद्वारा वेदाध्ययनाधिकारसिद्ध्यर्थं उपनयनं करिष्ये॥ त

राम

॥घर॥
॥रथ॥

दं गत्कृतं गणपतिपूजनपूर्वकं स्वस्तिवाचनेनांदीश्राद्धं मंडपप्रतिष्ठां कुलदेवतादिस्थापनं करिष्ये ॥ उप
नयनेन सह चौलकरणप्रहेतदक्षिसंकल्प्य कीर्तयेत् ॥ मंत्रेण च स्वस्तिवाचन ग्रहयज्ञ नांदीश्राद्धादीनि
कुर्यात् ॥ अथापरेद्युः कृतनित्यक्रियः कुमारस्य वपनं कारयित्वा ब्राह्मणत्रयं भोजयित्वा कुमारं च भोजयि
त्वा बहिः शालायां पंचसंस्कारपूर्वकं लौकिकाग्निं स्थापयेत् ॥ ततो वैकल्पिकावधारणं ॥ तत्संमी मेखला
बंधनं ॥ दंडः पालाशः ॥ आसीनाय गायत्रीप्रदानं ॥ एषाते इति समिदाधानं ॥ मात्रपूर्वकं अपरिमिताश्च नि
त्याणीयाः ॥ नवाग्नेतोदः श्रोषंतिप्योदितिमक्षः ॥ ततश्चाचार्योपनीताः पुरुषाः कृतमंगलस्नानेस्रग्माल्याद्यै
रलंकृतं बटुमाचार्यसमीपे आनयंति ॥ ततश्चाचार्यो बटुमग्नेः पश्चादवस्थाप्य ब्रह्मचर्यमागामिति ब्रूहि
ति वदति ॥ ब्रह्मचर्यमागामिति ब्रह्मचारी ब्रूयात् ॥ ततो ब्रह्मचार्यसानीति ब्रूहीत्याचार्यो वदति ॥ ब्रह्मचार्य
सानीति ब्रह्मचारी ब्रूयात् ॥ ततः कुमारमाचार्यो वासः परिधापयति येनेन्द्रायेति ॥ ततः आचार्यः कुमार
स्य कटिदेशे इयं दुरुक्तमिति मंत्रेण मेखलां बध्नाति ॥ युवासुवासा इति वा बंधनं ॥ तत्संमी वा ॥ ततो बटु

॥२५॥
॥गदा५

यज्ञोपवीतमिति मंत्रं पठित्वा दक्षिणबाहुमुद्धृत्य वामस्कंधे यज्ञोपवीतं निवेशयति। ततो बटुर्मित्रस्य चक्षुरिता
जिनमुत्तरीयं गृह्णाति। ततः आचार्यो दंडं माणवकाय प्रयच्छति। माणवको यो मे दंड इति प्रतिगृह्णाति दंडं। अथा
चार्यः स्वांजलिना बटोरंजलिमद्भिः पूरयति आपो हिष्ठेति तिसृभिः॥ सूर्यमुदीक्षस्वेत्याचार्य आह॥ ततो
बटुस्तच्चक्षुरिति सूर्यं पश्यति। ततः आचार्यो माणवकस्य दक्षिणंमस्योपरि हस्तं नीत्वा हृदयमालभते मम
व्रते ते इति॥ ततः आचार्यो माणवकस्य दक्षिणहस्तं गृहीत्वाह को नामासीति॥ अमुकशर्माहं भो ३ इति ब
टुः प्रत्याह॥ ततो गुरुर्बटुं प्रति कस्य ब्रह्मचार्यसीति वदति। भवत इति बटुराह। तदैवाचार्य इंद्रस्य ब्रह्म
चार्यसीति मंत्रं ब्रूयात्॥ तवामुक ब्रह्मचारी प्रयोगमंत्रांते। अथैनमाचार्यः परिददात्येतेभ्यः परिददा
। प्रजापतये त्वेति॥ ततो बटुरग्निं प्रदक्षिणीकृत्याचार्यस्योत्तरत उपविशति॥ ततो गुरुर्ब्रह्मोपवेशना
दि दक्षिणादानांतं चूडाकरणवत् कर्म कृत्वा कुमारस्य स्वासनं करोति। तत्रैवं। ब्रह्मचार्यसीत्याचार्य आ
ह। असानीति ब्रह्मचारी प्रत्याह। अपोशानेत्याचार्य अशानीति ब्रह्मचारी प्रत्याह। कर्म कुर्वित्याचार्य

राम

॥घर॥
॥२५॥

आह । करवाणि ब्रह्मचारी प्रत्याह । मा दिवा सुषुप्था इत्याचार्य आह । न स्वपीमीति ब्रह्मचारी ॥ वाचं यच्छेत्याचार्यः
यच्छानीति ब्रह्मचारी । समिधमाधेहीत्याचार्यः आदधानीति ब्रह्मचारी ॥ अपोऽशानेत्याचार्यः अश्नानीति ब्रह्म
चारी । अथाचार्यो ब्रह्मचारिणे अग्नेरुत्तरतः प्रत्यङ्मुखायोपविष्टायोपसन्नाय समीक्षमाणाय समीक्षिताय सा
वित्रीं ब्रूयात् । तत्रैवं प्रणवव्याहृतिपूर्वकं प्रथमम् एकैकं पादं ॥ ततो द्वितीयम् अर्धर्चशः ॥ तथैव ततीयं सर्वां स्वयं
ववदु नासह पठेत् ॥ दक्षिणत आसीनायवासा सावित्री प्रदानं ॥ ततो ब्रह्मचारी समिदाधानं करोति । तत्र प्र
थमम् अग्नेः संधुक्षणं पंचभिर्मंत्रैरिंधनप्रक्षेपणं ॥ अग्ने सुश्रव इति प्रथमं । यथा त्वमग्न इति द्वितीयं । एवं मां
समिति तृतीयं । यथा त्वमग्ने देवानामिति चतुर्थं ॥ एवमहं मनुष्याणामिति पंचमं । प्रदक्षिणमग्निमुद
केन पर्युक्ष्योत्थाय [?]तूष्णीं समिधमग्नये[?] समिधमित्यग्नौ प्रक्षिपति । एवं द्वितीयां । तथैव तृतीयां । एषा त इति मंत्रे
ण समिधामाधानं । [?]अपवाऽभ्यामपि[?] समिधामाधानं ॥ पुनः पंचभिर्मंत्रैरग्नेः संधुक्षणं पूर्ववत् । अग्ने
पर्युक्षणं ॥ ततस्तूष्णीं पाणी प्रतप्य । तनूपा अग्नेऽसि तन्वं मे पाहीति मुखं विमार्ष्टि । ततो द्वितीयवारं पा

॥३०॥
॥गादा॥

णीघृतमप्यस्या पुर्दा अग्नेस्यायुर्मे देहीति मुखं विमार्ष्टि। एवं तत्संपातेणाभ्यक्तमप्युवर्चोदा इति प्रतिमंत्रं मुखमा
जेनं॥ वर्चोदा अग्नेसि वर्चो मे देहि॥ अग्ने यन्मे तन्वा ऊनं तन्म आपृण॥ मेधां मे देवः सविता आदधातु मेधां
मे देवी सरस्वती आदधातु। मेधामश्विनौ देवावाधत्तां पुष्करस्रजौ। अपां चारतो नुष्टुपाः प. दा थी॥ अंगानि
च म आप्यायंतामिति शिरः प्रभृति पादांते सर्वांगाणालभंते॥ वाक्च म आप्यायतामिति मुखालंभनं। प्राणश्च
म आप्यायतामिति नासिकयोरालंभनं॥ चक्षुश्च म आप्यायतामिति नेत्रयोरालंभनं॥ श्रोत्रं च म आप्याय
तामिति दक्षिणकर्णमालभ्यानेनैव मंत्रेण वामालंभनं। यशोबलं च म आप्यायतामिति जप॥ ततो भस्मना ल
लाटे तिलकं कुर्यात् त्र्यायुषं जमदग्नेरिति॥ कश्यपस्य त्र्यायुषमिति ग्रीवायां तिलककरणं। यद्देवेषु त्र्यायुष
मिति दक्षिणांसे। तन्नो अस्तु त्र्यायुषमिति हृदये॥ ततोभिवादनं॥ तत्रैवं प्रयोगः॥ मांडव्यसगोत्रः॥ भार्गव
च्यवन आप्नवान और्व॥ जामदग्न्येति पंचप्रवरः॥ अमुकनामाहमस्मि भो३॥ कारिकायां
पत्नीकारिकैः कैः ल्वापादोपग्रहणं गुरोः॥ उभाभ्यां तु पाणिभ्यामिति पेठीनसेर्वच॥ आयुष्मान् सौ

ति
राम
॥घर॥
॥३०॥

विष्णुशर्मन्नहं भो ३ इत्याचार्यस्य प्रत्यभिवादनं॥ ततोऽवरुद्धाभिवादनं॥ अथ भिक्षाचर्यचरणं। तत्र ब्रह्मचारी पात्रमादाय भ
वति भिक्षां देहीत्येवं भिक्षां याचते॥ तिस्रोऽप्रत्याख्यायिन्यः षड् द्वादश वा अपरिमिता वा॥ ततो भिक्षामाचार्याय
निवेदयेत्॥ अत्र मध्याह्नसंध्यां कुर्यादिति प्रयोगपारिजाते। नैतिकस्तु न इह कारः॥ ततो भैक्षं भुंक्ष्वेति गुरुणाऽ
नुज्ञातो भोजनं कुर्यात्॥ इतः प्रभृति सर्पिःसमर्पणावत्त्वाम्यतो वा भवेत्॥ ततः सायंकाले संध्यावंदनपूर्व
कमग्निपरिचरणं पाणिनाग्निं परिसमूहतीत्यादि अग्निवादनांतं पूर्ववत्॥ उपनयनाग्निस्त्रिरात्रं धार्यः॥
अहमेतमग्निं धारयंती त्यापस्तंबोक्तेः॥ यावद्व्रतमग्निरक्षणमिति गर्गपद्धतौ॥ ॥इत्युपनयनेपदार्थ
क्रमः॥ ॥एषः प्रयोगः स्वस्वकाले कृतपूर्वसंस्कारस्य॥ असंस्कृतस्य तु विशेष उच्यते॥ आचार्य उपनयना
त्पूर्वदिने बटुना सह मंगलस्नातः प्राणानायम्य तिथ्यादिसंकीर्त्य ममकुमारस्य गर्भाधानपुंसवनसी
मंतजातकर्मनामकरणनिष्क्रमणान्नप्राशनचौलकर्मीतानां संस्काराणां कालात्ययजनितदोषपरमेश्वरप्री
त्यर्थं प्रायश्चित्तहोमं करिष्य इति संकल्प्य पंचसंस्कारपूर्वक[क]मग्निं लौकिकं स्थापयित्वा संस्काल्यान्मा

॥३१॥
॥ग.दा॥

ज्यं निरूप्याग्नावधिश्रित्य तस्मिन्नेवं दर्भैः समन्त्र्याज्यमुद्वास्य कुशाग्रेणाज्यमुत्पूयावेक्ष्य स्रुवेणादाय समिद्वत्तेपंक्
त्वा नवाहुतीर्जुहोति॥ भूः स्वाहा १ भुवः स्वाहा २ स्वः स्वाहा ३ भूर्भुवः स्वः स्वाहा ४। त्वन्नो अग्ने एधि स्वाहा ५ स त्वन्नो
एधि स्वाहा ६ अयाश्चाग्ने० स्वाहा ७ ये ते शतं० स्वर्कास्वाहा ८॥ उदुत्तमं स्वाहा ९। इति नवाहुतिर्होमात्मकं प्रायश्चि
त्तं कृत्वा चौलातिपतितसंस्काराणां प्रमादादकरणे प्रत्येकं पादकृच्छ्रं चौलाकरणे ऽर्द्धकृच्छ्रं बुद्धिपूर्वं चौलातिपि
त्तं कृत्वा चौलातिपतितसंस्काराणां प्रमादादकरणे प्रत्येकं पादकृच्छ्रं॥ चौलाकरणे ऽर्द्धकृच्छ्रं बुद्धिपूर्वं चौलातिपि
त्याकरणे प्रत्येकमर्द्धकृच्छ्रं वद्द्विगुणाकारयेत्। अशक्तौ प्रत्याम्नायपक्षे गोदानतिलाहुतिसहस्रद्वयसहस्रगायत्री
जपादयशक्त्यनुसारेण भोजनादिष्टैकं प्रायश्चित्तं कारयित्वा ऽतीतानिजातकर्मादीनि कृत्वा पूर्वोक्तप्रकारेणोपनयनतं
त्रं सर्वमाचरेत्॥ उपनयनेन सह चौलकरणे पूर्वं घुः संस्कारद्वयं संकीर्त्य पुण्याहवाचनमातृकापूजनांदी
श्राद्धानि कृत्वा परेद्युर्मंगलस्नानब्राह्मणभोजनादिवन्दनांतं पूर्वोक्तचौलप्रयोगं सर्वं कृत्वा पुनःस्तिथ्या
दि संकीर्त्य कुमारस्य वपनादि उपनयनं सर्वं कार्यं॥ अत्र शौनकः॥ आरभ्याधानमाचौलात्कालेतीते तु
कर्मणां॥ व्याहृत्याज्यं तु संस्कृत्य हुत्वा कर्मयथाक्रमं॥ एतेष्वेकैकलोपे तु पादकृच्छ्रं समाचरेत्॥ चूडाया अ

राम

॥घर॥
॥३१॥

४ सर्वेषु

ईकृच्छ्रः स्यात्तपदात्येवमीरितं ॥ अनादिष्टे तु सर्वत्र द्विगुणं द्विगुणं चरेत् । कात्यायनः । लुप्ते कर्मणि सर्वत्र प्रायश्चि-
त्तं विधीयते । प्रायश्चित्ते कृते पश्चाल्लुप्तं कर्म समाचरेत् । स्मृत्यर्थसारे चैवं ॥ आश्वलायनकारिकायां तु प्रायश्चि-
[illegible]तीतकर्मकृताकृतमित्युक्तं । प्रायश्चित्ते कृते पश्चादतीतमपि कर्म वै ॥ कार्यमित्येक आचार्या नेत्येके तु विप-
श्चित इति । मंडनेन तु ॥ कालातीतेषु प्रायश्चित्तकृतेषु च । कालातीतानि कुर्वीत विद्ध्यादुत्तराणि तु इत्युक्तो ।
तत्र सर्वेषां तंत्रेण नांदीश्राद्धं कुर्यात् । देशकालकर्त्रैक्यात् ॥ अत्र ब्रह्मचारिधर्माः ॥ अधःशयनं ॥
अक्षारालवणान्नं । दंडधारणं ॥ अरण्यात्स्वयंप्रशीर्णानां समिधामाहरणं । सायंप्रातर्मध्याह्ने-
च संध्योपासनं ॥ पदिसमूहनादिपर्युक्षणमग्निपरिचरणं । सायंप्रातःसंध्योपासनानंतरं गुरुशुश्रूष-
या स्थातव्यं । भोजनार्थं वारद्वयं प्रातःसायंकाले च भिक्षाचरणं । भिक्षान्नाशनं । लोहमृन्मयपर्णदोवा कार्ये
। मधुमांसयोरभक्षणं ॥ उन्मज्जनं न कर्त्तव्यं ॥ उद्धृतोदकेन स्नातव्यं ॥ आसनोपरि मसूरिकास्थापनं
कृत्वा नोपवेशनं । स्त्रीणां मध्ये नावस्थानं । नानतवदनं । नादत्तादानं । अन्येऽप्यस्मृत्यंतरोक्ता नियमाः ॥

गो०

॥३२॥
॥गदा॥

याज्ञवल्क्यः ॥ मधुमांसाञ्जनोच्छिष्टं शुक्लस्त्रीप्राणिहिंसनं । भास्करालोकनाश्लीलपरिवादादि वर्जये-
दिति [illegible] जाते कौत । शुक्लं पुरुषं वचः ॥ पर्युषितान्नं च ॥ मनुः ॥ अभ्यंगमंजनं चाक्ष्णोरुपानछ-
त्रधारणं । वर्जयेदिति प्रकृतं । पारिजाते कौर्मे । नाददीतैव वीक्षेत नाचरेद्दंतधावनं । गुरूच्छिष्टं भिष-
ज्यार्थं प्रयुंजीत न कामतः । एतच्चाशिष्य मध्वादिविषयं । अन्यस्य गुरूच्छिष्टस्य सर्वस्य प्राप्तेः ॥ वसिष्ठः ॥
सव्येष्वाच्छिपीत कामं गुरोरुच्छिष्टं भेषभोषधार्थं सर्वं प्राश्नीयादिति । ज्येष्ठभ्रातुरप्यपि चैवं ॥ तथा-
पस्तंबः । पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोज्यमिति । स्मृत्यंतरे ॥ गुरुवद्गुरुपुत्रः स्यादन्यत्रोच्छिष्टभोज-
नात् ॥ प्रचेताः । ताम्बूलाभ्यंजनं चैव कांस्यपात्रे तु भोजनं । यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत् ॥ प-
मः ॥ मेखलामजिनं दंडमुपवीतं च नित्यशः ॥ कौपीनं कटिसूत्रं च ब्रह्मचारी तु धारयेत् ॥ ॥ अथ ब्र-
ह्मचारिव्रतलोपे प्रायश्चित्तं ॥ ॥ तत्र बौधायनः ॥ अत्राशौचाचमनसंध्यावंदनरहितानि कार्याणि
ल्पमंत्रादिस्यान्नीत कौपीनकटिसूत्रयज्ञोपवीतमेखलादंडाजिनत्यागादिवास्त्वापछत्रधारणपादु-

राम

॥ म.र ॥
॥३२॥

काध्यारोहणमाल्याधारणदर्शनानुलेपनांजनजल्पक्रीडाघृतनृत्यगीतवाद्याद्यभिरतिपारवंडादिसंभा
षणपर्युषितभोजनादि ब्रह्मचारीव्रतलोपजसकलदोषपरिहारार्थं ब्रह्मचारीकृच्छ्रत्रयं चरेन्महाव्याहृतिहो
मं च कुर्यात ।तद्यथा। लौकिकाग्निं प्रतिष्ठाप्य ब्रह्मवरणाद्याज्यभागांतं कृत्वा प्रपद्य मंत्रवस्तसमस्ताभिर्व्याहृति
भिश्चतस्र आज्याहुतीर्हुत्वा ॥४॥ अग्नये च पृथिव्यै च महते च स्वाहा ॥५॥ वायवे चांतरिक्षाय च महते
स्वाहा ॥६॥ स्ववरादित्या चादिवे च स्वाहा ॥७॥ भूर्भुवः स्वश्चंद्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा ॥८॥
पाहि नो अग्न एनसे स्वाहा ॥९॥ पाहि नो अग्ने विश्ववेदसे स्वाहा ॥१०॥ यज्ञं पाहि विभावसो स्वाहा ॥११॥ स
र्वं पाहि शतक्रतो स्वाहा ॥१२॥ पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा। पुनर्नः पाहि अंहसः स्वाहा ॥१३॥ सह र
य्या निवर्तस्वाग्ने पिन्वस्व धारया। विश्वप्स्न्या विश्वतस्परि स्वाहा। पुनर्व्याहृतिभिर्हुत्वा स्विष्टकृदादिवरदाना
न्तं शेषं समापयेदिति॥ ॥एतदल्पधर्मलोपे प्रायश्चित्तं॥ बहुधर्मलोपे तु प्रायश्चित्तं विशेषो ऋग्विधाने शौ

।।३३।।
।।गद्र।।

नैकोऽग्नः ।। तं बोधिपात्रपेन्मंत्रं लक्षं चैव दशो वाल्पये ।। ब्रह्मचारि स्वधर्मं च न्यूनं चेत्पूर्णमेव तद्दिति । महानाम्न्यादिव्रतेषु
लुप्तेषु तारतम्येन त्रीन् षट् द्वादश वा कृच्छ्रान् कृत्वा पुनर्व्रतं प्रारभेते स्मृत्यर्थसारे ।। तथा संध्याग्निकार्यलोपे स्ना
त्वाऽष्टसहस्रं जप ।। निद्रालोपेऽष्टशतं । अभ्यासे द्विगुणं पुनः संस्कारश्च तु कं ।। ।। इति ब्रह्मचारिव्रतलोपप्राय
श्चित्तं ।। ।। अथ पुनरुपनयनं ।। ।। तत्र मनुः ।। अज्ञानात्प्राश्य विण्मूत्रं सुरासंसृष्टमेव च ।। पुनः संस्कारमर्ह
ति त्रयो वर्णा द्विजातयः ।। चंद्रिकायां बोधायनः ।। सिंधुसौवीरसौराष्ट्रान् तथा प्रत्यंतवासिनः ।। अंगवंगक
लिंगांश्च गत्वा संस्कारमर्हति ।। हेमाद्रौ पाद्मे प्रेतशय्याप्रतिग्रही पुनः संस्कारमर्हति । वृद्धमनुः ।। जीवन्नपि
समागच्छेद् घृतकुंभे निमज्य च ।। उद्धृत्य स्नापयित्वास्य जातकर्मादि कारयेत् ।। मिताक्षरायां पराशरः ।। यः प्रत्य
वसितो विप्रः प्रव्रज्यातो विनिर्गतः ।। अनाशकनिवृत्तश्च गार्हस्थ्यं च चिकीर्षति । स चरेत् त्रीणि कृच्छ्राणि त्रीणि चान्द्रा
यणानि च ।। जातकर्मादिभिः सर्वैः संस्कृतः शुद्धिमाप्नुयात् ।। शातातपः ।। लशुनं गृंजनं जग्ध्वा पलांडुं वतप
स्तुनं ।। उष्ट्रीमानुषकेभं चाश्वरासभ्योक्षीरभोजनात् । उपनयनं पुनः कुर्यात्तप्तकृच्छ्रं चरेन्मुदः ।। अपराकी
त

राम
।।श्यर।।
।।३३।।

दिसर्वगृह्येषु पित्रादिव्यतिरेकेण ब्रह्मचारिणः प्रेतकर्मकरणे पुनरुपनयनमित्युक्तं। त्रिस्थलीसेतौ। कर्मना
शाजलस्पर्शात्करतोयाविलंघनात्॥ गंडकीबाहुतरणात्पुनःसंस्कारमर्हति। पराशरः। अजिनं मेखलादंडभि
क्षाचर्याव्रतानि च। निवर्तंते द्विजातीनां पुनःसंस्कारकर्मणि। एकं वेदमधीत्यान्यं वेदमध्येतुमिच्छतितस्य
पुनरुपनयनमितिहरदत्तः॥ नेत्यन्ये। सर्वेभ्यो वै वेदेभ्यः सावित्र्यनूच्यतइत्यापस्तंबवचनात्। यमः। पुरा
कल्पेषु नारीणां मौंजीबंधनमिष्यते। अध्यापनं च वेदानां सावित्रीवाचनं तथा॥ इदं च युगांतरविषयं॥ ॥
इति पुनरुपनयनं॥ ॥त्रुटितानां मेखलादीनां प्रतिपत्तिमाह मनुः। मेखलामजिनं दंडमुपवीतं कमंडलुं
अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मंत्रवित्॥ अथ गर्गमते पदार्थक्रमः॥ ॥ श्राद्धं वपनं॥ ब्राह्मणभोज
नं॥ बटोरपि॥ अग्निस्थापनं। अलंकृतस्यानयनं॥ पश्चादग्नेरवस्थापनं॥ ततो ब्रह्मासनादि बर्हिस्तरणां
तं कर्म॥ ततो ब्रह्मचर्यमागामिति वाचनं॥ ब्रह्मचार्यसानीति च॥ वासःपरिधापयति। मेखलाबंधनं बटो
र्मंत्रपाठः। मंत्रेण यज्ञोपवीतपरिधानं॥ ततआचमनं॥ उत्तरीयधारणं मंत्रेण॥ दंडप्रतिग्रहः॥ दीक्षा

॥३४॥ ॥गा॰दा॰॥ १ न्धो स

वद्धा। अंजलिनांजलिपूरणं मंत्रैः। प्रैषपूर्वकं सूर्यावेक्षणं हृदयालंभनं। [illegible] दक्षिणहस्तग्रहणादि मंत्रैः परिदानांतं। ततो हस्तविसर्गः। ततः प्रदक्षिणं परिक्रम्योपवेशनं। तत आचार्यस्योपयमनादानादि पर्युक्षणांतं। आचार्यस्यान्वारब्धो माणवककर्तृकः॥ तत आघाराद्याश्चतुर्दशाहुतयः॥ संस्रवप्राशनादि दक्षिणादानांतं। ततो ब्रह्मचारीशासनं ब्रह्मचार्यसीत्यादि पूर्ववत्॥ ततो बर्हिर्होमादि ब्राह्मणभोजनांतं॥ अपस्सावित्रीव्रतादिनः॥ तत उपलेपनादि बर्हिस्तरणांतं॥ ततः कुमारं उत्थाप्य हस्तेनोदकं गृहीत्वाग्निमुखेनाग्ने व्रतपते व्रतं चरिष्यामि सावित्रं सद्यः कालं तच्छकेयं तन्मे राध्यतामिति व्रतग्रहणं करोति॥ ततो ब्रह्मचारिण उपवेशनं। ब्रह्मचारिण आचार्यस्यान्वारब्धः सर्वास्वाहुतिषु। तत उपयमनादानादि आज्यभागांतं। ततो वेदाहुतयः षोडश॥ प्रतिवेदं चतस्रश्चतस्रः॥ एवं षोडश। ततः प्रजापतये देवेभ्य इत्याद्याः सप्त॥ ततो महाव्याहृत्यादि स्विष्टकृदंता दश॥ आज्यभागाद्या एताः सप्तविंशत्याहुतयो व्रतानामादेशे विसर्गे चैता होतव्याः॥ ततः संस्रवप्राशनादि ब्रह्मणे दक्षिणादानांतं। तत अस्मै सावित्रीमन्वाहेत्यादि यथोक्तसावित्रीप्रदानं॥ ततो माणवक

राम

॥ग्र र॥ ॥३४॥

स्य तत्सवितुरस्तु नेन मंत्रेण संध्योपासनं ॥ संध्योपासनं ॥ तेत तत्सवितुरित्यनेनैवाग्निपरिचरणं ॥ तदंते गोत्र
नामग्रहणपूर्वकं सर्वेषामभिवादनं ॥ ततो भिक्षाचर्याचरणं ॥ भिक्षानिवेदनं भिक्षां भो इति त्येवं ॥ आचार्य स्वामि
द्भां भो इति त्येवं भिक्षां स्वीकुर्यात् ॥ ततो ब्रह्मचारी अस्तु चिर्भ्रूत्वा स्वासने उपविशति ॥ ततो बर्हिर्होमादि ब्राह्मणभोजनांते
अथानंतरं सावित्रव्रतवत्संध्योपासनाग्निपरिचरणानुष्ठानं ॥ तत उपलेपनादि बर्हिस्तरणांतं ॥ तत उत्था
पहस्तेनोदकं गृहीत्वाग्निमभिमुखो अग्ने व्रतपते व्रतमचारिषं सावित्रसघ फल्लं तदशकं तन्मे राधीति
मंत्रेण सावित्रव्रतोत्सर्गं करोति ॥ तत उपयमनकुशादानादि ब्राह्मणभोजनांतं पूर्ववत् ॥ सावित्रव्रतादेशो
ब्राह्मणदक्षिणादानांते सावित्र्यासंध्यावंदनादि अग्निपरिचरणं च यदनुष्ठितं व्रतोत्सर्गे तदन्नावः ॥ ततोऽग्रे
तरिति दंडस्याप्सु प्रक्षेपः ॥ वासो वाव इति मेखलाया अप्सु प्रक्षेपः ॥ वा तदरं हानवेति यज्ञोपवीतस्याप्सु प्रास
नं ॥ नमो वरुणाये ति कुमारस्य दधि घृत शर्कराणां प्रत्येकं प्राशनं ॥ ॥ इति सावित्रीव्रतोत्सर्गः ॥ ॥ अथा
ग्नेय व्रतं ॥ ॥ तत्रोपलेपनादि बर्हिस्तरणांतं ॥ ततो ब्रह्मचारिणो मेखलाबंधनं ॥ यज्ञोपवीतधारणं
दंडधारणांते अन्वारंभः ततः आघारावाज्यभागौ ॥ वेदाहुतयः षोडशः ॥ प्रजापतये स्वाहाः सप्त ॥ महाव्याहृत्यादि
स्विष्टकृदंताः दश ॥ एवं सप्तत्रिंशदाहुतयः ॥ ततः प्राशनादि

॥३५॥
॥गद॥

॥६५ समर्पणं ग्रहणं च मेखलादिषु पूर्वोक्ता एव मंत्राः॥ ततो व्रतग्रहणं पूर्ववत्॥ अग्ने व्रतपते० इत्याग्नेयं सांव
त्सरितस्य० ध्यातामिति॥ आग्नेयं पाकान्तस्यैकं० ध्यातामिति। इदानीं प्रयोगं कुर्वीत॥ ततः स्वस्थाने उपवे
शनं। आचार्यान्वारंभः॥ ततो उपयमनादानादि पर्युक्षणांतं। आघारावाघारौ स्विष्टकृदंताः सप्तत्रिंशदाहुतयो
ऽग्नि पिहितव्याः॥ ततः प्राशनादि ब्राह्मणभोजनांतं॥ ततः स्वस्त्ययनं माध्याह्निकं संध्योपासनं॥ ततोऽग्नेः
पश्चादुपविश्य॥ पाणिनाग्निं परिसमूहतीत्यादि आयुष्यकरणांतं यथोक्तं॥ तत्र विशेषः। गोत्रालंभनेकवी
मते ध्याहारः॥ अंगानि च मआप्यायंतामिति गर्गपद्धतौ। आयुष्यकरणांते त्रिवोनामेति जपः॥ यदि बहुमे
धाकामः स्यात्तदा सदसस्पतिमित्यनेन मेधां याचेत॥ श्रीकामश्चेदिमं मे इति श्रियं याचेत॥ ततो मेख
लाबंधनं प्रवरान् प्रदक्षिणोपचारेण स्पृष्ट्वा अमुकसगोत्रोऽमुकशर्माहं भो वैश्वानर अभिवादयामि। ए
वं वरणाचार्यदक्षानामभिवादनं। ततो भिक्षाचर्यचरणं। गुरवे निवेदनं॥ अनुज्ञातो भिक्षां स्वीकृत्य मा
तृहस्ते समर्पयामीति॥ ततो बर्हिर्होमादि ब्राह्मणभोजनांतं॥ ॥ इत्युपनयनपद्धतिः॥ ॥ ततः

राम

॥घर॥
॥३५॥

संध्याकाले श्रौताग्निप्रक्षेपांते सूर्योपस्थानं वारुणीभिः कृत्वाभिरिमं मे वरुण इत्यादिभिः ।।। मित्रः सत्यं सह इत्यादिभिः
प्रातः ।। उदुत्यमित्यादिभिर्मध्याह्ने ।। ततो दंडं गृहीत्वाग्निपरिचरणं ।। मध्याह्ने सायाह्ने च संध्योपासनांते प्रति
दिनमग्निपरिचरणं ।। एको प्रातःकालेष्वग्निपरिचरणमिच्छंति ।। अग्निपरिचरणांते वा विसर्गः ।। पूर्वोक्तान्ये
व ब्रह्मचारिधर्मा ज्ञेयाः ।।। संध्योपासनादीनि स्वस्वकाले कर्तव्यानि तेषां कालातिक्रमे कर्मणां लोपे प्रायश्चित्त
मुच्यते ।। परिसमूहनादिभिः संस्कारान् कृत्वान्वग्निरिति मंत्रेणाग्नेराहरणं ।। पश्चादिवीति स्थापनं ।। तां सं स
वितुर्वत्स वितुर्विश्वानि देव इत्यादिभिः सावित्रमंत्रैस्त्रिभिः प्रज्वालनं । नातब्रह्मोपवेशनादि । पूर्णाहुति वृद्धान्त सं
स्रावस्थानादि च कार्यं ।। अथाग्नेयव्रतस्थितो ब्रह्मचारी समिधाग्निं दुवस्यतेत्येवमादि आग्नेयवेदविभागं संवत्सरप
र्यंतं पठित्वा व्रतमुत्सृजति ।। ततः संवत्सरे पूर्णे आग्नेयव्रतविसर्गः ।।। तत्र परिसमूहनादि ब्राह्मणभोजनांतं तत्राग्ने
व्रतादिवद्भवति ।। एतावान् विशेषः ।। यस्मिन्काले आग्नेयव्रतग्रहणं कृतं तस्मिन्काले संध्यावंदनं ।। अग्निपरिचा
रणं च । आग्नेयव्रतविसर्गः ।।। आग्नेयव्रतमचारिषं सांवत्सरिकं तन्मे राधीति मंत्रेण ।। ततो व्रतानंतरमामग्निज्ञावत्रिः

॥दंडादीनामप्सुप्रक्षेपः॥ व्रतादेशग्रहणं तेषां॥ ॥इति आग्नेयव्रतविसर्गः॥ अथ शुक्रियव्रतादेशः॥ ॥ततउपलेपनादि
बर्हिस्तरणांतं कृत्वा मेखलायज्ञोपवीतदंडानां धारणपूर्वकं व्रतग्रहणं॥ अत्रैव मि शुक्रियं सांवत्सरिकं तच्छ केय
मितिविशेषः॥ ततउपयमनाद्यन्नादिब्राह्मणभोजनांतमाग्नेयव्रतादेशवत्॥ शुक्रियव्रते स्थितो रूक्षं वाचं मिता
दि शुक्रियवेदविभागं पठति संवत्सरं यावत्॥ उत्तमेहनि अपराह्णकाले तेनिशामुखेन त्रिगुणेन पाठेन एकस्यां दिशि
वस्त्रेण नाभिमात्रं यावन्नाप्य वकस्य प्रच्छादनं॥ मूर्ध्नि नमारन्यग्रोधैः शिरसा उपरिकरणं। ततः सावित्र्या वेदशि
रसा हिरण्मयेन पात्रेणेति मंत्रेणावगुंठनी॥ एवं प्रच्छादितो ब्रह्मचारी सूर्योदयं यावत्तिष्ठति। रात्रौ ग्रामे वा गोष्ठे वा दे
वतायतने वा धःशयानः॥ रात्रौ गृहे यदि स्थितिस्तदा सूर्योदयात्पूर्वं रात्रौ ग्रामाद्बहिर्गमनं। ततो वेगुंठनीविसर्गः॥ ततोह
स्त्रमस्य उद्गुत्यं चित्रं देवानामित्यादीनामुदितेर्कजपः॥ ततो व्रतस्थाने माणवकमानीय शुक्रियसांवत्सरिकस्यावि
सर्गः॥ तत्र परिसमूहनादिस्तरणांतं॥ ततः प्राकृतसंध्योपासनं॥ अग्निस्वीकरणं। ततोग्ने व्रतं॰ मचारिषं शुक्रि
यसांवत्सरिकं तद॰ धीतिमंत्रेणोत्सर्गः॥ ततउपयमनाद्यन्नादिब्राह्मणभोजनांतं॥ ततस्ताम्रपात्रे उदक ॥॥॥॥

राम

प्रक्षेपः। द्यौः शांतिरिति शांतिकरणं। शांति पात्रं अवगुंठनीय वस्त्रं च गुरवे दद्यात्॥ ततो ऽनंतरम् तमित्यादि
भिः पूर्ववत्समस्तं दंडमेखलाजिनोपवीतानाम् अप्सु प्रक्षेपः॥ दधि घृत चार्क राणां नमो वरुणायेति प्रतिम
त्रं प्राशनं। ततो वपनं। व्रतग्रहणस्यादौ सर्वं शुक्रियादिषु मेखलायज्ञोपवीतदंडानां धारणं॥ ॥अथौपनि
षद्व्रतं॥ ॥उपलेपनादि बर्हिस्तरणांतं॥ ततो ऽग्नेर्वृत्ति० औपनिषदं तच्छके० राध्यतामिति व्रतग्रहणं॥ तत
उपयमनादि ब्राह्मणभोजनांतं। औपनिषदे व्रते स्थितो ह्यपाह प्राजापत्यादित्यादौपनिषदवेदविभागं सं
वत्सरं यावत् पठति॥ ततः उत्तमे हनि निशामुखे अ... वगुंठनीवस्त्रेणाच्छादनादि अदिते ऽन्वमंस्था
स्था उदुत्तमं। चित्रं देवानामिति जपांतं शुक्रियवत्॥ ततो व्रतस्थाने माणवकमानीय व्रतविसर्गः॥ तत्र परि
समूहनादि बर्हिस्तरणांतं कृत्वा पूर्ववत् संध्योपासनम् अग्निपरिचरणं च॥ ततो ऽग्ने व्रतपते चारिषमौपनि
षदं सांवत्सरिकं तद० तन्मे राधीति व्रतविसर्गः॥ तत उपयमनादि नान्दी ब्राह्मणभोजनांतं। ताम्र उदक
प्रक्षेपः। द्यौः शांतिरिति शांतिकरणं॥ भोजनवस्त्रयोराचार्याय दानं॥ दंडादीनाम् अप्सु प्रासनं॥ दध्या

॥३७॥
॥गोद॥

दानं प्राशनं ॥ ॥ इति औपनिषद्व्रतं ॥ ॥ अथ शौल्कनव्रतादेशः ॥ ॥ तत्र परिसमूहनादि ब्राह्मण
भोजनांतं । औपनिषद्व्रतादेशवत् । व्रतग्रहणे शौल्कनं सांवत्सरिकमिति प्रयोगः । शौल्कस्त्रिनीनां कश्चाप
ठो व्रते स्थितस्य । अध्योत्तमे हनि निशामुखे पठनप्रच्छादनाद्युदितं जपांतं पूर्ववत् । ततो व्रतस्थाने माणवकमा
नीय व्रतविसर्गः । तत्रैवं परिसमूहनादि बर्हिस्तरणांतं । ततः संध्योपासनादि । ततो व्रतविसर्गः । अग्ने रि
षं शौल्कनं सांवत्सरिकं तदधीति मंत्रः । तत उपयमनादानादि ब्राह्मणभोजनांतं । तत उकं पात्रे कृत्वा
द्यौः शांतिरिति शांतिकरणं ॥ पात्रवस्त्रयोर्गुरवे दानं ॥ दंडादीनामप्सु प्रक्षेपः ॥ दधिमधुशर्कराणां नमो व
रुणायेति प्रत्यवं प्राशनं । ततो वपनं ॥ ॥ इति शौल्कनं ॥ ॥ अथ गोदानव्रतादेशः ॥ ॥ तत्र परिसमूहना
दि ब्राह्मणभोजनांतं ॥ व्रतग्रहणस्थाने मेखलायज्ञोपवीतदंडानां धारणं । गोदानं सांवत्सरिकमिति मं
त्रे विशेषः ॥ अस्मिन् व्रते अवगुंठनादीनामभावः । त्रिषवगुंठनाएँ भैक्षपादविहितस्नातं । ततः संव
त्सरे पूर्णे गोदानव्रतविसर्गः । तत्र परिसमूहनादि बर्हिस्तरणांतं । ततः संध्योपासनादि ॥ अग्ने० रि

राम

॥ग्र॥
॥३७॥

स्मृतौ॥ उपनीयगुरुः शिष्यं महाव्याहृतिपूर्वकं॥ वेदमध्यापयेदेवं शौचाचारांश्च शिक्षयेत्॥५

षन्नां गोदाने सांवत्सरिकं तल्वद्धीतिमंत्रेणोत्सर्गः॥ उपयमनादानादिव्रात्यरणभोजनांतं पूर्ववत्॥ अस्मिन्व्रतवि
सर्गे दंडमेखलाजिनयज्ञोपवीतानाम् अप्सु प्रक्षेपः प्राप्नोति॥ आचार्याय गोमिथुनदानं॥ समाप्तानि व्रतानि॥ ॥इति
गर्गमते उपनयनपदार्थक्रमो व्रतानि च॥ इमानि च व्रतानि प्राक्षेपस्तत्र पठितानि कर्कमतानुसारिभिरप
नुष्ठेयानि स्मृत्यंतरे केषांचित् चत्वारि शात्संस्कारेषु पाठात्॥ ॥इति वामनात्मजदीक्षितगदाधरकृते उप
नयने पदार्थक्रमः॥ ॥ अथ वेदारंभे पदार्थक्रमः॥ तत्रैकारिकायां॥ अथ प्रस्तुते हरौ सः स्यात्त्रानध्यायेष्व
न्येहनि। नास्तं गते जीव सिते बाल्ये वृद्धे मलिम्लुते। षष्ठी रिक्तां त्यजानिं सोमं भौमं हित्वोत्तरे शुभ॥ मृगादि पं
चधिष्ण्येषु मूलाश्विन्योः करत्रये। किंद्रगेः श्रुत्यैः॥ तत्र मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं॥ देशकालौ स्मृ
त्वा यजुर्वेदव्रतादेशं करिष्य इति संकल्प्य॥ ततः पंचसंस्कारपूर्वकं लौकिकाग्निस्थापनं॥ ब्रह्मोपवेशना
नाघारांताज्यभागांते। ततः स्थालीपाकेनैव जुहोति॥ अंतरिक्षाय स्वाहा १ वायवे स्वाहा २ ब्रह्मणे स्वाहा ३ छंदोभ्यः
स्वाहा ४ प्रजापतये स्वाहा ५ देवेभ्यः स्वाहा ६ ऋषिभ्यः स्वाहा ७ श्रद्धायै स्वाहा ८ मेधायै स्वाहा ९ सदस

स्पतिमनुमतिञ्चयुञ्जाय॥ १०

स्पातये स्वाहा १० अनुमतये स्वाहा ११ ततो व्याराधाः स्विष्टकृदंताः॥ ततः प्राशनादि दक्षिणादानांतं॥ ततो विघ्नेशं
सरस्वतीं हरिं लक्ष्मीं स्वस्ति विघ्नांश्च भजयेत्॥ यदि ऋग्वेदारंभस्तदाज्यभागांते॥ पृथिव्यै स्वाहा॥ अग्नये स्वाहेति
च हुत्वा ब्रह्मणे स्वाहेत्यादि समानं॥ यदि सामवेदारंभस्तदाज्यभागांते दिवे स्वाहा॥ सूर्याय स्वाहेति हुत्वा ब्र
ह्मणे स्वाहेत्यादि पूर्ववत्॥ यद्यथर्ववेदारंभस्तदाज्यभागांते॥ दिग्भ्यः स्वाहा॥ चंद्रमसे स्वाहेति हुत्वा ब्रह्म
णे स्वाहेत्यादि यथा लोके॥ यद्येकदा सर्ववेदारंभस्तदैव॥ आज्यभागांते वेदारंभक्रमेण प्रतिवेदाहुतिद्वयं हुत्वा ब्र
ह्मणे छंदोभ्य इत्याहुतिद्वयं हुत्वा प्रजापतय इत्याद्याः सप्त तंत्रेण जुहुयात्॥ ततो व्याहृत्यादि समानं॥ कारि
कायां॥ तत्र प्रत्यङ्मुखायोपविष्टाय पाननमीक्षते॥ वेदारंभमनुब्रूयाद्यथाशास्त्रमतंद्रितः॥ मनुः॥ ब्रह्मारंभेऽव
साने च पादौ ग्राह्यौ गुरोः सदा॥ व्यस्तहस्तेन कार्यमुपसंग्रहणं गुरोः॥ सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन
तु दक्षिणः॥ ब्राह्मणः प्रणवं कुर्यादादावंते च सर्वदा॥ प्रांजलिः पर्युपासीत पवित्रैश्चैव पावितः॥ प्राणाया
मैस्त्रिभिः पूतस्तत ॐकारमर्हति॥ ॐकारं व्याहृतीस्तिस्रः सपूर्वां त्रिपदां ततः॥ ओंकारं प्रवदेतमन्त्र

राम

भूपरा
त्रि॥

हं गौतमोब्रवीत ॥ त्रिपदा गायत्री ॥ मनुः ॥ अध्येष्यमाणस्तु गुरुर्नित्यंमतंद्रितः ॥ अधीष्व भो इति ब्रूयाद्विरामो
स्त्विति चारमेत् ॥ दक्षः ॥ द्वितीये तु तथा भागे वेदाभ्यासो विधीयते ॥ वेदस्वीकरणं पूर्वं विचारोभ्यसनं जपः ॥ तद्दा
नं चैव शिष्येभ्यो वेदाभ्यासो हि पंचधा ॥ याज्ञवल्क्यः ॥ हस्तौ सुसंयतौ धार्यौ जानुभ्यामुपरि संस्थितौ ॥ तथा ॥ हस्त
हीनं तु योधीते स्वरवर्णविवर्जितं ॥ ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति ॥ पराशरः ॥ ज्ञातव्यः सर्व
वेदार्थो वेदार्थः कर्मसिद्धये ॥ पाठमात्रमधीतश्च गौरिव पंके वसीदति ॥ व्यासः ॥ वेदस्याध्ययनं सर्वं धर्मशा
स्त्रस्य चैव हि ॥ अजानतोर्थं तत्सर्वं तुषाणां कंडनं यथा ॥ मनुः ॥ योनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमं ॥ स जी
वन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥ यमः ॥ पद्मां पृथिवीं सर्वां सर्वरत्नोपशोभितां ॥ दद्याच्छास्त्रं तु शिष्येभ्य
स्तु चैतेब्दवपं समं ॥ न निंदां ताडने कुर्यात्पुत्रं शिष्यं च ताडयेत् ॥ अधोभागे शरीरस्य नोत्तमांगे न वक्ष
सि ॥ अतोन्यथा हि प्रहरन्नन्यायप्रोक्तो भवेन्नरः ॥ न्यायप्रोक्तो दंडप्रोक्त इत्यपि ॥ अत्र माणवकं कुलपरं
परागतं वेदमध्यापयेत् ॥ तस्यैवाध्येतव्यमिति यमात् ॥ वसिष्ठः ॥ पारंपार्यागतो येषां वेदः सपरिबृंहणः ॥

॥३९॥
॥पारस्क

तच्छाखं वै कर्म कुर्वीत तच्छाखाध्यपतेतथा॥ अधीत्य शाखामात्मीयामन्यशाखां ततः पठेत्। यः स्वशाखां शाखां परि
त्यज्य अन्यशाखामुपासते॥ शाखारंडः स विज्ञेयः सर्वकर्मबहिष्कृत इति॥ ॥इति वेदारंभः॥ ॥वेदं स
माप्य स्नायात्॥ स्नानशब्देन समावर्त्तनसंस्कार उच्यते। वेदं मंत्रब्राह्मणात्मकं समाप्य समग्रं पाठतो
र्थतश्चांतं नीत्वा स्नायात्॥ वक्ष्यमाणविधिना स्नानं कुर्यात्॥ ॥ब्रह्मचर्यं वाष्टाचत्वारिंशकं॥
॥ अथवा ब्रह्मचर्यव्रतं अष्टाचत्वारिंशकं अष्टचत्वारिंशाब्दं निर्वर्त्य समाप्य अवसाने प्राप्य गुरुणा
नुज्ञातः स्नायादिति संबंधः॥ मीमांसकास्तु अष्टाचत्वारिंशकं व्रतं समाप्य अवसाने प्राप्य गुरुणानुज्ञा
तः कुर्यादिति पक्षं नांगीकुर्वंति। जातपुत्रः कृष्णकेशोऽग्नीनादधीतेत्याधानस्मृतिविरोधात्। न च विक
ल्पः॥ अतु[illegible]त्वात्॥ प्रत्यक्षमेकं स्मृतिवचनं॥ कल्प्यमपरं। कल्प्यप्रत्यक्षयोः प्रत्यक्षं बलवदिति न्यायात्
[illegible]॥ ॥द्वादशकेप्येके॥ ॥द्वादशवार्षिके व्रते समाप्तेप्येके स्नानमिच्छंति। अन्ये तु वेदव्रतसमा
प्त्युत्तरकालं स्नानमिच्छंति॥ ॥गुरुणानुज्ञातः॥ ॥स्नायादिति शेषः। गुर्वनुज्ञा च समावर्त्तनक

ल्प

राम

॥घर॥
॥३९॥

र्मांगं न तु स्नानकालांतरमेतत्। वेदं समाप्य स्नायादित्युक्तं। तत्र वेदशब्देन किमुच्यत इत्यत आह॥ ॥विधिवि
धेयस्तर्कश्च वेदः॥ ॥विधीयत इति विधिः। दर्शपूर्णमासाभ्यां यजेत। अग्निहोत्रं जुहुयादिति विधायकं ब्राह्म
णवाक्यं। विधीयते विनियुज्यते ब्राह्मणवाक्येन कर्ममार्गे येनेति विधेयो मंत्रः। इषे त्वादि। तर्कशब्देनार्थवादोऽभिधी
यते। तर्क्यतेऽनेन संदिग्धोऽर्थः। यथा अक्ताः शर्करा उपदधाति। तेजो वै घृतमिति। अत्र अंजनं तैलवसादिनापि
संभवति। तत्र तेजो वै घृतमिति घृतसंस्तावात् तर्क्यते घृताक्ता इति। तेन विध्यर्थवादमंत्रा वेदशब्देनाभि
धीयंत इत्युक्तं। तर्कः कल्पसूत्रमिति चंद्रतपनः। तर्को मीमांसेति कल्पतरुः। वचनाद्ब्राह्मणाभिधेयानां संग्रह इ
ति हरिहरः॥ ॥षडंगमेके॥ ॥शिक्षा कल्पो व्याकरणं निरुक्तं छंदो ज्योतिषमिति षड्भिरंगैरुपेतमेके
आचार्या वेदमिच्छंति। तमधीत्य स्नायादित्यन्वयः। स्नानं च द्वितीयाश्रमप्रतिपत्तिः। तदनुष्ठानयोग्य
ता च षडंगे वेदेऽधिगते भवति। अत एवोच्यते॥ ॥न कल्पमात्रे॥ ॥कल्पशब्देन ग्रंथमात्रमभिधी
यते। कल्पमात्रे ग्रंथमात्रे। मंत्रे एव वा ब्राह्मणे एव वा अधीते न स्नानमिच्छंति। नहि ग्रंथमात्राध्ययनेन

॥४०॥
॥गदा॥

कर्मानुष्ठानयोग्यता भवति॥ तस्मादर्थतो ग्रंथतश्चाधिगमस्स्नानमिति। कामं तु याज्ञिकस्य॥ ॥यज्ञं वेदेति या
ज्ञिकः॥ तु शब्देन ग्रंथमात्राधीतस्याप्यर्थवादियज्ञविधाकुशलस्य षडंगमर्थतो नधिगम्यापि कामं इच्छ
यास्नानं भवति। तेनायमर्थः। मंत्रब्राह्मणात्मकं वेदमधीत्यावबुध्य च स्नायादित्येकः पक्षः। सांगं वेदमधीत्
त्यावबुध्य च स्नायादिति द्वितीयः पक्षः॥ ग्रंथमात्रमधीत्य यज्ञविधां चाभ्यस्य स्नायादिति तृतीयः पक्षः॥ स्नाया
दित्युक्तं तत्र केषु स्नायादित्यपेक्षायामाह॥ ॥उपसंगृह्य गुरुं समिधोऽभ्याधाय परिश्रितस्योत्तरतः कुशे
षु प्रागग्रेषु पुरस्तात्स्थित्वाष्टानामुदकुंभानां ये स्वंतरग्नयः प्रविष्टा गोह्य उपगोह्यो मयूखो मनोहा स्खलो
विरुजस्तनूदूषुरिंद्रियहातान्विजहामि यो रोचनस्तमिह गृह्णामीत्येकस्मादपो गृहीत्वा तेनाभिषिंचते ते
न मामभिषिंचामि श्रियै यशसे ब्रह्मणे ब्रह्मवर्चसायेति॥ ॥उपसंगृह्य गुरुं गुरोः पादोपग्रहणं कृत्वा समि
धोऽभ्याधाय अग्निपरिचरणं कृत्वा इतश्च पूर्वं वेदाहुतिहोमः॥ एतदेव व्रतादेशनविसर्गेष्विष्टं कृत्वात
न तु समिदाधानस्य पश्चाद्वेदाहुतयः कृतो न भवंति॥ कर्मांतरानभिधानात्॥ उपसंगृह्य गुरुं समिधो

राम

॥धर॥
॥४०॥

न्याधायेति पाठानुग्रहेण पपत्ते स्थामेवं ॥ यतो देवाहुतीनां यस्मा देवसमिदाधानं ॥ ततश्च स्थानमिति श्रयतीं सया
मुपपत्समिधमादधाति धाति साप्रापणी पापाएं स्नासंपत्सोदयनीयेति ॥ तस्मात्समिदाधानस्थानयोरव्यवहि
तकालस्त्वोपपादनाद्देवाहुतीनां वस्मानां गत्वातिदेवाश्च समिदाधानं सर्वं वेदाहुतिहोमइत्युक्तं ॥ स्थानेचा
प्यग्निकुंदकुंचैः क्रमेण ॥ परिश्रितस्य वस्त्रादिना वेष्टितस्य मावजेन स्थानस्थितस्याग्नेरुत्तरपार्श्वे स्थापिता
नामष्टानामुदकुंभानां दक्षिणे तत्रायतानां पुरस्तात्पूर्वस्यां दिशि ग्रासीऐंधुक ब्रह्मचारी स्थित्वा पे
स्वेत रगनपद्धतिमंत्रेण प्रपमाउदकुंभाद पोगहीत्वाते नमामभिषिंचामीति मंत्रेणात्मानमभिषिंचति ॥
मंत्रार्थः ॥ येष्वग्न्यपोगोपाद्यपोऽस्वंतर्मध्ये प्रविष्टाः स्थिताः इंद्रियहाः तानष्टौ त्रमेघ्यत्वाद्मंगलत्वादे
तां भ्योऽन्य सकाशात् ग्रम्नान् विजहामि ॥ यत्कं रोमि यस्य रोचनो ग्निर्मेघ्यत्वा मंगलत्वात्स्त्रीतिकारित्वा
च्चेतमिहत्रशु विषयेगृहामि स्वीकरोमि ॥ यतः ग्रग्न्योग्निरुत्पद्यते गृह्यते संभ्रियते इति गोह्यः श्र्नगतापकः
मगुषोडोंतु हिंसकः ॥ मनसउत्साहं हंतीति मनोहा ॥ संवलः प्रध्वंसी अन्नीणीकृत ॥ विविधतयारुज

समाभिर २

आघ्नायते २ अस्वलः १ उपगोह्यः २

॥४१॥
॥नाद॥

ति पीडयतीति विरजः॥ तनूं शरीरं दूषयतीति तनूदूषुः। इंद्रियाणि हंतीति इंद्रियहा॥ अभिषेकमंत्रार्थः॥ तेनो
दकेन मां इममात्मानं मभिषिंचामि। किंभूतेनाग्निये संपत्स्यै। यशसे कीर्त्यै ब्रह्मणे ब्रह्मवर्चसाय॥ यागा
द्यापन्नोत्सृष्टेजसे॥ ॥येनाग्निपमकृणुतां येनावमग्रातः सुरां येनाक्षावभ्यषिंचतां यद्वां तदश्विना
यशा इत्यापो हि ष्ठेति च प्रत्यृचं त्रिभिस्तदाशीमितरैः॥ ॥अग्नी ह्युदकुंभेभ्यो पां ग्रहणे एकैकं मंत्रो येश्चं
तरग्नवद्द इति॥ अभिषिंचेत्तूष्णीं येते॥ तथा॥ येनाग्निपमिति द्वितीयं॥ आपो हि ष्ठेति तृतीयं॥ योवः शि
वतम इति चतुर्थं॥ तस्मा अरमिति पंचमं। ततस्तूष्णीं त्रिभिरितरैरुदकुंभैरभिषेकः॥ मंत्रार्थः॥ हे अ
श्विनौ येन जलप्रभावेण नवंतौ सुराणां श्रियं संपदं व्रीत्वा वा अकृणुतां कृतवंतौ॥ येन च सुरापाणमत्तं
अवमग्रातां प्राप्तवंतौ वीप्तुवर्याय देवेभ्यस्तेपश्चात्तदेतज्जलाभिषेके एममाप्यस्त्विति त्रोष॥ ॥उदु
त्तममिति मेखलामुन्मुच्य दंडं निधाय वासोन्यत्परिधायादित्यमुपतिष्ठते उद्यन्भ्राजभृष्णुरिंद्रो मरु
द्भिरस्थात्प्रातर्यावभिरस्थाद्दशसनिरसि दशसनिं माकुर्वाविदन्मागमय उद्यन्भ्राजभृष्णुरिंद्रो मरुद्भि

राम

॥पूर॥
॥४१॥

अटोदर्शनं छांदसं येन बलेनाक्षोउपमन्योरक्षीषी अभ्यषिंचतां। अभिषिक्तवंतौ॥ ३

रस्थाद्दिवाय्यावन्निरस्थाछ्वतेसनिरसिव्रातेसनिंमाकुर्वीविदन्मागमयोघन्मोजन्मछुरिंद्रोमरुद्भिरस्था
त्सायंयावन्निरस्थात्सहस्रसनिरसिसहस्रसनिंमाकुर्वीविदन्मागमयेति॥ ॥ततउदुत्तमसमितिमंत्रेण
मेखलांरशनांउन्मुच्यऊर्ध्वंशिरोमार्गेणनिःसार्यतांवन्नमौनिक्ष्णवासोन्तारिद्यापवस्त्रांतरंपरि
हितंकृत्वाउघन्मोजन्मछुरितिमंत्रेणसर्पमुपतिष्ठते।मेखलानिधानोत्तरंदंडाजिनयोर्निधानं
तस्मीमितिजयरामकारिकाकारो॥मंत्रार्थः॥हेसूर्यपतोजनवानूप्रातःसवनेयावन्निर्गमनशीलैः
कृष्णादिसप्तकगणैःसवितास्थितिष्ठति।यथेंद्रोमरुद्भिरस्थात्तिष्ठतितद्वत्।किंभूतः।उघन्नउरुघ्चतंत्र
जन्मछुःस्वप्रजनपान्यतेजोज्ञासक॥ग्नाविदन्नसंर्वस्मृत्रान्मृनंजानन्॥किंच॥यथात्वंप्रातःसवनेदत्रासनि
दत्रासंख्यातानांगवादीनांसनिर्दाता।सत्यतनो।ग्नेतामामपिदत्रासनिंदत्रायणदक्षिणादिदातारंकुरु
मामांविदन्॥वेदयन्जयपयन्।गमयप्राप्यप्रतिष्ठामितिशेषः॥एवमुत्तरत्रापिव्याख्येयं॥ ॥दधि
तिलान्नाप्ना त्पजन्नलोमनखानिसंहत्योदुंबरेणदंतान्धावयेदन्मौधापवभूहध्वांसोमोराज

साधन ॥ …नमलमपसार्य। पुनः स्नात्वा मलापकर्षणस्नानोत्तरं पुनः स्नानं कृत्वा अनुलेपनं च दानादिना
नकयोर्मु खस्य चउपगृह्णीते ॥७

॥४६पा॥ प्रमागमत। समे मुखं प्रमार्ष्टीति पश्चात् आचमनेन चेति॥ ॥ततो दधितिलयोरन्यतरं प्राश्य पिबात् …ले
॥नादे॥ नानि च नखानि च॥ जटा लोम नखानि संहृत्य अपनीय वापयित्वा॥ संहृत्य सूत्रणि … ल्प … दसः॥ स्व
पसंहृत्य मन्त्रकल्पत्वात्॥ औदुम्बरेण दन्तान्धावयेत् औदुम्बरेण काष्ठेन दन्तान् शोधयेत्। अन्नाद्याय पेति मन्त्रे
ण॥ हि दन्ताः रूपं अन्नाद्याय अन्नाद्य नाय व्यूहध्वं। निर्मलाः भवत॥ यतो य राजा सोमः … काष्ठ प
नाम् ण गमत॥ आगतः। अतः स एव सोमो मम मुखं प्रमार्क्ष्यते। शोधयिष्यति॥ केन प्रकारेण यशसा कीर्त्या भगेन च
… धावनस्य नित्यत्वात् … फलसंबध इति मुरारिः॥ ॥उत्साद्य पुनः स्नात्वा अनुलेपनं
नासिकयोर्मुखस्य चोपगृह्णीते प्राणापानौ मे तर्पय चक्षुर्मे तर्पय श्रोत्रं मे तर्पयेति॥ ४ अत्र दक्षे प्राणापानौ राम
मे इति मन्त्रेण॥ मुख नासिके … अनुलिम्पतीति हरिहरः॥ पाणिपादप्रक्षालनं निषिञ्चेदिति वदता माणत्वाद
नुपाणिभ्यामनुलेपनग्रहणं। मन्त्रार्थः तर्पयामि वदन् … इन्द्रियं॥ तर्पयो मे श्रोत्रं … पञ्चतर्पय॥ पितरः शु
न्धध्वमिति पाणिपादप्रक्षालनेन … निषिच्य अनुलिम्पन् … ग्रहण … मुखेन ॥पार॥ ॥४२॥
हे उपलेपनादि दवते। ते मम प्राणापानौ वा … तर्पय प्रीणय ५

मुखेन सुवर्चाः सुतेजाः॥ अयं समितिपर्वं वत्सं बंधः। तथा वर्णाभ्यां स्तुत। सुश्रवणो ऽस्यासः।

स्व स्वल्कार्णाच्चां ऽप्यास मितिति॥ ॥ प्राचीनावीती दक्षिणामुखो ऽन्वालापितरः शुंधध्वमिति सेतावता मंत्रेण
पाणी अवनेजनं हस्तयोः प्रक्षालनोदकं दक्षिणा निषिच्य दक्षिणसंपादिक्षिनिषिच्य प्रदक्षिणमुपवीती अ
लापितृकर्म वाउदकं स्पृष्ट्वा वेदनेनात्मानमनुलिप्य सुचक्षा अहमिति मंत्रं जपेत्॥ अत्र दक्षिणावदं
लुप्तसमस्तं॥ मंत्रार्थः॥ हे सवितः अहं मही चक्षांने त्राचक्षाकलास्सुचक्षाः सुदर्शनो ऽन्यासं॥ ॥ अह
तं वासो धौतं वासो मंत्रेणाच्छादयीत परिधास्यै पत्रो धास्यै दीर्घायुत्वाय जरदष्टिरस्मि॥ सतेचन्नावामि
शरदः पुरूचीरायस्पोषमभिसंव्ययिष्य इति॥ ॥ अहतेन वीनं सदशं वासः वसनं अथवा अमो
त्रेण अवनेजकेण धौतं वासः आच्छादयीत परिदधीत परिधास्या इति मंत्रेण॥ मंत्रार्थः॥ हे वासो देवते॥
परिधास्यै अनेकमनपरिधानायेतपापत्रो धास्यै स्नते॥ दीर्घायुत्वाय निर्जरपजीवनाय च अहं वासः
संव्ययिष्यापरिधास्या किंभूतं वासः॥ देवतानुग्रहेण जरदष्टिरस्मि॥ वृद्धत्वे वाप्याप्नुवामि॥ पुरूचीः
पुंभिः बहुभिः पुत्रधनादिभिः असंपोगो ऽभिप्रसपसः॥ उच समवापे॥ किंभूतं वासः रायस्पोषं॥

सं बंधनः २ हे भास्वो देवते ...

॥४३॥
॥मदा॥

धनादिपोषणं पुष्टिकरं। किं वा एतत्सर्वं धेनाहं शतं शरदो वर्षाणि जीवामि॥ ॥अथोत्तरीयं यशसा मा
द्यावापृथिवी यशसेंद्राबृहस्पती। यशो भगश्च माविंदद्यशो मा प्रतिपद्यतामिति॥ ॥अथ परिधाना
नंतरं आचम्य यशसा मेति मंत्रेण आहृतमेव वास उत्तरीयं आच्छादयीतेति मंत्रार्थः॥ ओन्नम्या कार्त्तो
मा मां अविंदन्॥ विंदती। प्राप्नुतामिति यावत्॥ विद्लृ लाभे धातुः॥ विभक्तिवचनव्यत्ययेनान्वयः॥ तथा इंद्र
बृहस्पती अपि यशसा युक्तौ। मा अविंदन्। तथा भगः सूर्योपि यशसा अविंदन्। तैश्चैतैः संपादितं यशो
मामपि प्रतिपद्यतां मयि सर्वदा तिष्ठत्वित्यर्थः॥ ॥एकं चेत्पूर्वस्योत्तरवर्गेण प्रच्छादयीत॥ ॥चेद्यदि
एकं वासो भवति द्वितीयं नास्ति तदा पूर्वस्य परिधानीयस्यैव वाससः उत्तरवर्गेण उत्तरभागेनाच्छादयी
तः उत्तरीयं कुर्यात्॥ तत्रापि यशसामेति मंत्रो भवति। क्रियांतरत्वात्॥ अत्रैवं। पूर्ववस्त्रादर्धं समंत्रकं प
रिधाय द्वितीयमर्धं उत्तरार्धं गृहीत्वा उत्तरीयमंत्रं पठित्वोत्तरीयं कृत्वा पुनर्द्विराचामेत्॥ ॥सुमनसः प्रति

राम

॥धर॥
॥४३॥

गृह्णाति या आहरज्जमदग्निः श्रद्धायै कामायेन्द्रियाय॥ ता अहं प्रतिगृह्णामि यशसा च भगेन चेति॥ ॥सुमन
सः पुष्पाणि॥ प्रतीत्युपसर्गसामर्थ्यानुकरणात् समर्पिताः सुमनसः प्रतिगृह्णाति या आहरदिति मंत्रेण। मंत्रार्थः॥
याः सुमनसः पुष्पाणि जमदग्निः प्रजापतिः श्रद्धाद्यर्थमाहरत। आददौ। ताः सुमनसो यशसा कीर्त्या च भगे
नैश्वर्येण च सह अहं प्रतिगृह्णामि॥ श्रद्धाद्यर्थं। तत्र श्रद्धा धर्मादरः। मेधा धारणशक्तिः। कामोभिला
षमूर्त्तिः॥ इंद्रियं तत्पाटवं॥ ॥यथाव बध्नीत यशो अप्सरसामिंद्रश्चकार विपुलं पृथु॥ तेन संग्रथिताः
सुमनस आबध्नामि यशो मयीति॥ ॥ताः प्रतिगृह्य शिरसि बध्नाति यशो अप्सरसामिति मंत्रेण॥ मंत्रार्थः॥
हे सुमनसः। इंद्रो देवः अप्सरसां उर्वश्यादीनां कुसुमाबंधनेन यशः सर्वजनप्रियं चकार। कृतवान्। तेन य
शसा संग्रथिताः पुष्पाणि आबध्नामि॥ कुडायां किंभूतं यशः विपुलं विशालं। पृथु संततं दीर्घं तद्यशो मयि विषये ति
[illegible] तिष्ठत्विति [illegible] र्थः॥ ॥उष्णीषेणाशिरो वेष्टयते ऽवासो वासा इति॥ ॥उष्णीषेण शिरो वेष्टयते ऽवा
सा इति मंत्रेण। व्याख्यानमस्य पम्मुपनयने॥ ॥अलंकरणमसि भूयोऽलंकरणं भूयादिति कर्णवेष्टकौ

॥४४॥
॥पार॥

॥ ॥कर्णवेष्टकौ कुंडले दक्षिणस्य कर्णयोरामुंचति॥ अलंकरणमसीति मंत्रात् कर्णयोः मंत्रार्थः॥ हे कुंड
लदेवते त्वमलंकरणं अलंकारश्चासि॥ अतस्त्वयालंकृतस्य मम भूयो बहुवारं अलंकारणं भूयात्॥ अस्ता॥
॥ ॥वृत्रस्येत्यङ्क्तेऽक्षिणी॥ वृत्रस्येत्यादि चक्षुर्मे देहीत्यनेन मंत्रेण कज्जलेन अक्षिणी अंक्ते। संस्करोति। सौवीरां
जनेनेति हरिहरः। अत्र च सव्यनेत्रमंक्त्वा ततो दक्षिणांजनं मंत्रावृत्त्या। तथा च दीक्षाप्रकरणे लिंगं॥ सव्यं वा
अग्रेमानुषेइति॥ वृत्रस्य त्वक्षिणी अंक्ते त्यंजनेनेति कारिकायां॥ सव्यं प्रथममित्येव भ्रूपते बह्वृचस्मृ
तौ। हरिहरेण दक्षिणांजनं पूर्वमुक्तं तदत्रापि न विरुद्धं॥ ॥ रोचिष्णुरसीत्यात्मानमादर्शे प्रेक्षते॥ ॥
आत्मानं स्वदेहं आदर्शे दर्पणे प्रेक्षते पश्यति। रोचिष्णुरसीत्येतावता मंत्रेण। मंत्रार्थः॥ रोचिष्णुः प्रका
शकः॥ ॥छत्रं प्रतिगृह्णाति बृहस्पतेश्छदिरसि पाप्मनो मामंतर्धेहि तेजसो यशसो मांतर्धेहीति॥ ॥
उपसर्गसामर्थ्यात्करणाच्छत्रे छत्रं आतपत्रं बृहस्पतेश्छदिरसीति मंत्रेण प्रतिगृह्णाति॥ मंत्रार्थः॥ हे छत्र
त्वं बृहस्पतेः पितामहस्य छदिः धर्मादिनिवर्त्तकोसि प्रथमं। अतः पाप्मनो निषिद्धाचरणात् मामंत

राम

॥पार॥
॥४४॥

तर्ह्येहि गृं तर्हि हितं कुरु। ते जस्व स्त्रस्कात्राणात् मां तर्हि हि मामभवहितं कुरु। तद्युक्तं कुर्विल्यर्थः॥ ॥प्रतिष्ठे स्थो विश्व
तो मा पातमित्युपानहौ प्रतिमुंचते॥ ॥प्रतिष्ठे स्थ इति मंत्रेण उपानहौ पादत्राणे पादयोः प्रतिमुंचते। परिध
त्ते। युगपत् ग्राक्य त्वाद्विवचनांत त्वाद्व मंत्रस्य। मंत्र। हे उपानहौ देवते युवां प्रतिष्ठे स्थः स्थितिहेतुस्थः॥ अतएव॥
त्ती विश्वतः सर्वस्मात् परिस्रवात्। मामां पातं रक्षतं॥ ॥विश्वाभ्यो मा नाष्ट्राभ्यस्परि पाहि सर्वत इति वैणवं दं
डमादत्ते॥ ॥विश्वाभ्य इति मंत्रेण वैणवं वंशमयं दंडं पाणिनादत्ते। अत्राग्निबेकादिदंडधारणं तेकर्मस्नानके
र्तुर्नत्वाचार्यस्य॥ मंत्रार्थः॥ हे दंड विश्वाभ्यः सर्वाभ्यः॥ नाष्ट्राभ्यो राक्षसादिभ्यः॥ सर्वाभ्यस्तु मामां परिपा
हि॥ सर्वाभ्यावैनरक्ष॥ ॥दंतप्रक्षालनादीनि नित्यमपि वासश्छत्रोपानहश्चापूर्वाणि चेन्मंत्रः॥ ॥दं
तप्रक्षालनमादौ येषां पुष्पादानानां तानि दंतप्रक्षालनादीनि तत्साधनानि प्राप्यानि त्यमपि नित्यमे
व मंत्रो भवति॥ अपि एवार्थे॥ वासः सौवच्छत्रं च उपानहौ च वासश्छत्रोपानहः। चकाराद्दंडोपि। एतानि
वासआदीनि नवीनानि चेत्पंतेतदेव मंत्रो भवति न तु सर्वदा॥ ॥इति श्रीवामनात्मजदीक्षितगदाध

८२

रकृते गृह्यभाष्ये द्वितीयकांडे षष्ठी कंडिका ॥ ॥ अथ पदार्थक्रमः ॥ सुरेश्वरः ॥ सौम्यायनेजयोर्वीरे नक्षत्रे
च वृते दिते ॥ तेराचंद्रादिशुद्धौ च स्यात्समावर्त्तनक्रियेति ॥ एतच्च ब्रह्मचारी व्रतलोपप्रायश्चित्तं कृत्वा कार्यं ॥
तदाह बोधायनः ॥ भैक्षचर्यादर्भजिह्माग्निकार्यराहित्यकौपीनोपवीतमेखलादंडाजिनाधारणदिवा
स्वापछत्रपादुकास्रग्धारणदर्पणानुलेपनांजनघृतनृत्यगीतवाद्यादिभिरजो ब्रह्मचारी कृच्छ्रत्रयं चरेदि
ति ॥ ब्रह्मचारी गुरुं अर्थदानेन संपूज्य तेनानुज्ञातो ज्योतिःशास्त्रोक्ते शुभकाले आचार्यगृहे समावर्त्तनं
नामकर्म कुर्यात् ॥ ब्रह्मचारी कृतनित्यक्रियः कृतप्रातरग्निकार्यश्च ॥ ततआचार्यः प्राणानायम्य देशका
लौ स्मृत्वा अस्य ब्रह्मचारिणः गृहस्थाश्रमांतरप्राप्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं समावर्त्तनाख्यं
कर्म करिष्ये इति संकल्प्य तदंगत्वेन निर्विघ्नार्थं गणपतिपूजनं स्वस्तिपुण्याहवाचनं मातृकापू
जनं नांदीश्राद्धं चाहं करिष्ये ॥ आज्यादि समाप्य ॥ ततआचार्य अहं स्नास्ये इत्युक्तः स्नाहीति प्रत्यनुज्ञा गुरोः ॥
ततः पादोपसंग्रहणं गुरोः ॥ ततः परिश्रिते पंचभूसंस्कारान् कृत्वा लौकिकाग्नेः स्थापनं ॥ वैकल्पिकाव

धारणे विशेषः ॥ दधिप्राशनं ॥ अमो अधौतवस्त्रं । ततो ब्रह्मवरणाद्याज्यभागांते विशेषः । उपकल्पनीयेषु । समि-
धं न काष्ठानि । समिधः । पर्युक्षणार्थमुदकं ॥ हरितकुशाः ॥ अन्यो उदकुंभः । औदुंबरं षाड्दशांगुलं दंतकाष्ठं ब्रा-
ह्मणस्य । द्वादशांगुलं राजन्यस्य । अष्टांगुलं वैश्यस्य । दधि नापितः । स्नानार्थमुदकं । उद्वर्तनद्रव्यं ॥ चंदनं ॥ अ-
हते वाससी ॥ प्रयोगरत्नमते यज्ञोपवीते । पुष्पाणि । उष्णीषं ॥ कर्णालंकारौ ॥ अंजनं ॥ आदर्शः ॥ नूतनछत्रं
उपानहौ ॥ वैणवो दंडः ॥ ततः पवित्रकरणाद्याज्यभागांते कुर्यात् । अंतरिक्षाय स्वाहा ॥ वायवे स्वाहा । ब्रह्मणे
स्वाहा । छंदोभ्यः स्वाहा । प्रजापतये स्वाहा ॥ देवेभ्यः स्वाहा ॥ ऋषिभ्यः स्वाहा । श्रद्धायै स्वाहा ॥ मेधायै स्वाहा ।
सदसस्पतये स्वा॰ अनुमतये स्वाहा ॥ लिंगोक्तास्सामगाः । यदि ऋग्वेदमधीत्य स्नाति तदा पृथिव्यै स्वाहा ॥ अ-
ग्नये स्वाहेत्याहुतिद्वयं हुत्वा ब्रह्मणे छंदोभ्य इत्यादिभ्य अनुमत्यंतान्नवाहुतीर्जुहोति । एवं सामवेदादि-
वे सूर्यायेत्याहुतिद्वयं हुत्वा ब्रह्मण इत्याद्यान्नवाहुतीर्जुहोति ॥ एवमथर्ववेदेपि दिग्भ्यः स्वाहा चंद्रमसे इत्याहु-
तिद्वयं हुत्वा ब्रह्मणे छंदोभ्य इत्याद्या जुहोति ॥ यदि वेदचतुष्टयमधीत्य स्नानं करोति तदा आज्यभागा-

॥४६॥
॥ग दा॥

नंतरं श्रुतिवेदं वेदाहुतिद्वयं हुत्वा ब्रह्मणे छंदोभ्य इत्याज्याहुतीः पुनः पुनर्जुहोति। ततः प्रजापतय इत्यानन्वग्र
नुमत्यंताः समाहुतीस्तंत्रेण जुहोति। एवं वेदद्वयव्रताध्ययने पियोज्यं। ततो व्यस्ताः समस्ताः नवाहुतयः। ततः स्वि
ष्टकृद्धोमः॥ ततः प्राशनादि विमोकांतं। ततो ब्रह्मचारी उपसंग्रहणपूर्वकं गुरुं नमस्कृत्य परिसमूहनादि आयु
ष्करणांतं समिदाधानं। तस्मिन्नेवाग्नौ कुर्यात्। ततः आचार्यपुरुषैः पारिश्रितस्योत्तरत्राग्ने स्थापितानां द
द्भिरेणोत्तरायतानां मष्टानां मुदकुंभानां पूर्वभागे आस्तृतेषु [illegible] प्रागग्रेषु कुशेषु उदङ्मुखः स्थित्वा
ये अप्स्वंतरिति मंत्रेण प्रथमकलशादुदकं गृहीत्वा तेनोदकेन स्वकीयशिरसोऽभिषेकस्तेन मामिति मंत्रे
ण। एवमेव द्वितीयादिभ्यः उदकं ये अप्स्वंतरित्यनेनैव केकस्माड्डोल्लमादाय वद्यमाणैर्मंत्रैरभि
षेकः॥ ततो येन श्रियमिति द्वितीयः॥ आपो हि ष्ठेति तृतीयः। यो व इति चतुर्थः॥ तस्मा इति पंचमः॥ तत
स्तूष्णीं त्रिवारमभिषेकः॥ तत उदुत्तममिति मेखलां शिरोमार्गेण निःसार्यन्नमो प्रक्षेपः। ततः कृष्णाजि
नं दंडयोरुत्सर्गः॥ वासोन्यत्परिधायादित्योपस्थानमुद्यन्भ्राजभृष्णुरिति। ततो दधिप्राशनं॥ तिल

मम लुजेल नर्णा
ना५

राम

॥ध रा॥
॥४६॥

नांवा। जपलोमनखानां ६ निकृंतनं। स्नानं॥ औदुंबरेण काष्ठेन दंतधावनमन्नाद्यायेति। ततः सुगंधद्र
व्येणोद्वर्त्तनं॥ स्नानं। चंदनाद्यनुलेपनं गृहीत्वा मुखनासिकयोरुपग्रहणं प्राणापानाविति॥ ततोपसव्ये
न दक्षिणामुखेन पाण्यवनेजनजलस्य दक्षिणस्यां दिशि निषेकः पितरः शुंधध्वमिति। ततः सव्येनोद
कालंभनः॥ ततश्चंदनेनात्मानमनुलिप्य सुचक्षा अहमिति जपः॥ अहतवाससः परिधानं परिधास्याइ
ति॥ अरजकल्प्य धौतस्य वा॥ द्विराचमनं॥ धारयेद्वैणवीं यष्टिं सोदकं च कमंडलुं। यज्ञोपवीते द्वे च शु
चै रौक्मे च कुंडले इति मनुनोक्तत्वाद्यज्ञोपवीतेंपधारणमिति हरिहरः॥ प्रयोगरत्नकारस्तु। तत उत्त
रीयवस्त्रधारणं॥ यशसा मेति। एकवस्त्रस्योत्तरत्यागेन उत्तरीयधारणं॥ आहरज्जमदग्निरिति
सुमनसः प्रतिग्रहः॥ ततः शिरसि पुष्पबंधनं॥ यद्यशोप्सरसेति। उष्णीषेण शिरोवेष्टयते॥ युवा सुवा
साइति॥ अलंकरणमसीति कुंडलधारणं॥ मंत्रावृत्त्या दक्षिणकर्णे च। वृत्रस्य त्व [illegible] क्षिणी अंक्ते प्रथम
दक्षिणं ततो वाममनेनैव मंत्रेण॥ रोचिष्णुरसीत्यनेनात्मानमादर्शे प्रेक्षणं॥ बृहस्पतेछदिरिति छ

वामकर्णे [illegible] २

॥४७॥
॥गदा॥

अप्रतिगृह्णं॥ प्रतिषिद्धस्य इत्युपानहोः प्रति मुंचते पादयोर्युगपत्॥ ततो विष्वान्यग्निति दंडदानं॥ अभिषेकादिदंडदानांतं स्नानकर्मीकरोति नाचार्यः॥ समावर्तनोत्तरं पूर्वमतानां त्रिरात्रमाशौचं कार्यं॥ आदिपदीनोदकं कुर्यादाव्रतस्य समापनात्॥ समाप्ते तूदकं दत्वा त्रिरात्रमशुचिर्भवेदित्युक्तेः॥ आदिपदी ब्रह्मचारीति विज्ञानेश्वरः॥ ब्रह्मचर्यं यदि कश्चिन्मृतमतस्तदा त्रिरात्रमध्ये विवाहः॥ कार्यो न्यायानेतिसिद्धयति॥ तन नेतु स त्यपि न त्रिरात्रं तत्रातिक्रांतोशौचाभावादुदकं दत्वेति कृत्वनाद्वेतिदिक्॥ ततो मधुपर्कः॥ ॥इतिसमावर्तनेपदार्थक्रमः॥ ॥अत्र गार्ग्यमते होमो नास्ति अन्यत्तुल्यं॥ ॥स्नातस्य नियमान्वक्ष्यामः॥ ॥स्नातस्य ब्रह्मचर्यात्समावर्तनस्यैव वर्णिकस्य यमान् नियमान् वक्ष्यामः॥ अधिकारसूत्रमेतत्॥ तेषु स्नातकोधि क्रियते॥ ॥कामादितरः॥ ॥कामादिच्छातः इतरः स्नानसंबंधः अन्यः अशौनिधीयते॥ सहि स्नातकोन भवति॥ एवं वसति इच्छयाप्यस्यापमे वाधिकारो भवति॥ तानाह॥ ॥नृत्यगीतवादित्राणि न कुर्यान्न च

श्रीराम

॥घृ॥
॥४७॥

गच्छेत्॥ ॥नृत्तं च गीतं च वादित्रं च नृत्तगीतवादित्राणि तानि स्वयं न कुर्यात्॥ न च गच्छेत् नृत्यादीनि द्रष्टुं
क्षिपमाणानि द्रष्टुं श्रोतुं वा न व्रजेत्॥ ॥कामं तु गीतं॥ तु पुनः कामं इच्छया गीतं गानं स्वयं कुर्यात्॥ अन्ये
क्षिपमाणं श्रोतुं गच्छेत् च कर्मण्येषोपयिकत्वात् गीतकस्य दृष्टपत्नीहि अश्वमेधे गानं॥ ब्राह्मणो गायति राजन्यो
न्य इति॥ न चाक्षिप्यमाणं श्रवणे गानमिति॥ गायति वैव गीते वा रमतेत्यपरं॥ अपरं उखासंचरणेकं
उवचनमस्ति। तस्मादुहैतद्यः सर्वः कृत्स्नो मन्यते गायति वैव गीते वा रमत इति। अपरं गृहणाद्य पूर्वेन्या
यप्राप्तमभिहितं। एवं च यत्रापि पुनर्वचनेन देवताप्रेन्नत्य गीतादिकं विहितं तत्रापि ब्राह्मणादिभिः कार्य
मेव। विहिते निषेधाप्रवृत्तेः॥ क्षेमेन कं ग्रामांतरं न गच्छेत्॥ ॥क्षेमेण क्षेमं इत्यनुवर्तते। क्षेमे सति न
च धावेत् शीघ्रं गच्छेत्॥ ॥उदपानावेक्षणवृक्षारोहणफलप्रतपनसंधिसर्पणविवृतस्नानविष
मलंघनशुक्लवदनसंध्यादित्यप्रेक्षणभैक्षाणि न कुर्यात्॥ ॥उदपानस्य कूपस्य अवेक्षणं उ
परिस्थित्वा अधोमुखीभूय अवलोकनं॥ आम्रादिवृक्षेषु आरोहणं॥ उपरिगमनं॥ फलानि आम्रादी
नि आपदोऽभावे सति न क्षेरात्रौ ग्रामांतरं अन्यग्रामं न गच्छेत्॥ अक्षेमेनु स्वग्रामेपि गच्छेत्॥ न च धावेत्॥ ४

अध्वगमना॥ ...ङ्गवारतत्रसर्पणं॥

णं१२

॥४८१॥ ॥गदा॥ ...तिक्रमणं॥२

नांप्रपतनं॥ त्रोटनं॥ संध्योः संध्यासमये सर्षणं [illegible] वा॥ विवतेन नग्नेन स्नानं॥ विषमस्य पर्वतादेर्लंघनं
रूढ्वर्ध्वगमनं॥ [illegible] संध्यादित्यप्रेक्षणं॥ संध्यासु सूर्यावेक्षणं॥ नेक्षेतोद्यंतमादित्यं ना
स्तं यंतं कदाचन॥ नोपसृष्टं न वारिस्थं न मध्यं नभसो गतमिति स्मृतेः॥ निरीक्षणं॥ सिद्धान्त्रस्येव॥ उद
पानावेक्षणादीनि विवर्जयेत्॥ तत्र नेक्षणप्रतिषेधप्रत्यक्षमेव वचनमस्तीत्याह॥ नह वै स्नातो वाग्निंद्वे
तापह वै स्नातो वाग्निं द्योत्यपतीतिश्रुतेः॥ स्नातो वा समावृत्तेनाग्निं द्वेतापतः स्नातो वाग्निं द्योत्यपयाति॥ अपाक
रोति॥ ह वै इति निपातसमुदायो निश्चयार्थः॥ अत्रापि दृष्टार्थं विषयं प्रतिषेधस्तत्र दृष्टार्थत्वादेवाकर
णे प्राप्ते प्रतिषेधविधानसामर्थ्याददृष्टार्थताप्यनुमीयते॥ ॥वर्षत्यप्रावृतो व्रजेदयं मे वज्रः पाप्मा
नमपहनदिति॥ ॥पर्जन्ये वर्षति अप्रावृत अनाछादित एव व्रजेत् गच्छेत्॥ अयं मे वज्र इति मंत्रेण॥
जलकरणरूपो वज्रो मेम मपाप्मानं अपहनत् अपहंतु॥ ॥अप्स्वात्मानं नावेक्षेत॥ ॥अप्सु जले
आत्मानं स्वशरीरं न पश्येत्॥ ॥अजातलोम्नीं विपुंसीं षंढं च नोपहसेत्॥ ॥समयेष्वनुसत्रलो

राम

॥धर॥ ॥४५॥

भगालजि कपालं॥ नगालमितिकपालं खर्परं ब्रूयात्॥ मणिधनुः मणिधनुरितीं इंद्रधनुः॥ मणिधनुरिति इंद्रधनुर्ब्रूयात्॥

न्नी॥ अजातानि लोमानि यस्याः सा सा अजातलोम्नी विपुंसी। कूर्चादिपुरुषालंकृतीः स्त्रियं॥ षंढः प्रसिद्धः॥ एतानि तानि नोपहसेत्॥ नाग्निं गृह्णीयात्। गर्भिणीं विजन्येति ब्रूयात्सकुलमिति न कुलं न गालमिति कपालं मणिधनुरितीं इंद्रधनु गांधयंतीं परस्मै नाचक्षीत। गर्भिणीं गुर्विणीं विजन्येति पापं शब्दं न वदेत्॥ न गर्भिणीमिति। उक्तस्वाप्येवमेव योज्यं। सकुलइति नकुलं॥ सकुलइति नकुलं ब्रूयात्॥ गांधयंतीं परस्मै नाचक्षीत॥ परस्य गां स्तनंधयं तीवत्सं पायपंतीं परस्मै अन्यस्मै स्वामिने वा नाचक्षीतन कथयेत्॥ ॥ उर्वरायामनंतर्हितायां न मावुत्सर्पस्ति छन्नमूत्रपुरीषे कुर्यात्॥ उर्वरायां सस्यवत्यां भूमौ तथैव अनंतर्हितायां केवलायां च मूत्रस्य पुरीषस्य वा उत्सर्गं न कुर्यात्॥ किंच॥ तिष्ठन् ऊर्ध्वः सन् न कुर्यात्। तथा उत्सर्पन् उत्प्लवमानः सन्न कुर्यात्। स्वयं प्रशीर्णेन काष्ठेन गुदं प्रमृजीत॥ आत्मनः प्रयत्नमंतरेण स्वयमेव प्रशीर्णेनाच्छिन्नेन दारुशकलेन गुदं प्रमृजीत। प्रोंछेत्। परिमार्जयेत्॥ ततः शौचं कुर्यात्॥ ॥ [illegible] विकृतवासा नाच्छादयीत॥ विकृतं नील्यादिना विकारमापादितं वस्त्रं न परि

गृहस्थ शब्दे न ... अभिगम न कुर्वीत २

स्मर्वेतआत्मानंगोपाये

दधीत। अत्र न कषायप्रतिषेधः। कषायरक्तं तु प्रशस्यत इति भाष्यकाराः। ८८ व्रतीव धत्रः स्यात्सर्वेषां मित्रमि-
व॥ ८८ व्रतैः संकल्पो यस्य स ८८ व्रतः स्यात्। भवेत् तपाव घात घातात आत्मानं परं च त्रायते रक्षतीति वधत्रः
स्यात्॥ सर्वेषां परेषां च मित्रमिव सखेव। सर्वेषु सुहृद्वितकारी भवेत्॥ मैत्रो ब्राह्मण उच्यत इति श्रु-
तेः॥ ॥इति द्वितीयकांडे सप्तमी कंडिका॥ ॥स्नातस्य समावर्तनेनप्रवृत्ति पावकाह स्नस्य धर्मान्निभिधाया-
धुनातस्यैव समावर्त्तनदिनमारभ्य त्रिरात्रव्रतमाह॥ तिस्रो रात्रीर्व्रतं चरेत्॥ वक्ष्यमाणं व्रतं तिस्रः त्रि-
संख्याः रात्रीः अहोरात्राणि चरेत् अनुतिष्ठेत्॥ अमांसाश्यमन्मयपायी॥ मांसमश्नातीत्येवं शीलो मा-
सांशी स न भवतीत्यमांसाशी॥ मन्मयेन मृत्पात्रेण पिबतीत्येवं शीलो मन्मयपायी। स न भवतीत्यमन्म-
यपायी स्यात् इति शेषः॥ स्त्रीशूद्रशवकृष्णशकुनिशुनां चादर्शनमसंभाषा च तैः॥ स्त्री नारी। शूद्रो त्यवर्णः।
शवः मृतशरीरं। कृष्णशकुनिः। काकः। श्वा कुक्कुरः एषामदर्शनं भवेत्। एतैः स्त्र्यादिभिः सह असंभाषणं
च॥ अशवनमस्कारः॥ अत्र यस्य येन पादकर्षसंभाषणं प्राप्तं तादृक् निषिध्यते॥ शवशूद्रसूतकान्नानि

॥४७॥
॥८८॥

राम

॥५१॥
॥४२॥

निचनाघात ५ कोश्याल ब्ध्वा आयजाति तिभिः इषतेतद्धुचानृ स॰

मरणानंतर

चनाघातं॥ अङ्गस्पर्शोदयान्नस्य नापितादेरन्तः श्मश्रुप्रसवे सति अर्वाक् द्वादशाहात् पतत्यातीनामन्तं तत्सूतका
न्ते। एतानि नाघात। न नक्षयेत्॥ मूत्रपुरीषे ष्ठीवनं चातपे न कुर्यात्॥ ष्ठीवनं थूत्कृत्य मुखाज्जलादित्यजनं॥
एतत्त्रयमातपे धर्मे न कुर्यात् नोत्सृजेत्॥ सूर्याच्चात्मानं नांतर्दधीत॥ सूर्यादित्यादात्मानं छत्रादिनान्तर
र्हितं न कुर्यात्॥ तप्तेनोदकार्थान्कुर्वीत॥ तप्तेन जलेन उदकार्थान् उदकसाध्याः शौचाचमनादिकाः क्रियाः
कार्याः॥ अवस्फोर्ते रात्रौ भोजनं रात्रौ अवस्फोर्ते उल्काघनान्तरे एवंप्रकारेऽकाले भोजनं न कुर्यात्॥ सत्यवदनमेव वा
दीक्षितो यथातपादीनि कुर्यात् प्रवर्ग्यवांश्चेत्॥ चेद्यदि दीक्षितः सोमयागार्थं स्वीकृतदीक्षः प्रवर्ग्यवान् प्रवर्ग्यः
सोमयागाङ्गकर्मविशेषः सोऽयस्यास्तीति प्रवर्ग्यवान् तदाऽऽतपादीनि मूत्रपुरीषष्ठीवनं चातपे न कुर्यादि
त्यादीनि करोति॥ ॥इति गदाधरकृते गृह्यभाष्ये द्वितीयकाण्डे अष्टमी कण्डिका॥ ८ ॥ छ॥ अथातः पं
चमहायज्ञाः॥ ॥व्याख्यास्यन्त इति सूत्रशेषः॥ महायज्ञा इति कर्मनामधेयं। तत्रैको देवयज्ञो ब्रह्मणे स्वा
हेत्येवमादिहोमरूपः॥ मणिके त्रीनित्येवमादिबलिरूपो भूतयज्ञः॥ पितृभ्यः स्वधा नम इति बलि

अथ वा रसत्यभाषणमेव कुर्यात् ॥ ५
नाधस्तेन नेमात ॥

दीपो ५

पं २ २

स्वं २

राम

१५०२
॥गृ०द॥

दानं पितृयज्ञः। हंतकारातिथिपूजनादिरूपो मनुष्ययज्ञः। पूर्वं ग्रहणात् तेन च सो ब्रह्मयज्ञः॥ एते पंच महायज्ञा अ
हरहः कर्त्तव्याः नित्यत्वात्॥ यत्तु नैतेषां फलश्रवणं तदेषां पापक्षयार्थत्वख्यापनार्थं न काम्यत्वप्रतिपादनाय॥
एषां मनुष्यानप्रकारमाह। वैश्वदेवादन्नात्पर्युक्ष्य स्वाहाकारैर्जुहुयात्॥ ॥ विश्वे सर्वे देवता यस्मिंस्तद्वै
श्वदेवमन्नं। ते च देवपितृमनुष्यादयः। कथमेषां देवतात्वमिति चेत्तापेन स्मृता वेषां दानं विहितं। एवं चा
दत्त्वा शेषभुंजानो गृहपतिर्नाश्नवितव्यं। तस्माद्वैश्वदेवमन्नं प्रत्यहं पच्यते शालाग्नौ तत आदायाग्निं
पर्युक्ष्य स्वाहाकारैः सह वक्ष्यमाणैर्मंत्रैर्जुहुयात्। पर्युक्षग्रहणं च कुत्राकेडिकोक्तेतिकर्त्तव्यताप्रद
सः॥ स्वाहाकारैरिति॥ यज्जुहोति तत्स्वाहाकारैः। शेषे नमस्काराः॥ आचरंति हि बलिकर्मणि नमस्का
रः॥ यथा स्वाहाकारग्रहणं संस्रवप्रदानार्थं॥ ॥ ब्रह्मणे प्रजापतये गृह्याभ्यः कश्यपायानुमत
यइति॥ ॥ एतैर्मंत्रैः पंचाहुतीर्जुहोति॥ भूतगृह्येभ्यः॥ भूतानि च गृह्याणि च भूतगृह्याणि तेभ्यो बलिं
ददाति॥ तान्याह॥ ॥ मणिके त्रीन्पर्जन्यायाद्भ्यः पृथिव्यै॥ ॥ मणिके मणिकसमीपे सामीप्ये स

राम
॥गृ०र॥
१५०॥

चतुर्थबलिहरणशंका निरस्यर्थे। केचित् मध्यमाग्नेध्येभ्य इति र

प्रक्षीप्य। त्रीन् बलीन् ~~[struck]~~ दद्यात्॥ पर्जन्याय नमः॥ अद्भ्यो नमः॥ पृथिव्यै नमः॥ इति मंत्रैः॥ त्रीनिति ग्रहणं कृतमग्ने
भ्य इति एवं समंत्रकं चतुर्थं बलिहरणमिच्छंति धात्रे विधात्रे च द्वार्ययोः॥ द्वार्ययोर्द्वारशाखयोर्मध्ये धात्रे
विधात्रे इति द्वौ बली ददाति॥ प्रतिदिशं वायवे दिशां च॥ दिशां दिशां प्रति वायवे नम इत्येकैकं बलिं दद्यात्॥ दिशां
च यद्दानं तदपि प्रतिदिशं स्वस्वनाममंत्रैर्ददाति॥ ततश्च प्राच्यै दिशे नम इत्यादि सिध्यति॥ ॥मध्ये त्रीन् ब्रह्मणे
तरिक्षाय सूर्याय॥ ॥प्रतिदिशं च बलीनां मध्ये अंतराले ब्रह्मणे नम इत्यादि॥ त्रीन् बलीन् दद्यात्॥ विश्वे
भ्यो देवेभ्यो विश्वेभ्यश्च भूतेभ्यश्च तेषामुत्तरतः। आनंतर्यात्तेषां बलीनां त्रयाणां उत्तरप्रदेशे विश्वेभ्यो देवेभ्यो
नमो विश्वेभ्यो भूतेभ्यो नम इति द्वौ बली दद्यात्॥ विश्वेभ्यश्च भूतेभ्यो भूतानां च पतये इत्युत्तरपत्रमंत्रे चकारः
पठनीय इति गर्गः उषसे भूतानां च पतये परं॥ परमिति तयोरुत्तरतः॥ उषसे नमः भूतानां पतये नम इ
ति द्वौ बली दद्यात्॥ पितृभ्यः स्वधा नम इति दक्षिणतः॥ तेषामेव ब्रह्मादिबलीनां त्रयाणां दक्षिणतः दक्षि
ण प्रदेशे पितृभ्यः स्वधा नम इति मंत्रेणैकं बलिं दद्यात्॥ पित्र्यो वा स्याद्दक्षिणामुखः॥ प्राचीनावीती

ततः पूर्वं वैश्वदेवाद् अन्नादुद्धृत्य अग्रं अन्नं षोडशग्रासपरिमितं ग्रासचतुष्टयपरिमितं वा ब्रा ह्मणाय

॥५१॥
॥ नदोष

भवति। नमस्कारस्थानत्वप्रदर्शितम्। आचार्येण स सर्वत्र बलिहरणेषु प्रयोक्तव्यः॥ समाचारादित्युक्तमेव॥ पात्रं
निर्णिज्योत्तरापरस्यां दिशि निनयेद्यक्ष्मैतत्त इति॥ ॥पात्रं उद्धरणपात्रं निर्णिज्य प्रक्षाल्य तदुदकं ब्रह्म
दिबलित्रयाणामेवोत्तरापरस्यां वायव्यां दिशि निनयेत्॥ यक्ष्मैतत्त इति मंत्रेण। अत्र निर्णेजनमित
घ्याहारः। बलिहरणे मघ्यादि देवाः आलापाः ग्रास्या इति नर्तपरः॥ उद्धृत्याग्रं ब्राह्मणायावनेज्य
दद्यात् हंत तत इति॥ अवनेजनजलं दत्वा हंत तत इति मंत्रेण दद्यात्॥ हंतकाराच्च पूर्वं ब्रह्मपञ्चस्यावस
रः॥ न यज्ञो हि हंतकारादिग्रासदापात॥ रात्रावपि द्यतिपि पूजा स्मर्यते॥ अतिथिं प्रकल्पनीयस्या
न स्मनुगृहे वसेदिति। तस्माद्ब्रह्मयज्ञो निर्दिष्टकालोपि नव्यज्ञात्पूर्वमेवेति कर्का चार्याः॥ अतो नित्य
स्नानसूत्रस्यार्थे पत्नेमरुलंमरंप॥ प्रातर्होमानंतरं वा तर्पणात्पूर्वं वा वैश्वदेवावसाने वा ब्रह्मयज्ञ इति ह
रिहरः॥ कात्यायनः॥ पश्चस्मृतिजपः प्रोक्तो ब्रह्मयज्ञस्तु स स्मृतः॥ स चार्वाक् तर्पणात्कार्यः पश्चाद्
प्रातराहुतेः॥ वैश्वदेवावसाने वान्यत्रेति निमित्तकात्॥ तत्र चैकस्मिन्नहनि सकृदेव कार्यः॥

ह्मणाय
अग्रं
राम
॥५२॥
॥५१॥

गृहपतिः सर्वेतिथिभ्योऽश्नीयादिक्षुतः ॥ गृहपतिर्वा पत्न्याः सर्वमश्नीयात् न युगपत् क्षुतः

तदाह ॥ न हंतातिं न कोमंच स्वाध्याय पितृतर्पणं । नैकः श्राद्धद्वयं कुर्यात् समाने ऽहनि कुत्रचिदिति ॥ ॥ यथार्ह भिक्षुकान् अतिथींश्च संभजेरन् ॥ ॥ यथार्हं योपदन्नमर्हति तदनतिक्रम्य यथार्हं तत ॥ यथा न वतित यान्भिक्षुकान् परिव्राजकान् ब्रह्मचारी प्रभृतीन् ॥ तत्र भिक्षुकान् मध्यमां सवर्जितां एकाभितरेषां यथोचितां अतिथींश्च गृहधनीनान् श्रोत्रियादीन् संभजेरन् ॥ भिक्षाभोजनादिदानेन तोषयेरन् गृहमेधिनः ॥ बालज्येष्ठा गृह्या यथार्हमश्नीयुः ॥ बाला ज्येष्ठाः प्रथमो येषां ते बालज्येष्ठाः ते च ते गृह्याः गृहे भवाः पुत्रपौत्रादयः यथायोग्यमश्नीयुः भुंजीरन् ॥ पश्चाद्गृहपतिः पत्नी च ॥ गृह्याणामशनानंतरं गृहपतिर्गृहस्वामी पत्नी तत्स्त्री चाश्नीतः । पूर्वो वा गृहपतिस्तस्मादुत्स्वादिष्टं हि तिष्ठते ॥ तस्मात् स्वातंत्र्यात् पतत्त्वं तगृहपतिरश्नाति ॥ अतिथिभ्योऽश्नीते ऽश्नीयात् पूर्वं पत्न्या इति अहरहः स्वाहा कुर्याद् अन्नाभावे केनचित् काष्ठादेवेभ्यः ॥ देवयज्ञोपमहरहः प्रतिदिनं कार्यं स्वाहा कुर्यात् । देवेभ्यो ऽन्नेन जुहुयात् । अन्नाभावे केनचिदभ्येण काष्ठपर्यंतेनापि कार्यः ॥ पितृभ्यो मनुष्येभ्यश्चोदपात्रात् । पितृयज्ञो मनुष्ययज्ञश्चोदपात्रादप्यहर

अस्यार्थः ॥

॥५२॥
॥ग.दा.॥

नः कार्यः॥ एवं पंचमहायज्ञक्रिया गृहस्थगृहे वेति गम्यते॥ इति गदाधरकृते सूत्रभाष्ये द्वितीयकांडे नवमी कंडिका ९॥
अथ पदार्थक्रमः॥ ॥तत्र प्रथमप्रयोगे वैश्वदेवं विनैव मातः प्रज्वाल्य एकं सदेवमान्युदयिकं श्राद्धं। कादिकायां। अन्ने
पृथग्विलिंग्नोसंयक्त्वतुर्थ्यस्ताने माचरेत्। पंच मे पंच यज्ञाः स्युश्चैत्रनं चतद्रुत्तरं। अन्नेौ पृथग्विलिंग्नो स्यादिलांगेय
चूले स्मृतः। कृतश्चित्कारणान्न स्यकालांन्नाज्ञानोदनपेतेति। ग्रामसत्याल्पुकं महासमनेकल्वातग्रेवश्वदेवा
र्थं पाकं विधाय महानसनादंगाराहनाहस्ततानावसम्येनिधाय ततः पाकादन्नमुद्धृत्याग्निध्याये अग्नेरुत्तरः प्रा
ङ्मुख उपविश्य महिष्ठिकोदके नाग्निपर्युक्ष्याद्यापदक्षिणं जान्वाच्य हस्तेनसाद्वैश्वपर्वप्रकमोदनमादाय जुहुया
त्॥ ओं ब्रह्मणे स्वाहा ब्रह्मणे इदं न मम। प्रजापतये स्वाहा। प्रजापतये इदं न०। गृह्याभ्यः स्वाहा। इदं गृह्याभ्य
कश्यपाय स्वाहा। इदं कश्यपाय०। अनुमतये स्वा०। इदं मनुमतये०। ततो मणिकसमीये हुतशेषेणान्नेन बलि
त्रयं उदकुंसंस्थं दद्यात्। पर्जन्याय नमः॥ इदं पर्जन्याय०। अद्भ्यो नमः॥ इदमद्भ्यः॥ पृथिव्यै नमः॥ इदं पृथिव्यै न मम॥
ततो द्वार्ययोः शाखयोर्मध्ये प्राक्संस्थं बलिद्वयं दद्यात्॥ धात्रे नमः॥ इदं धात्रे०। विधात्रे नमः॥ इदं विधात्रे न०। तत्
तो वायवे नमः॥ इत्यनेनैव मंत्रेणोत्तरस्मात्प्रभृति दिक्षु प्रदक्षिणं बलिचतुष्टयं दद्यात्। इदं वायवे न ममेति सर्व
त्रातः प्रागादिचतसृषु दिक्षु दत्तो

इति देवयज्ञः ४

राम

॥धर॥
॥५२॥

नो वायुबलीनां पुरस्ताद् [illegible] चतुरो बलीन्दद्यात् । प्राच्यै दिशे नमः । इदं प्राच्यै दिशे । दक्षिणायै दिशे नमः । इदं द-
क्षिणायै० प्रतीच्यै दिशे नमः इदं प्रतीच्यै दिशे० उदीच्यै दिशे नमः । इदमुदीच्यै दिशे० । ततो वायुबलीनामंतराले
प्राक्संस्थं बलित्रयं दद्यात् ॥ ब्रह्मणे नमः । इदं ब्रह्मणे नमः अंतरिक्षाय नमः इदमंतरिक्षाय० । सूर्याय नमः इ-
दं सूर्याय एतेषामुत्तरतो बलिद्वयं दद्यात् ॥ विश्वेभ्यो देवेभ्यो नमः । इदं विश्वेभ्यो देवेभ्यः० विश्वेभ्यो भूतेभ्यो नमः
इदं विश्वेभ्यो भूतेभ्यः । तयोरप्युत्तरतो बलिद्वयं दद्यात् ॥ उषसे नमः इदमुषसे० भूतानां च पतये नमः इदं भूता-
नां च पतये० ॥ इति भूतयज्ञः ॥ अथ पितृयज्ञः ॥ तत्र प्राचीनावीती भूत्वा दक्षिणामुखः सव्यं जान्वाच्य ब्रह्मा-
दिबलित्रयस्य दक्षिणप्रदेशे पितृतीर्थेन पितृभ्यः स्वधा नम इति बलिं दद्यात् ॥ ॥ इति पितृयज्ञः ॥ ॥

ब

ततस्तत्पात्रं प्रक्षाल्य निर्णेजनजलं सव्येनैव ब्रह्मादिबलितो वायव्यां दिशि यक्ष्मैतत्ते निर्णेजनमिति
निनयेत् ॥ इदं यक्ष्मणे न मम ॥ ततः काकादिबलीन्बहिर्दद्यात् ॥ तद्यथा ॥ ऐंद्रवारुणवायव्याः सौ-
म्या वै नैर्ऋतास्तथा ॥ वायसाः प्रतिगृह्णंतु भूमौ पिंडं मयार्पितं ॥ इदं वायसेभ्यः ॥ श्वानौ द्वौ श्यामशबलौ
सुरभिर्वैष्णवी माता नित्यं विष्णुपदे स्थिता ॥ गोग्रासमर्पादत्तं सुरभीः प्रतिगृह्यतां २

॥५३॥
॥ग०॥

वल्लौ वैवस्वत कुल्लौ ऽङ्गवौ। तात्त्वांपि ऽंप्रदस्या मित्स्या तामेतावहिंस्त्वौ॥ इदं स्वच्छा॥ देवा मनुष्याःपश्चो वो वयांसि सिद्धाप्सरपक्षो रगदैत्यसंघाः॥ प्रेताःपिशाचास्तरवःसमस्ता येचान्नमिच्छंति मयाप्रदत्तं। इदं देवादिभ्यः॥ पिपीलिकाःकीटपतंगकाद्याबुभुक्षिताःकर्मनिबंधबद्धाः॥ तृप्त्यर्थमन्नं हि मया प्रदत्तं तेषामिदं ते मुदिता भवंतु॥ इदं पिपीलिकादिभ्यः। पादौ प्रक्षाल्याचामेत्॥ ॥ ब्रह्मयज्ञः॥ ॥तत्रासनोपरि न्यस्तप्रागग्रदर्भेषु प्राङ्मुख उपविष्टः पवित्रपाणिरन्यान्दर्भान्पाणिभ्यामादाय प्रणवव्याहृति पूर्वां गायत्रीमात्रापस्वरेणाधीत्य इषेत्वादिवेदमारभ्य यथाशक्ति कंडिकाध्याय ब्राह्मणं पठेत्॥ ब्राह्मणं च ब्राह्मणेषी वा पठेत्। ॐ स्वस्ती त्यंते वदेत्॥ द्विवेदाध्यायी एवं संहितां समाप्य ब्राह्मणमादावारभ्य समापयेत्। तच्च समाप्य द्विवेदाध्यायी द्वितीयं वेदमेवं क्रमेणारभ्य समापयेत॥ एवमेव तृतीयवेदं। चतुर्थवेदं॥ एवमेवेतिहासपुराणादीन्यपि त्वारभ्य क्रमेण समापनीयानि॥ जपयज्ञप्रसिद्धये प्रतिदिनं स्वाध्यायमिकों जपेदिति याज्ञवल्क्य स्मृति विधानात्॥ अमावास्यादिष्वनध्यायेष्वपि ब्रह्मयज्ञो भवत्येव। विधातृपनिषदमपि क्रमेण पठेत्। ब्रह्मयज्ञांतेऽर्थकृ। एवमेव गीतादिपाठः जपयज्ञसिध्यर्थं विधां वाध्यायमिकोर

राम

॥२२॥
॥५३॥

अहरहः स्वाध्यायमधीत इत्युक्तेः। कारिकायां विशेषः॥ बद्धांजलिर्दर्भपाणिः प्राङ्मुखस्तु कृतासनः। वामां
घ्रिमुत्तमं कृत्वा दक्षिणं तु तथाकरं। दक्षिणेनानुनिकरोत्संजलितमर्थमेताततः॥ प्रणवं प्राक्प्रयुंजीत व्याहृती
स्तिस्र एव तु॥ गायत्रीं चानुपूर्वेण विज्ञेयं ब्रह्मणो मुखं। ॐ स्वस्ति ब्रह्मयज्ञाते प्रोक्ष्योदञ्चो द्विपेदुदकं॥ वेदादि
कमुपक्रम्य यावद्वेदसमापनं॥ अध्यात्मिकायवाविद्याकं ऋग्यजुः सामएवचेति॥ ॥इति ब्रह्मयज्ञः॥ ।
ततो वैश्वदेवाद भौ दुग्धस्य षोडशग्रासपरिमितमन्नमुदकपूर्वकं ब्राह्मणाय दद्यात् इ[illegible] मंत्रासनका

नै६

दिमनुष्येभ्यो हंतं इति॥ अत्र निरग्नेर्नित्यश्राद्धं। तदुक्तं। कृतत्वात्पितृयज्ञस्य साग्नेः श्राद्धं न वि
द्यते। नित्यं पित्र्यं बलिनाऽनिरग्नेस्तु विद्यते॥ बलेरन्नावाप्ति असंपत्तौ यत्नात्काकबलिः स्मृतः॥ प्रदीपचं
डिकादौ तु स्मृतिसंग्रहोक्ता॥ तथा नित्यश्राद्धं निरग्नेः स्यात्साग्नेः पित्र्यो बलिः स्मृतः। कात्यायनीय
वाक्येन विकल्पः प्रतिभाति हि॥ श्राद्धं वापि तृयज्ञः स्यात्पित्र्यो बलिरथापि वा। साग्निकः पितृयज्ञांते ब
लिकर्म समाचरेत्॥ अनग्निर्हुतशेषं तु काके दद्यादिति स्मृतिः॥ तच्चैवं बहिर्निवेशानांते सोदकमन्नं

।।५४।।
।।गद।।

ऽमो चैडलवायसादिभ्यो निक्षिपेत्। मंत्रोऽस्त्यग्रे उक्तः।। मनुष्यशुनां च पतितानां च श्वपचानां पापरोगिणां।
वायसानां कृमीणां च शनकैर्निक्षिपेद्भुवि। पितृयज्ञोत्तरं ब्रह्मयज्ञकरणपक्षे तु काकादिबलिदाने ब्रह्मयज्ञो
त्तरं द्रष्टव्यं। अयं नित्यश्राद्धे विशेषः हेमाद्रौ।। एकमप्याशयेद्विप्रं षण्णामप्यन्वहं गृही।। अपीत्यनुकल्पः।।
प्रचेताः।। नामंत्रणं न होमं च नावाहनं न विसर्जनं।। न पिंडदानं विकिरं न दद्यादत्र दक्षिणां।। अत्र निर्दिष्ट
भोजयित्वा किंचिद्दत्वा विसर्जयेदिति तैत्तिरीयकेऽदक्षिणाविकल्पः।। यत्तु काशीखंडे। नित्यश्राद्धं देवही
नं नियमादिविवर्जितं।। दक्षिणारहितं चैव दातृभोक्तृव्रतोज्झितमिति तद्विप्राभावपरं।। न विष्णु।। आवा
हनं स्वधाकारं पिंडाग्नौकरणादिकं। ब्रह्मचर्यादि नियमा विश्वेदेवास्तथैव हि।। दातृणामप्यत्रो ऋणं नि
यमो न च विद्यते।। एतद्विवासंन्नवेलायामपि कार्यं।। तथा च बृहन्नारदीये। दिवोदितानि कर्माणि प्रमादाद
कृतानि वै।। यामिन्याः प्रहरं यावत्तावत्सर्वाणि कारयेत्।। ।।इति नित्यश्राद्धं।। ।।अथ वैश्वदेव
निर्णयः।। ।।अकृते वैश्वदेवे तु भिक्षुके गृहमागते।। उद्धृत्य वैश्वदेवार्थं भिक्षुकं तु विसर्जयेत्।।

राम

।।चर।।
।।५४।।

१

वैश्वदेवीकृतं पापं श्राद्धे नित्यं तु व्यपोहति॥ साग्नेः सर्वत्र श्राद्धे वैश्वदेवः। पक्वांते कर्म निर्वर्त्य वैश्वदेवं च साग्नि
कः॥ पिंडयज्ञं ततः कुर्यात्ततोन्वाहार्यकं बुधः॥ पित्र्यं पिंनिर्वपेत्पाकं वैश्वदेवार्थमेव च॥ वैश्वदेवं न पित्र्यर्थं न तद्दर्शे वै
श्वदेविकमिति॥ लौगाक्षिस्मृतेः॥ अत्र साग्निकस्याहिताग्निरिति हेमाद्रिः॥ कात्यायनेनोक्तं तु सर्वार्थमेकएव
पाको वैश्वदेवाद्यर्थादिति सूत्रणात्॥ अन्येषां तु पृथक्॥ श्राद्धात्प्रागेव कुर्वीत वैश्वदेवं तु साग्निकः। एकाद
शाहिकं मुक्त्वा तत्र चांते विधीयत इति हेमाद्र्युक्तेः। तत्रैव परिशिष्टे। संप्राप्ते पार्वणे श्राद्धे एकोद्दिष्टे तथैव
च। अग्रतो वैश्वदेवः स्यात्पश्चादेकादशेऽहनि॥ स्मार्त्ताग्निमतां तु अहिताग्नीनां वाग्नौकरणात्परं विकिरात्परं
वा होममात्रं पक्वपाकेन॥ अतपश्चादित्याद्यंते एव। अत्र मूलं हेमाद्रिचंद्रिकादौ स्पष्टं॥ सर्वेषां श्राद्धांते
वा तत्पाकेन वैश्वदेवं नित्यश्राद्धादीनीति तत्तीपः॥ श्राद्धं निर्वर्त्य विधिवद्वैश्वदेवादिकं ततः। कुर्याद्भिक्षां
ततो दद्याद्धंतकारादिकं तथेति पैठीनसिस्मृतेः। ततः श्राद्धशेषात्। श्राद्धान्ते श्राद्धशेषेण वैश्वदेवं समाचरे
त् इति॥ चतुर्विंशतिमतात्॥ एवं वैश्वदेवस्य कालत्रयस्य श्राद्धार्केर्ह्यां ख्यापनेन परिशिष्ट मूलाहत्त्वे वं

॥५५॥
॥ना॰दे॰॥

वावस्योक्ता॥ श्राद्धेवृद्धौक्षयेचांतेदर्शेमध्येमहालये॥ एकोद्दिष्टेनिवर्त्ततेतुवैश्वदेवोविधीयतइति॥ बहुस्मृत्यु
क्तत्वात्सर्वेषांश्राद्धांतेएवेतिमेधातिथिरितिस्मृतिरत्नावल्यां॥ योबहवः॥ बह्वृचांश्राद्धांतेएवेतिबाबदेवः॥
मध्यपक्षस्तन्त्राद्यारवापरइतिसएवाह॥ हेमाद्रिस्त्वबह्वृचपरतेएववैश्वदेवमाह॥ कातीयानांतुस्मार्त्तेश्रौ
ताग्निमतामादावेव॥ अन्येषांमतेतैत्तिरीयाणांसाग्निकानामादौसर्वत्र॥ पंचयज्ञांश्रांतेचेतिसुदर्शनभा
ष्ये॥ मार्कंडेयः॥ ततोनित्यक्रियांकुर्याद्भोजयेच्चततोद्विजान्॥ ततस्तदन्नंभुंजीतसहभृत्यादिभिर्नरः॥
ततःश्राद्धशेषात्॥ नित्यक्रियांनित्यश्राद्धं॥ तत्रएषपक्वपाकेनान्नेनत्यमिति॥ तेनैवोक्तः॥ पाकैक्येविकल्पः॥
अप्यवाथकोन्नावेस्मृत्यर्थसारेविशेषः॥ एकान्नावेप्रवासेवातंडुलान्नौषधीस्तथा॥ पयोदधिघृतंवापि
कंदमूलफलादिवा॥ भोजयेद्वैश्वदेवादौजलंवा[illegible]जले[illegible]॥ दंतस्तथैवएणहोतव्यंपाणिनाकठिनंहवि
रिति॥ स्नातकोब्रह्मचारीवाएषपक्वपाकेनवैश्वदेवंकुर्यात्॥ स्त्रीबालश्चकारयेदितिस्मृत्यर्थसारे। तत्रै
वो॥ होमाग्रदानरहितंतोत्कव्यंनकथंचन॥ अविभक्तेषुसंसृष्टेष्वेकेनापिकृतंतुयत्॥ देवयज्ञादिसर्वं

पत्सुवा

स्मृति
सौरे

राम

॥ध॰र॰॥
॥५५॥

र्यं लौकिकाग्नौ कर्त्तयदि ॥ इदन्नं पयः फलं मूलं तांबूलं पय त्रैषधं ॥ मलपि त्वापिकं त्रैव्याः स्नानदानादिकाः
क्रिया इति ॥ अथ निरग्निकस्य विशेषः ॥ तत्र याज्ञिकाः ॥ अथापातो धर्मजिज्ञासा केचितादूर्ध्वमपत्नीक उत्सन्ना
ग्निरनग्निको वा प्रवासी वा ब्रह्मचारी नान्वग्निरिति ग्रामादग्निमाहृत्य पृष्टोदिवी त्वा घृपद्वा प्रणीत्रिश्च सावि
त्रैः प्रज्वाल्य ताएं सवितुस्त्वा सवितुर्विश्वानिदेवसावितरिति पूर्ववदन्ते तैर्हुत्वा पाकं पचेत् त्रैवैश्वदेवो ब्रह्म
णे प्रजापतये गृह्याभ्यः कश्यपायानुमतये विश्वेभ्यो देवेभ्यो ऽग्नये स्विष्टकृत इत्युपस्थाय पूर्ववद्बलिक
र्म नैवं कृते वैश्वापाकोऽस्य वतिनवश्वापाकं पचेत् त्रैश्वापाकमश्नीयादत्र पिंडपितृयज्ञः पक्षाद्याग्रयणानि
कुर्यादिति ॥ गर्गमते वैश्वदेवे विशेषः ॥ पंचाहुतीनामुत्तरं स्विष्टकृद्धोमः ॥ कृतपज्ञे पूर्वं कृतगृह्येभ्यो नम
इति बलिं दत्वा पर्जन्यादिभ्यो दानं ॥ विश्वेभ्यश्च कृतेभ्यो कृतानांच पतय इति मंत्र द्वयेव कार पाठः ॥ ॥ इति
श्रीसम्राड्वामनात्मजगदाधरकृते गृह्यपरिशिष्टाद्विंकोडे पंचमहायज्ञपदार्थक्रमः ॥ ॥छ॥ अथा
तोध्यायोपाकर्म ॥ ॥ व्याख्यास्यान इति सूत्रशेषः ॥ अधीपत इत्यध्यायो वेदः ॥ तस्योपाकर्म ऽउपाकरणं ॥ उप

॥पद्दे॥
॥गादी॥
सा

क्रमः॥ एवं हि मन्वादयः स्मरंति॥ श्रावण्यां प्रौष्ठपद्यां वाप्युपाकृत्य यथाविधि॥ युक्तश्छंदांस्यधीयीत मासान्विप्रो
र्द्धपंचमान्॥ इति॥ ७। अर्द्धं नसहपंच मासान्॥ एवं सति अध्ययन प्रवृत्तस्यैतद्भवति॥ श्रुत एवाग्निमतोध्ययने त्र
वति। नच निरग्निमानुत्रा क्रोत्यग्निमाध्यापक मिकर्तुमिति॥ निरग्नेरप्येतदुपाकर्म लौकिकेग्नौ भवतीति गार्ग्यः
नचैतल्लोकादि संमतं। ॐ अध्यायोपाकर्मेति नक्षत्रमाणस्य विधिपूर्वकस्य स्वाध्यायप्रारंभकर्मणो नामधेयं॥
पौषस्य रोहिण्यां मध्यमाष्टकायां वा पाडिकोत्सर्जनं स्यादेवमुक्षणं नर्द्धसप्तमासानुक्त्वा पक्षे वेदाः कृष्णपक्षे
गा नीत्येवमधीत ततः सर्वयोत्सर्जनस्योपाकरणं॥ ॥स्वीकरणमिति जयरामो हरिहरश्च॥ अपरे तु
श्रावण्यां पौर्णमास्यामुपाकृत्यार्द्धषण्मासानधीत्योत्स र्गं वदंति॥ तत्र अतेषां मते उपाकृतानां वेदानामुत्स
र्गः॥ मिताक्षरादि धर्मशास्त्र निबंधेष्वेवं॥ ॥हरिहरजयरामन्नाष्ये भाद्रे उत्सर्जनस्योपाकरणं॥ ॥ॐ ब
धीनां प्राङ्नुत्रावे श्रवणेन श्रावण्यां पौर्णमास्यां॥ एतदुपाकर्म अपामार्गो षधीनां प्राङुत्रावे उत्य
[illegible] नवृत्तायां पौर्णमास्यां श्रवणे मुक्त्वा पंचदश्यपाकुर्वीत॥ श्रावण्यां हि पौर्णमस्यां श्रवण एव

राम
॥पद्द॥
॥पद्दे॥

णायश्रो भवति। ॐ बह्वृचानां प्राक् श्रावण्यां। तदेतदुक्तं पंतस्या एव विशेषणं। अत्र पौर्णमास्या एव प्राधान्यात्॥
विशेषणत्वेपि त पौर्णमास्यां भवतीति हरिहरेण। कौथुमपरेत्तु श्रवणयुक्तपौर्णमास्यां त्वेहस्तयुक्ते पं
चम्यां कार्यमित्याहुः। यदि ग्रहणं संक्रांतिर्वा पर्वणि भवति तदा पंचम्यामुपाकरणं भवति। तदुक्तं स्मृतिमहार्ण
वे। संक्रांतिर्ग्रहणं वापि यदि पर्वणि जायते॥ तन्मासे हस्तयुक्तायां पंचम्यां वा तदिष्यते। तथा संक्रांतिग्रहणं वा
पि पौर्णमास्यां यदा भवेत्॥ उपाकृतिस्तु पंचम्यां कार्या वाजसनेयिभिः॥ मदनरत्नेपि। यदि स्याच्छ्रावणे पर्वग्रह
संक्रांतिदूषितं। स्यादुपाकरणं शुक्लपंचम्यां श्रावणस्य तु॥ तत्रापि प्रयोगपारिजाते वृद्धमनुकात्यायनौ॥
अर्धरात्रादधस्ताच्चेत्संक्रांतिर्ग्रहणं तदा। उपाकर्म न कुर्वीत परतश्चेन्न दोषकृदिति॥ अत्रैव पारिजाते वे
दोपाकरणे प्राप्ते कुलीरे संस्थिते रवौ॥ उपाकर्म न कर्तव्यं सिंहयुक्ते तदिष्यते इति वचनं देशांतरवि
षयं। नर्मदोत्तरभागे तु कर्तव्यं सिंहयुक्तके। कर्कटे संस्थिते भानावुपाकुर्यात्तु दक्षिणे इति बृहस्पति
वचनात्॥ पराशरमाधवीये पृथ्वी॥ सामगानां सिंहस्थे [illegible] रवौ हस्ते हविष्पदं पुरोडाशावत्तद्धीकरणं

वचनात्॥ पर्वणि ग्रहणे सति तु वै त्रिरात्रादि धा भाव्यो स्तः॥ पूर्वो ग १

॥१५७॥
॥गद॥

दुपसंक्रियत इति त्वन्ये॥ एतच्चाष्टकास्वपि कार्यं। उपाकर्मोत्सर्जनं च पवित्रदमनार्पणमिति पारिजा
ते नित्यनैमित्तिके जापहोमयज्ञक्रियासु च॥ उपाकर्मणि चोत्सर्गे ग्रहवेधो न विद्यत इति॥ अथ मप्रारंभेन स्ता
न नवति। तत्रैव कश्यपः। गुरुत्वाग्निवयोर्मौढ्ये बाल्ये वा वार्द्धकेपि वा॥ तथाधिमा[illegible] इति॥ अथ म[illegible]
संक्रांतौ मलमासादिषु द्विजः॥ अथ सोपाकृतिर्न स्यात्कृतं कर्म विनाशकृदिति॥ एतच्च पूर्वाह्णे कार्यं। तथा च
प्रचेतोवचनं॥ नवेदुपाकृतिः [illegible] पौर्णमास्यां पूर्वाह्ण एव विति। दीपिकापि। अस्यास्तु विधेः पूर्वाह्णकालः स्मृ
त इति। यत्तु ग्रहाध्यायानामुपाकर्म कुर्यात्काले पराह्णिके॥ पूर्वाह्णे तु विसर्गः स्यादिति वेदविदो विदुरिति निगो
लवचनं॥ तत्समग्रविषयं। तेषामपराह्णस्योक्तत्वात्। तेन वाजसनेयिभिः पूर्वाह्णव्यापिनी तिथिर्ग्राह्य
॥ दिनद्वये पूर्वाह्णव्याप्तौ एकदेशस्पर्शे वा तैत्तिरीयव्यतिरिक्तानां पूर्वैवेति हेमाद्रिः। मदनपारिजातेपि। पूर्व
विद्धा पाश्रावणी वाजसनेयिनामुपाकर्मसु कं॥ मदनरत्ने तु पर्वाण्यौदयिके कुर्युः॥ श्रावण्यं तैत्तिरीय
का इति बह्वृचपरिशिष्टे तैत्तिरीयेकपदं॥ अनुवादत्वात्तस्य च प्राप्तधीनत्वात् स्मार्ते स्म पद्ये वेदिमा

वी

राम

॥धर्म॥
॥१५७॥

१८८

३ स्मृ.ग्र

त्रपरत्वात्सर्वयजुर्वेद्युपलक्षणार्थमित्युक्तं ॥ तथैवानंतभट्टीयेपि ॥ कारिकायांतु । पौर्णमाप्रतिपद्युक्तातत्रोपाक
रणः क्रियाउक्तं पौर्णप्रसंगेसत्र विष्णुत्तरसंज्ञिकोवसतः तरस्तोहेमाद्रिमतमेवयुक्तं । परात्वारमाधवीये ॥ श्राव
णीपौर्णमासीतुसंगवास्पृशेतायदि ॥ तदैवौदयिकग्राह्या नान्यौदयिकीभवेत् ॥ कालादर्शेपि ॥ श्रावण्यांप्रो
ष्ठपद्यांवाप्रतिनक्षत्रमुहूर्तकैः ॥ विद्यास्याछंदसांतत्रोपाकर्मोत्सर्जनंभवेत् । प्रयोगपारिजाते ॥ उपाकर्मोत्स
र्जनेचवनस्थानामपीष्यते । धारणाध्ययनांगत्वात् गृहिणांब्रह्मचारिणां ॥ उत्सर्जनंचवेदानामुपाकर्मतथैव
च । अकृत्वावेदजाप्येनफलंनाप्नोतिमानवः ॥ श्रावणस्यपंचम्यांहस्तेनवा । श्रावणस्यमासस्यशुक्ला
पंचमीहस्तेनयुक्ता । तत्रापिप्रायशोहस्तएवभवति ॥ अतः कालद्वयस्योपाकरणं ॥ कर्मणोविकल्पोयं ॥
नैर्तपर्यात्तकालत्वतुष्टयंवर्णयंति । वासुदेवदीक्षितास्त्वपि । आज्यभागाविष्णुद्भ्याहुतीर्जुहोति । यथा पृथिव्या
ऽग्नयेनमइत्यृग्वेदेंतरिक्षायवायवइतियजुर्वेदेदिवेसूर्यायेतिसामवेदेदिग्भ्यश्चंद्रमसइत्यथर्ववेदेब्र
ह्मणेछंदोभ्यश्चेतिसर्वत्रप्रजापतयेदेवेभ्यऋषिभ्यः श्रद्धायैमेधायैसदसस्पतयेनुमतयइतिच ॥

प्राप्यमवामन्ति ४

दे अधीयमाने पृथिव्यै स्वाहा अग्नये स्वाहेति द्वे आहु तिं ५ होति १

॥५८॥
॥८८॥

॥ आज्यभागानंतरमाज्याहुती होति ॐ अंतरिक्षाय वायव इति यजुर्वेदमधीयमाने ॥ दिवे सूर्यायेति सा-
मवेदमधीयमाने । दिग्भ्यश्चंद्रमस इत्यथर्ववेदमधीयमाने ॥ सर्वेषु वेदेष्वधीयमानेषु ब्रह्मणे
छंदोभ्यश्चेति द्वे आहुती सर्वत्र प्रतिवेदमावर्तेते । चत्वार्याद्यात् प्रजापतय इत्यादिकाश्च सर्वत्र । एवं कर्मो-
पाकरणे चतुर्णामपि वेदानां तंत्रेणोपाकरणे ब्रह्मणे छंदोभ्यश्चेत्याहुतीद्वयं प्रतिवेदमावर्तनीयं ॥
प्रजापतय इत्येवमाद्यास्तंत्रेणैव योगाविभागसामर्थ्यात् ॥ एतदेव व्रतादेशनविसर्गेषु ॥ एतदेव
आज्याहुतिनवकमेव कर्म व्रतादेशेषु वेदारंभव्रतेषु विसर्गे समावर्तने च । व्रतादेशनानि च वि-
सर्गाश्च ॥ व्रतादेशनविसर्गाः ते भवंति ॥ सदसस्पतिमित्यक्षतधानाश्चि: सर्वेनुपठेयुर्हुत्वाहु-
तौदुंबर्यस्तिस्त्रस्तिस्त्रः समिधः आदध्युरार्द्राः सपलाशाः आप्लुताक्ताः ॥ सविद्या ब्रह्मचारिणश्च पू-
र्वि कल्प्यौ धानानां च अपणानुपदेशात् लिंगानामेवोपादानं । अक्षताश्चताधानाः अक्षतधानाः

राम

२

॥५९॥
॥५५॥

ब्रह्मचारिणश्च सर्वकल्पेनैतत्त्रयं ब्रह्मचारिणः शिष्यास्तेन सर्वलौकिकेन प्राङ्मुखोपविष्टाग्निं परिचरणस्य मेधाध्यानमंत्रेणादद्युः ५

भेदेना २ त्रं

ताः सदसस्पतिमिति मंत्रेणाचार्यस्त्विज्जुहोति ॥ सर्वे शिष्या अनुसहैवानुवर्तमानाः सदसस्पतिमंत्रिः पठेयुः ॥ विं
कृत्वा हुत्वा हुत्वा एकैकामसत्त्वधाना हुतिं उदुंबरवक्षोड्वा स्त्रिस्त्रतिस्त्रश्चाज्यैः प्रत्रसहिताः प्लुतत्वि मा: समि
धश्चाचार्यसहिताः शिष्याः सावित्र्या तत्सवितुरिति मंत्रेणैव दद्युरग्नौ प्रक्षिपेयुः ॥ नयोपधेन औदुंबरी
स्तिस्त्रपाठ [illegible] इति हरिहरजयरामौ ॥ औदुंबर्य इति तु कर्कमतं पत्रतः ॥ तिस्रस्तिस्र इति वासुदेवात् पुरुषविधया ॥ न
समिद्विषयेति हरिहरः ॥ अतश्च प्रत्याहुतिएकैकामेवादद्युः ॥ त्रात्रीन् वंतित्यनत्वचा ग्रखादंतः प्राश्नीयुः ॥
रात्रौमेवं तु वाजिन इति मंत्रेण ततपवानां धाना अनखंडंतः दंतैरचर्वयंतः प्राश्नीयुः सर्वे आचार्यसहिताः
बहुवचनोपदेशात् ॥ घधिकाव्णा इति दधि च नेदेयुः ॥ सर्वे ॥ सपावंतगणमिष्ठलातं निं ना कर्षफलकेन क्ष्ठोहु
पात्स्ताविश्चा पुरुकद्यातिरित्यनुवाकेन वा ॥ सआचार्योपावंतं पावत्संख्याकं शिष्याणंगणं समं हं द्व घेत्रा
वतीस्त्रावत्संख्याकान्नाकर्षफलकेन औदुंबरेण बाहुप्रमाणेन सर्पीकृतिना तत्सवितुरित्यनेन पाजु
हुयात् ॥ पुरुकद्यातिरित्यनुवाक्जुहुयात् ॥ ततो धानाभिः स्विष्टकृत्प्रभृति ॥ कर्षविलेखने धातुस्त

केन वा

स्त्र २

ग २
प ४
ना ५
स्तिला ७

॥५९॥ ॥गदा॥

स्येतद्रूपं । आसमंतरहं फलं यस्यासौ ततः । अथवा आकर्षयतीत्याकर्षः फलमेव फलकं । तेन जुहुयात् तच्च वैकंकत
मितिकारिकायां ॥ प्राचीनां ते प्रत्यङ्मुखेभ्यः उपविष्टेभ्यः शिष्येभ्यः ओंकारमुक्त्वा त्रिः सावित्रीमध्यापादीन्
प्रब्रूयात् ऋषिमुखानि बह्वृचानां पर्वाणि छंदोगानां सूक्तान्यपरेणा ॥ संस्त्रवणार्थं [illegible] ते त्वपि प्राङ्मुखः प्र
त्यङ्मुखोपविष्टेभ्यः शिष्येभ्यः यजुर्वेदोपाकरणे [illegible] वेदोपाकरणे ऋषिमुखानि मंड
लादीन् ब्रूयात् । छंदोगानां शिष्याणां सामवेदोपाकरणे पर्वाणि पर्वणादीन् ब्रूयात् ॥ अथर्वणं शिष्या
णां अथर्ववेदोपाकरणे सूक्तानि सूक्तादीन् ॥ सर्वत्र पठितः सह नाववतु सह नेन इदं विपेवदस्तो ब्रह्म इद्धस्त
द्विदयेन यथा नौ विद्विषामह इति ॥ आचार्यसहिताः ॥ सर्वैः शिष्यैः सह नो स्वितिमंत्रं जपंति । मंत्रार्थः
॥ इदं ब्रह्म सांगोपांगं वेदः ॥ अध्ययनार्थं सह आचार्यप्रामाणां समवेतानां नोऽस्माकं अस्मद्रूपे अस्तु ॥ स्विरं भ
वतु । ततः सह मिलितानोऽस्मान् । अवतु । पायात् ॥ सहतु तत्पात्रमिलितानां नोऽस्माकं अनध्यापाद्वीर्य
पने क्ष्मादि अवगादि नोपाहतमापइदं ब्रह्मदब्रवीर्य वत् ॥ अपात ममस्तु । इदं प्रजापतिः । ततः पथ्यायावत्वे

अंका । उक्ता उच्चार्य चार्यं तत्सवितुर्वरेण्यमिति सावित्री त्रिरश्च मंत्रब्राह्मणयोरध्यायादीनन्त्रपर्वयादध्यापयेत् ॥ बह्वृ
चानां शिष्याणां

प्र
श्री २
हंसेनो स्तु६
राम
॥५२॥ ॥पथ॥

न २

दध्यत्तु येन वेदं ~~...~~ रां विद्विषामहै। नहि कः॥ त्रिरात्रं नाधीयीरन्। क्षौम नखानामनिकृंतनं॥ उपाकर्मोत्सर्गं त्रि

रात्रं नाधीयीरन्न सर्वे ग्रंथ्यनेकुर्युः॥ लोमनखानां छेदनं त्रिरात्रं न कुर्युः। एके प्रागुत्सर्गात्॥ तेके आचार्या

प्रागुत्सर्गाल्लोमनखानामनिकृंतनं इच्छंति उत्सर्गश्राद्धं षण्मासानधीत्योत्सृजेयुरिति वक्ष्यति॥ छ ॥

॥ इति श्रीत्रिरग्निचित्सम्राट्स्थपतिवामनात्मजगदाधरकृते गृह्यसूत्रभाष्ये द्वितीयकांडे दशमीकंडिका॥ १०॥

अथ पदार्थक्रमः॥ तत्र प्रथमप्रयोगे आचार्येण मातृपूजापूर्वकं नांदीश्राद्धं कार्यं॥ कारिकायां॥ ततो नांदीमुखं

श्राद्धं मातृपूजनपूर्वकं॥ गुरोस्तदात्मसंस्काराच्छिष्याणां परार्थ्यः॥ आचार्यस्यावसथ्याग्नौ कर्म। ब्रह्मोपवे नद

शनाद्याज्यभागांते विशेषः॥ तंडुलस्थाने अक्षतधानानामासादनं प्रोक्षणं च॥ उपकल्पनीयानि। औ

दुंबर्यः समिधः दध्य। आकर्षफलकं। तिलाः। सक्तवो धानाः॥ आज्यभागांते वेदाहुती नामनुमत्यंतानां पा

होमो वेदारंभवत्। एकदा सर्ववेदोपाकरणे चेत्प्रतिवेदमाहुतिद्वयं हुत्वा हुत्वा ब्रह्मणे छंदोभ्यः इत्याहुति

द्वयं पुनः होतव्यं॥ प्रजापत्याद्यनुमत्यंताः सप्ताहुतयस्तंत्रेण। ततः सदसस्पतिमित्यनयर्चाक्षतधाना

यज्ञोपवीतधारिणः शिष्याः ... कार्यं मंत्रेण सौम्य समिदाधानं अग्नौ ।। एवं द्विरपरं आनाहोमः ।। समिदाधानं
च । ततः आचार्यः शिष्याश्च ... ततः प्राणायामः ... ।। ३७

।।६०।।
।।८८।।

होमः ।। सदसस्पतिमिति मंत्रं शिष्या अपि अनुपठेयुः ।। ततः आचार्यः ।। शिष्याश्च सर्वे अग्नौ कुर्बर्हिषि समिधस्तिस्रः समिध
आर्द्राः घृताक्ता आदध्युः तत्सवितुरित्यनया ।। ततः सर्वे षां दधिक्राव्णा इत्यनया दधिभक्षणं ।। आचमनं
च ।। ततो यावंतं शिष्यगणं इच्छेदाचार्यस्तावंत तिलानाकपिफलेन जुहुयात् सावित्र्या । इदं सवित्रे । शुक्रज्यो
तिरित्यनुवाकेन वा । ततो धानाः स्विष्टकृत् । ततो नवाहुतयः ।। ततः संस्रवप्राशनं । मार्जनं । पवित्रप्रति
पत्तिः ।। दक्षिणादानं ब्रह्मणे प्रणीताविमोकः ।। ततः प्रत्यङ्मुखेभ्य उपविष्टेभ्यः प्राङ्मुख आचार्यः
ॐकारमुक्त्वा त्रिस्सावित्रीमुक्त्वा इषेत्वा ध्यायादीन् ब्रूयात् ।। बह्वृचादीनां यथोक्तं । सहनावित्विति मंत्र
पाठ आचार्यसहितानां शिष्याणां । ततस्त्रिरात्रमनध्यायः ।। लोमनखानामनिकृंतनं च त्रिरात्रमेव । आग्रु
म सर्गाद्वा लोमनखानामनिकृंतनं ।। ततः परमेव ब्रह्मणयोरध्ययनमागु ... ध्यायोत्सर्गात् ।। ।। इत्यु
पाकर्मणि पदार्थक्रमः ।। ततो वैश्वदेवः ।। ।। अत्र रक्षाबंधनमुक्तं हेमाद्रौ ।। ततोपराह्णसमये रक्षापोट
लिकां शुभां ।। कारयेद्द्वतैः ... सिद्धार्थैर्हेमकृतैरिति ।। इदं च रक्षाबंधनं कार्यं ।। रक्षाबंधनक

राम
।।श्र।।
।।६०।।

त्रेध्ये श्रावणी फाल्गुनी तथा ॥ श्रावणी नृपतिं हंति ग्रामं दहति फाल्गुनीति । गृह्यवचनात् ॥ नक्रसत्त्वे तु राज्ञा वर्पितं दंते
कुर्यादिति निर्णयामृते ॥ तत्र मंत्रः ॥ येन बद्धो बली राजा दानवेंद्रो महाबलः ॥ तेन त्वामभिबध्नामि रक्षे मा चल
मा चल ॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरन्यैश्च मानवैः ॥ कर्तव्यो रक्षिकाचारो द्विजान्संपूज्य शक्तित इति ॥ वा
ते मासस्याप्यध्यायं सर्वानध्यायः ॥ वाते वायौ प्रचंडे सति वातस्य सर्वदा विद्यमानत्वादिति त्वापितोत्र ग्राह्यः ॥ सर्वत्र
ध्यसंयोगानामपि छंदसामेव ॥ यथदुपाध्यायस्य काशाद्धेतिः शिल्पाद्यपि सर्वं गृहणे न गृह्यते ॥ शिल्पिनाम
पि यत्र नध्यायप्रसिद्धिरस्ति ॥ अनध्यायश्च प्रकृतत्वाद्गुरुमुखाद्यधिष्यते तत्रैव न भवति । न गुणेनेपीति ॥ अपरे
तु सर्वविषयतामिच्छंति ॥ आद्रशने चोल्कावस्फूर्ज्जभूमिचलनानामुत्पातेषु तु संधिषु । चाकालं अल्पिका
एते अनध्यायाः ॥ आकालं यस्मिन्काले उल्कादेरापतनं अपरे [illegible] तावत्कालपर्यंतं ॥ आद्रा
शने आद्रान्नभोजने आद्रान्नाजीर्णे इत्यपरे ॥ उल्काज्वालाकृतिः पतंति तारकाः ॥ अवस्फूर्ज्जविद्योतमाना
विद्युत् ॥ भूमिचलनं भूमेः कंपः ॥ अग्निर्ग्रामदाहः ॥ एषामुत्पातमुत्पवनं । तस्मिन् ॥ ऋतुसंधिषु चाव्दे

दिने

६७

श्री ४
राम

॥६१॥
॥गदा॥

नएकस्याकृतोरंतः अपरस्यायावदप्रवृत्तिः सकालउच्यते॥तत्रर्कोचोल्लिकतानो पद्यते। ततश्चपूर्वस्यांतरिंत्यारा
त्रिः उत्तरस्याघम हस्त्तावाननध्यायः॥उत्सवेष्वत्रदर्शनेसर्वरूपेचत्रिरात्रंत्रिसंध्यंवा॥उत्सवेषुछंदःसुवे
दानामुत्सर्गकृते। अत्रदर्शनम आदिनापितंगृह्यते॥सर्वकालमत्रस्यविद्यमानत्वात्॥विद्युत्स्तनयित्नुवृष्टि

नो

र्गर्जितौपगपस्रवतिः सर्वस्वरूपं॥तत्रापित्रिरात्रमनध्यायः त्रिसंध्यंवेतिविकल्पः॥अभ्रदर्शनेत्रिरा
त्रंसर्वस्वरूपेचात्रिसंध्यमितिव्यवस्थितविकल्पइ त्यन्ये॥उल्काद्रपाणिरुदकेतिनायाःसंधिवेलयो
रंतः शावेग्रामेग्राममध्येऽतर्दिवाकीर्त्येधावतोभिनाःस्तपतितदर्शनाश्चर्याभ्युदयेषुचतत्कालं॥ऽजुल्का यावद
र्द्रपाणिस्तावन्नाधियीत। तथाउदकेयावत्तिष्ठतितावत्॥निशायां॥स्मृत्यंतरात्रिशान्नाबदेनार्द्धरात्रमुच्यतइ

राम

तिकर्कः। महानिशाचविज्ञेयामध्यस्थप्रहरद्वयमितिस्मरणाद्रात्रेः पूर्वोत्तरौपमौवेदाभ्यासेनतोन
येदिति वचनेरात्रेः पूर्वचतुर्थयामयोवेदाभ्यासविधानद्वितीयतृतीयोः परिशेषादनध्यायइति।हरिह
रः॥संधिवेलयोरंतः शावेग्रामेग्राममध्येयावच्छवमृतशरीरंनवतितावन्नाधीयीत॥अंतर्दिवा

॥धर॥
॥६१॥

अहोरात्रयोः संध्याकालयोः॥

ती

धर्मतः शीघ्रं ग[illegible]ध तः॥ अभिशस्तो ब्रह्महत्यादिपापेनाभियुक्तः॥ पतितो ब्रह्महत्यादिपापेन॥ अभिशस्तो पति

[illegible] कीर्त्यपठनीयं पदप्रवर्त्यादि तद्दिवाकीर्त्यं तस्मिन्विषये ग्रामे अनध्यायः॥ तद्ग्राममध्ये न पठनी
यं सूत्रयोज[illegible]मर्द[illegible]काकाक्षिगोलकन्यायेनोभयत्र योजनीयं॥ ग्रामेंतर्दिवाकीर्त्ये इति। अन्ये तु अं
तः संस्थिते दिवाकीर्त्ये चांडालो पत्रसौ तर्दिवाकीर्त्यादेशात्सूत्रानध्ययं [illegible]
॥ [illegible] महद्भुतमिंद्रलाजादि॥ अभ्युदयः पुत्रजन्मविवाहादि एषु धावनादिनिमित्ते पुतत्कालव्या
वच्छिन्निते तावत्कालमनध्यायः॥ नीहारे वादित्रशब्दश्रवणे ग्रामांते श्मशाने श्वगर्दभोलूकसृगाल
सामशब्दे शिष्टाचरिते च॥ नीहारे धूमरीकायां॥ वादित्राणां मृदंगादीनां शब्दे॥ आर्त्तस्य दुःखितस्य रु
दितशब्दे॥ ग्रामस्यांते सीम्नि श्मशाने मृतकदाहस्थाने॥ श्वा च। गर्दभश्च। उलूकश्च। सृगालश्च। सामश्च
श्वगर्दभोलूकसृगालसामानि॥ तेषां शब्दश्रवणे शिष्टाचरिते च शिष्टस्य श्रोत्रियस्याचरिते आग
मने च कारात्तत्कालं प्रावाच्छिन्निमित्तमनध्यायः॥ गुरौ प्रेते पोन्नमेयादशरात्रं चोपरमेत्॥ गुरौ आचार्ये प्रेते
मृते अप उदकं अन्वेयात् विशेषस्नानपूर्वकं उदकदानाय॥ दशरात्रं दशाहानि स्वाध्यायाध्य

सृगालश्च ४
ल

॥६२॥
॥गादा॥

यनाऽउपरमेत्॥ सतानूनप्त्रिणि सब्रह्मचारिणि च त्रिरात्रं। तानूनप्त्रं च ध्रौवं व्रतप्रदाने गच्छत्यापतय इति हि
अस्वशीत्याः स्रुवेण तानूनप्त्रे ते तद्दक्षिणस्यां वेदिश्रोणौ निधाय यावत् मन्त्रांत्स्तु विजेय जमानस्यानाध्य
द्दत्वा मिर्जुष्टोतिष्टोमे विहितं॥ सह तानूनप्त्रस्याऽपेयुस्तस्मे सतानूनप्त्री तानि तस्मिन् सतानूनप्त्रिणि प्रेते॥
समाने तुल्ये व्रणि वेषे च रतीति सब्रह्मचारी। तस्मिन् ब्रह्मचारिणि साहाध्यायिनि समानाचार्ये प्रेते च
त्रिरात्रं स्वाध्यायादुपरमेत्। एकरात्रं समब्रह्मचारिणि॥ न सब्रह्मचारी असब्रह्मचारी तस्मिन् जिनार्ये चा
प्रेते चैवं त्रिरात्रमनध्यायः॥ [illegible] न श्रपयस्य स्तुतरोक्तामनध्यायः। तत्र
स्वत्यपसारे॥ अर्धषष्ठान्मासानधीत्योत्सृजेयुः॥ अर्धः षष्ठो मासो येषां ते अर्धषष्ठाः मासास्तान
र्धषष्ठान्मासानधीत्य पठित्वा उत्सृजेयुः॥ पूर्वमुपाकृतानि [illegible] निस्वीकृतानि छंदांसि उत्सृजे
युः। उत्सर्गं कुर्युः दसामेव अंगानि पुनरधीयत। अर्धसप्तमासान्वा॥ अधीत्योत्सृजेयुरिति शेषः॥ अ
र्धः सप्तमो मासो येषु ते अर्धसप्तमा मासः॥ अयं मासमर्धं जपंतस्तु अन्नाक वीपु वायो नाधर्मः परीपतत॥

२
५

राम
॥५२॥
॥६२॥

।परिसरव्यस्य धर्म्मिणो विसरव्यानि विसृजामह इति॥ उत्सर्गानंतरं आचार्येण सह शिष्या उन्नाकवाइ तिम
म्नूकुंतपंति। उच्चारयंति। मंत्रार्थः॥ हे अग्निनौ॥ पुवं उन्नाउन्नौ। यतः कवी क्रांतदर्शिनौ पुवानौ॥ पुष्कालसंपादि
तो धर्म्मो वोस्माकं परिसरव्यस्य। स्तुमित्रनावस्य परापतत॥ रक्षणार्थमागतः तेन धर्मेण विसरव्यानि विद्वेषा
दीनि विषमाध्यापनादीनि वासृजाम स्यजाम किं न तस्य सरव्यस्य धर्म्मिणः। उपकारादिधर्म्मवतः तस्य
मनुकूलस्य इत्यर्थः॥ त्रिरात्रं सहोष्य विप्रतिष्ठेरन्॥ अत्र त्रिरात्रं सह एकस्मिन् गृहे आचार्यसहिताः
शिष्याणि वा संकृत्वा विप्रतिष्ठेरन् विप्रवासं कुर्युः। त्रि[illegible]रात्रं सहवासनियमः। विप्रतिष्ठा त्र विर्धैर्ण एव॥ १२॥
इति श्री त्रिरग्निचित्सम्रा॰ वामनात्मज दीक्षितगदाधरकृते गृह्यसूत्रभाष्ये द्वितीयकांडे एकादशी कंडिका॥
॥ ॥ पौष्यस्य रोहिण्यां मध्यमायां वाष्टकायां मध्यायानुत्सृजेरन्॥ पौषमासस्य रोहिण्यां रोहिणीनक्ष
त्रे। मध्यमायामष्टकायां पौषशु[illegible]ष्टम्यां वा॥ अध्यायानुत्सृजेरन्॥ पूर्वमुपाकृतान् पुनरुपाकरणपा
वन्न धारयेत्॥ उत्सर्गप्रकारमाह॥ उदकांतं गत्वाद्भिर्देवांश्छंदांसि वेदानृषीन् पुराणाचार्यान् गंधर्वानित

त ६

ष्याउद्यैम २

॥ द्वि.गृ. ॥
॥ गदा ॥

ब्रह्मचंचलः कृत्वोदंचुमचलितव्याचिरतास्मद्द्विमंमंत्रं कृष्ण: ५

राचार्या संवत्सरं च सावयवं पितॄन्नाचार्यां तर्पयेयुः ॥ नद्याद्युदकांतं उदकसमीपं गत्वा तत्र स्नात्वा ऋ
षीन्देवान्पितॄंस्तर्पयेयुः आचार्यसहिताः शिष्याः ॥ उदकांतगमने च स्नानं न लभ्यते । अत्र नदीरजोदोषो न भवति ॥
तदुक्तं ॥ उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च ॥ चंद्रसूर्योपरागे च रजोदोषो न विद्यते इति ॥ सावित्रीं च
तुरनुद्रुत्य विरताः स्म इति प्रब्रूयुः क्षपणं प्रवचनं च पूर्ववत् । तर्पणस्यांते आचार्यसहिताः सर्वे शिष्याः सा
वित्रीं तत्सवितुरि[illegible] ततः क्षपणं अनध्ययनेन मनसा नामनिकेतनं च ॥ प्रवचनं चा
ध्यायादीनां पठनं ॥ पूर्ववत् ॥ उपाकर्मकालवत् ॥ ततः [illegible] । त्रिरात्रानंतरं शुक्लपक्षेषु छं
दांस्यधीयीरन् । कृष्णपक्षेषु अंगानि । ततो ऽर्द्धषष्ठान्मासानर्द्धसप्तमान्वा मासानेवमेवाधीत्य सर्वतो
ऽन्यत्रोपाकृत्य वाऽधीयीतेति सिद्धं ॥ ॥ इति श्रीवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये द्विती
ये कांडे द्वादशी ॥ १२ ॥ ॥ अथ पदार्थक्रमः ॥ ॥ पौषस्य रोहिण्यां मध्यमाष्टकायां वा पौषस्यैवाध्याय
समि ॥ तत्र मातृपूजापूर्वं मान्युदयिकश्राद्धं उदकांतगमनं स्नात्वा निर्देवाधिदितर्पणं देवास्त्वयेतां ॥

राम

॥ पार ॥
गद ३१८

छंदांसि तर्पयंतु। वेदास्तर्पयंतु॥ ऋषयस्तर्पयंतु। पुराणाचार्यास्तर्पयंतु। गंधर्वास्तर्पयंतु। इतराचार्यास्तर्पयंतु
संवत्सरः सावयवस्तर्पयंतु। पितरस्तर्पयंतु। आचार्यास्तर्पयंतु। नामगोत्रोच्चारणपूर्वकं स्वांस्वान्पित्रादींस्तर्प
येयुः जीवपितृकाणां तु पितामहादितर्पणं॥ ततः तत्सावित्र्युदितस्याः सावित्र्याश्चतुरनुद्रवणं॥ [illegible] विरताः स्म
इति सकृदूयुः॥ उपाकर्मवदध्यायादीनां पठनं। त्रीरात्रमध्यायः॥ लोमनखानामनिकृंतनं। त्रिरात्रांते
तस्त्रिरात्रादूर्ध्वं शुक्लपक्षेषु छंदांसि अधीरन्। कृष्णपक्षेष्वंगानि ततः पुनरर्द्धषष्ठान्मासानधीत्यार्द्ध
सप्तमासान्वाधीत्य एवमेवोत्सर्गविधाय उपाकवीत्यादिकामन्वं जपित्वा त्रिरात्रमेकरात्रं वस्थापयपये
कृष्णपक्षेष्ठेयुः॥ ततः उपाकरणकाले उत्सर्गं वेदानुपाकृत्याध्यापनं यावदुत्सर्गं। ब्रह्मचारकारिकायां वि
शेषः॥ पौषस्य रोहिणीमद्धं वाष्टकां प्राप्य मध्यमा। उत्क्रांतं समासाथ वेदस्योत्सर्जनं बहिः॥ स्नातसं वि
धिवत्तत्र स्थापयेदष्ष्टं नं धतीः प्रवरे। आततो धीमानूकुर्यात्तेषां प्रतिष्ठितं॥ इमा वेवेतिपजुषा [illegible] मन्नेषां विनि
